शिवराज-विजयः

(ऐतिहासिक उपन्यासः)

प्रथमो विरामः

(निश्वासत्रयात्मकः)

॥ श्रीहरिः ॥

धर्मनियन्त्रिताया भारतीयराजनीतेस्तत्प्रसङ्गेन भारतीयसंस्कृतेः शौर्य्यवीर्य्याध्यवसायादिलोकोपयुक्तकल्याणगुणगणानाञ्च शिवराजविजयकाव्ये शोभनं सङ्कलनमतीवोपयोगि चैतस्मिन् विषमेऽनेहसि ।

करपात्रस्वामिनः

प्रणेता—

महाकवि—श्रीमदम्बिकादत्त—व्यासः

॥ श्रीः ॥

महाकवि-श्रीमदम्बिकादत्त-व्यास-विरचितः

शिवराज विजयः

(ऐतिहासिक उपन्यासः)

प्रथमो विरामः

(निश्वासत्रयात्मकः)

व्याकरण-साहित्य-मीमांसाद्याचार्येण

पं० श्रीरामजीपाण्डेयशास्त्रिणा

विरचितया वैजयन्त्या

काशिकहिन्दुविश्वविद्यालये

दर्शन-विभागे प्राध्यापकेन

श्रीकेदारनाथमिश्रेण

प्रणीतेन राष्ट्रभाषानुवादेन च विभूषितः

प्रकाशकः—

प्रणेतृ-पौत्रः स्वर्गीय-श्रीराधाकुमार-व्यास-तनयः
श्रीकृष्णकुमारव्यासः

प्राप्तिस्थानम्—
व्यास पुस्तकालय,
डी. १६/१४ सोमेश्वर गली,
मानमन्दिर, काशी।

अस्य खण्डस्य प्रथमं संस्करणम्
१९७६

मुद्रकः—
भार्गव भूषण प्रेस,
त्रिलोचन, वाराणसी।
२३/४–७५

ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च ॥

॥ श्रीः ॥

निर्माणहेतुः

"गद्यं कवीनां निकषं वदन्ति"

श्लोक एकस्याप्यंशस्य चमत्कार-विशेषाधायकत्वे सर्वोऽपि श्लोकः प्रशस्यते, न च पद्ये तथा सुलभं सौष्ठवम् ; गद्ये तु सर्वाङ्गीण-सौन्दर्यमुपलभ्येत चेत्, तदैव तत् प्रशंसा-भाजनं भवेद् भव्यानाम् । पद्ये छन्दःपारवश्यात् स्वच्छन्द-पद-प्रयोगो न भवतीत्यनिच्छताऽपि कविता-प्रसङ्ग-प्राप्तं स्वाभाविकं स्वल्पमपि वचनीयं क्वचिद् विस्तार्यते, क्वचिद् बह्वपि नियताक्षरैः सङ्क्षिप्य क्षोदिष्ठं विधीयते, क्वचिच्च द्वित्र-स्वाभाविक-पद-प्रयोग-समापनीयान्यपि पारस्परिकालाप-संसक्त-प्राप्त-वाक्यानि जटिलीक्रियन्ते । गद्ये तु यदि किमपि तादृशमस्वाभाविकं स्यात्, तत् कवेरेव निर्वक्ति महदवद्यम्—इत्यादिकारणैः पद्यापेक्षया गद्यमेव महामान्यं भवति, भवति च दुष्करमपि गद्यकाव्यमेव । अत एव शुद्ध-पद्यात्मकेषु बहुषु महाकाव्येष्वपि खण्डकाव्येष्वपि च प्राप्येष्वपि गद्यपद्यात्मकेषु चम्पू-नाटकादिषु चाऽनेकेषूपलभ्यमानेष्वपि, शुद्ध-गद्य-काव्यानि तथा नाऽऽसाद्यन्ते । अस्माकं महामान्या धन्याः सुबन्धु-बाण-दण्डिनो महाकवयो ये वासवदत्ता-कादम्बरी-दशकुमारचरितानि सुधामधुराणि सदा सदनुभव्यानि गद्यकाव्यानि विरचय्य भारतवर्षं सबहु-प्रमोद-वर्षं व्यधिषत ; येषां चोक्ति-पर्य्यालोचन-प्राप्त-पर्याप्त-व्युत्पत्तयोऽसङ्ख्याश्छात्रा अद्याऽपि वर्तन्ते, वर्तिष्यन्ते च चिराय । पूर्वैर्भट्टार-हरिचन्द्र-प्रभृतिभिरेतैर्महाकविभिश्च प्रचारि-

तोऽपि महाकाव्य-सञ्चारो न चिराय स्थितिमकलयत्। भारताभिजन-भाषाकविभिरपि च प्रायः पद्य-प्रकृतिकैरेव समभावि—इति जगत्प्रसिद्धैः सूरदास-प्रभृतिभिरपि पद्यान्येव निबद्धानि। साम्प्रतं तु समय-महिम्ना भारतीय-वर्तमान-भाषासु बहुधा गद्यकाव्यानि विरच्यन्ते। वङ्ग-गुर्जरादि-भाषासूपन्यासैरेव व्याप्ता विपणयः। हिन्दीभाषाऽपि च प्रत्यहमतिशयमासादयति गद्यसोपानेष्वेव पदाधाने। परं न केवलं प्राकृतिक-गिरां गुरवो गीर्वाण-गिरि व्युत्पत्तिगरीयांस उपलभ्यन्ते, न वा कांश्चिद् धन्य-धन्यान् विहाय संस्कृतसाहित्य-व्युत्पन्ना एव, इतर-भाषानुरक्ता विशेषतोऽवलोक्यन्ते। अत एव भारताभिजन-भाषा-कवयः प्रायः स्वभ्रमान् साक्षात् संस्कृतसाहाय्येन शोधयितुं न पारयन्ति, न वा भाषाकवि-समाहृतान् नवान् नवान् मनोरमान् चमत्कारविशेषाधायकान् पथोऽनुसर्तुं संस्कृत-साहित्य-वैभवेषु च निधीन् वर्द्धयितुं संस्कृतज्ञा एव प्रायशः पारयन्ति। कदाचित् वृन्दारक-वृन्द-वाण्यां गद्यकाव्य-प्रचार-दौर्वल्यस्येदमेव प्रधानं कारणं स्यात्। महदिदमुपहासास्पदं विडम्बनं यत् मण्डूक इव महापारावार-पारमासादयितुं यतमानस्तादृशं कवि-कौशल-निकषायितं गद्यकाव्यं मादृक्षः क्षोदीयान् जनो रिरचयिषुः संवृत्त इति। काव्यमिदं मा स्म भूत् तादृगभाव-विघट्टकम्, मा स्म वा पुषत् कस्यापि मोद-विशेषम्, परं मया तु सनातनधर्मधूर्वह-शिवराज-वर्णनेन रसना पावितैव, प्रसङ्गतः सदुपदेश-निर्देशैः स्व-ब्राह्मण्यं सफलितमेव, ऐतिहासिक-काव्यरुचीनि स्वमित्राणि रञ्जितान्येव, चिरमस्मत्पूर्वजैः पराशर-पाराशरादिभिरुपासिता संस्कृतभाषा सेवितैव, चक्षुषी निमील्य

सविशेषं साक्षात्कृता पीयूष-पूर-पूर्णैरिव दृक्पातैरुज्जीवयन्ती पारिजात-कुसुम-वर्षिभिरिव वचनैरुपदिशन्ती जननी सरस्वती समाराधितैव, सद्यः परनिर्वृतिश्च समासादितैव। भवभूतिजगन्नाथादीनां राजमान्यानां कवि-मण्डल-चक्रवर्तिनां तु द्वेषविशेषैर्वा स्वग्रन्थ-मार्मिकजनालाभेन वा कारणान्तर-कलापैर्वा महानेव शोक-सङ्घात आसीत् "कोऽस्मद्ग्रन्थानवलोकयिष्यति? को वाऽस्माकं गूढ-तात्पर्यं श्रोष्यति?" इति चिन्ता-सन्तान-वितान-झञ्झावातोद्धूत-संशय-घनघनाडम्बर एव तथा समरौत्सीद् हृदयाकाशम्; यथा ध्रुवं सद्यः परनिर्वृतिरूप-चन्द्रिका-प्रसारेणाऽपि न रञ्जितमेव तदन्तः-करणकुमुद-वनम्।

तथा च तैरेवोक्तम्—

"ये नाम केचिदिह नः प्रथयन्त्यवज्ञां
जानन्ति ते किमपि तान् प्रति नैष यत्नः।
उत्पत्स्यतेऽस्ति मम कोऽपि समानधर्मा
कालो ह्ययं निरवधिर्विपुला च पृथ्वी॥"

"विद्वांसो वसुधातले परवचःश्लाघासु वाचंयमा
भूपालाः कमलाविलासमदिरोन्मीलन्मदाघूर्णिताः।
आस्ये धास्यति कस्य लास्यमधुना धन्यस्य कामालस-
स्वर्वामाधर-माधुरीं विधुरयन् वाचां विलासो मम॥"

अहं तु तादृक्षाणां महाकवीनां चरण-रजो-विमर्श-भाजनमपि तदपेक्षयाऽधिकं भाग्यवत्तरोऽस्मीति निश्चिनोमि, यतो मद्ग्रन्थ-मार्मिकस्तु मिथिला-मही-महेन्द्रः, भारत-साम्राज्य-व्यवस्थापक-समाज-सञ्जीवनः, महामान्यः, वदान्यः, धन्य-धन्यः, विविध-

विरुदावली-विराजमानः राजमानोन्नतः, नतोन्नतिदायकः, मह
राजश्रीरमेश्वरसिंहवीरवर एवाऽस्ति। माद्यन्ति च परश्शता वाराण
स्यादि-पण्डित-मण्डल-मण्डना रसाऽऽस्वादानुकूल-वासना-वासित
ऽन्तःकरणा विबुध-जनाः।

सोऽयं स्वलेखनी-कण्डूमुपशमयितुं लिखितः लेखप्रकाण्ड
यदि केषाञ्चित् पण्डित-प्रकाण्डानां कर्ण-कण्डूं खण्डयेत्; तत
कृतकृत्यः संवर्त्तेय। ये तु पुरोभागिनो निगीर्याऽपि प्रबन्धममुं तुण्ड
मुण्ड-गण्ड-कण्डूयनैः, ताण्डव-करण्डीकृत-भ्रूभङ्गैश्चाऽस्मानास्म
कांश्च हासयिष्यन्ति; तेऽप्यसङ्कुच-प्रणति-पात्राण्येवास्माकम् यं
तु जोषं जोषमालोक्याऽपि काव्यानि, समासाद्याऽपि च तोषम् सरोष
मुज्जृम्भिताभिर्जाठरज्वालाभिरेव तं जारयन्ति; जारयन्ति
ग्राव्णोऽपि लौहमपि विषमपि दाधीचास्थीन्यपि चेति विलक्षण
कुक्षयस्ते न कस्य नमस्याः?

अम्बिकादत्तव्यास

परिडत अम्बिकादत्त व्यास

विहारभूषण, भारतभूषण, भारतरत्न, भारतभास्कर, घटिकाशतक, शतावधान, धर्माचार्य, महामहोपदेशक, सुकवि, साहित्याचार्य ।

॥ श्रीः ॥

महाकविश्रीमदम्बिकादत्तव्यासविरचितः

शिवराजविजयः

(ऐतिहासिक उपन्यासः)

प्रथमो विरामः

"विष्णोर्माया भगवती यया सम्मोहितं जगत्" (भागवतम् १०।१।२५)
"हिंस्रः स्वपापेन विहिंसितः खलः साधुः समत्वेन भयाद् विमुच्यते"
(भागवतम् १०।७।३१)

शिवराज-विजय-वैजयन्ती

॥ वागीश्वर्यै नमः ॥

शिवाङ्के खेलन्तीं शिवशिरसि गङ्गालहरिकां
समुद्यद्गम्भीरध्वनिभरसमुद्दीपितमदाम् ।
निरीक्ष्योत्का वामा सरलहृदयाऽऽघूर्णितवती
यमासेव्यं देवं तमिह कलये चित्तनिलये ॥

शिवराज-विजय का हिन्दी अनुवाद

निःशेषाम्नायविज्ञान् निखिलमतिमतां माननीयान् नमस्यान्,
श्रीगोपीनाथपादान् गिरिधरचरणांस्तांश्चतुर्वेदिनश्च ।
सश्रद्धं नौमि भक्त्याहमिह गुरुवरान् संनमत्कन्धरेण,
येषामेव प्रसादं सुविदितविदुषां देवताऽन्वेति वाचाम् ॥ १ ॥
गहनदर्शनशास्त्रमहोदधौ चिरनिमज्जनकौतुककारिणी ।
सरससंस्कृतकाव्यसुधाम्बुधिं समवगाहतु मेऽद्य सरस्वती ॥ २ ॥
शिवराजजयं नाम गद्यकाव्यमनूद्यते ।
केदारनाथमिश्रेण छात्रेभ्यो राष्ट्रभाषया ॥ ३ ॥

अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः। ए

तत्रभवान् कविकुलचूडामणिः सिद्धसरस्वतीकोऽम्बिकादत्तव्यासो वी रसप्रधानं गद्यकाव्यं चिकीर्षुर्महनीययशसो भारतभागधेयस्य दुर्दान्तोर जिह्वजिह्वोत्पाटनकुशलस्य शिववीरस्य चरितचयनेनैव भारती कृतार्थयितव्ये विहितमनोरथ उपक्षिपति वेदव्यासोक्ति श्रीमद्भागवतादुद्धृताम्—विष्णो र्मयेति। वेवेष्टि व्याप्नोति चराचरात्मकं प्रपञ्चमिति विष्णुर्ब्रह्म, तस्य माया: सत्त्वप्रधानः शक्तिविशेषः। सा चैषा भगवती = समग्रषड्गुणसम्पन्ना।

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा॥

इति प्रसिद्धो भगपदार्थः, तद्वत्त्वं च भगवत्त्वम्। यया=मायया। गच्छती जगत् स्थावरस्याप्युपलक्षणम्। सम्मोहितम् = सम्यग्रूपेण मोहितम्।

हिंस्रः = घातुकः। खलः = दुष्टः। स्वस्यैव पापेन विहिंसितो भवति न तु तत्र निमित्तान्तरापेक्षा। साध्नोति परकार्यमिति साधुः। तथाभूतश समत्वेन = विवेचकत्वेन। भयाद् विमुच्यते = अपगतभयो भवति। तत्रा तस्य समत्वमेव हेतुर्न बीजान्तरापेक्षा। तदुक्तम् "न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः" इति। एतेनाऽऽद्यनिश्वासे पापिनामशोभनाः साधू नां च शोभना आचाराः प्रदर्शिता भवेयुरित्युपक्षिप्तम्। सर्वं चेदं सर्वतन्त्र स्वतन्त्रस्य भगवतो मायया त्रिगुणात्मिकया निवद्धैरेव समास्थीयत इति, काच हिन्दुकन्या केनचन दुष्टेन हृता रक्षिता च सा साधुना, दुष्टनाशश्च स्वपापेनै संवृत्त इति कथाभागश्च। विष्णुनामग्रहणेन मङ्गलमपि शिष्टाचारानुमितश्रुति बोधितेतिकर्त्तव्यताकं सूचितम्।

कथाभागं प्रारभमाणो भगवदादित्यप्रकाशात्मवस्तुनिर्देशरूपमपि मङ्ग समाचरति—अरुण एष इति। पूर्वस्यामिति—"दिशि" इति विशेष्यम्

भगवान् विष्णु की माया, जिसने सम्पूर्ण जगत् को मोह में डाल रख है, सकल ऐश्वर्यशालिनी है। (भागवत १०।१।२५)

दुष्ट हिंसक अपने पाप से ही मारा गया और सज्जन अपनी समत्वबुद्धि के कारण भय से वच गया। (भागवत १०।७।३१)

"पूर्व दिशा में भगवान् सूर्यदेव की यह लालिमा है। यह भगवा

भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचर-चक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोक-विमोकः कोक-लोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य। अयमेव अहोरात्रं जनयति,

मरीचीनां मालाऽस्यास्तीति मरीचिमाली—तस्य, सूर्यस्य। बहुव्रीहीतरसमासोपलक्षककर्मधारयपदघटितमपि "न कर्मधारयान्मत्वर्थीयो बहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकर" इति वचनं न सार्वत्रिकम्, 'असुव्वत्' इति भाष्यप्रयोगादिति ध्येयम्। अरुणः = ईषल्लोहितः "ज्योतिषां रविरंशुमान्" इति भगवद्विभूतिसमूहपातित्वेन भगवत्त्वं सर्वथा स्फुटम्। अथाऽऽदित्यं विशिनष्टि-एष भगवानिति। "दिनस्य" त्यन्तं मालारूपकालङ्कारो वैदर्भी रीतिः प्रसादाख्यश्च गुणः। मणिः = रत्नम्। यथा हीरकादिरन्धकारं वारयति प्रकाशयति च पदार्थसार्थं तथाऽयमपि बाह्याभ्यन्तरतमोऽपवार्य प्रकाशयति सकलानर्थानिति मणित्वेन रूपणम्। खे नभसि चरन्ति गच्छन्तीति खेचराः= भगणाः, तेषां चक्रस्य = समूहस्य, चक्रवर्ती = सम्राट्। सैन्यं प्रवर्त्तयति सम्राट्, दिनाधिपोऽपि सर्वं ग्रहगणमिति रूपणम्। आखण्डलदिशः = इन्द्रसम्बन्धिन्याः प्राच्या नायिकायमानायाः। कुण्डलम् = कर्णाभरणविशेषः। वर्त्तुलत्वमारोपबीजम्। ब्रह्माण्डमेव भाण्डम् = सदनम्, तस्य दीपकः। प्रकाशकत्वमत्राऽऽरोपहेतुः। पुण्डरीकाणाम् = कमलानाम्, "पुण्डरीकं सिताम्भोजम्" इति विशेषग्रहणं तु नात्र, श्वेतत्वस्याविवक्षितत्वात्, पटलस्य=समूहस्य। प्रेयान् = अतिशयेन प्रियः। कोकानाम् = चक्रवाकाणाम्, लोकस्य = समुदायस्य। शोकस्य विमोकः = मोक्षः। रूपकम्। कोकमिथुनानां रात्रिविरहः कविसमयख्यातः। अत्र बहुव्रीहिप्रदर्शनं टीकाकृतामनपेक्षितमसाम्प्रदायिकं च, बहुव्रीहिसञ्ज्ञाह्याभिधेयस्य समारोपणादेवोपपत्तेः। रोलम्बानाम् = भ्रमराणाम्, कदम्बस्य = समूहस्य। अवलम्बः = आश्रयः। सर्वश्चासौ व्यवहारः = ऐहिकामुष्मिकलक्षणो व्यापारः, तस्य, सूत्रधारः = प्रवर्त्तयिता। दिनस्य, इनः = स्वामी।

सूर्यदेव आकाशमण्डल के रत्न, नक्षत्रसमूह के सम्राट्, इन्द्र की दिशा (पूर्व) रूपी नायिका के कुण्डल, ब्रह्माण्डरूपी गृह के दीपक, कमलकुल के प्रेमपात्र, चक्रवाकों का शोक दूर करने वाले, भ्रमरसमूह के आश्रय, समस्त व्यवहार के

अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णा-मृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एनेनैव सम्पादिता युगभेदाः, एनेनैव कृताः कल्पभेदाः, एनमेवाऽऽश्रित्य भवति परमेष्ठिनः परार्द्धसङ्ख्या, असावेव चर्कर्ति वर्भर्ति जर्हर्ति च जगत्, वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मण

"इनः सूर्ये प्रभौ" इत्यमरः। इनपदस्य स्वामिसूर्योभयवाचित्वेऽप्यत्राद्यपर्यायत्व मेवेति ध्येयम्। अथ स्वभावोक्त्याऽलङ्करोति तमेव भगवन्तम्-अयमेवेति - अहश्च रात्रिश्चाहोरात्रस्तम्। शशधरेऽपि किरणानुप्रवेशद्वारा विकाशकत्वमेत दीयमेवेति भवति द्वितयजनकत्वमेवकारसार्थक्यं चेति विवेचनापटवः। द्वादश भागेषु=मेषादिमासरूपेषु। विभनक्ति=विभजते। भवति चात्र मान शासनम् 'अहोरात्रे विभजते सूर्यो मानुषदैविके' इति। षण्णामृतूनाम्=वसन्त ग्रीष्मवर्षाशरद्धेमन्तशिशिराणाम्। कारणम्=हेतुः। अयनम्=सूर्यमार्गः युगानाम्=कृतत्रेताद्वापरकलीनाम्। भेदाः=विभागाः। एनेनैव सूर्येणैव अन्वादेशत्वादेनादेशः। कल्पभेदाः, षष्ठीतत्पुरुषः। कल्पश्चैकसहस्रमहायुगात्मक ख्यातः कालविदाम्। परमेष्ठिनः=विधातुः। परार्द्धसङ्ख्या=अन्तिम परार्धनाम्ना ख्याता सङ्ख्या। चर्कर्ति=पुनः पुनः करोति। यङ्लुगन्तम्। यङ् लुकश्छान्दसत्वं तु न वैयाकरणसम्प्रदायसिद्धं न वा महाकविजनानुमोदितमिति भूयं भूयः प्रयोगान् प्रदर्शयति। यङ्लुगन्तत्रितयेनोत्पत्ति-स्थिति-लयकर्तृत्वं निवेदितम् वन्दिनः=स्तुतिपाठकाः। वेदाः=ऋग्यजुःसामाथर्वाभिधाः। एतेन सूर्ये ब्रह्म दृष्टिरिति सूचितम्। "अन्तस्तद्धर्मोपदेशात्" इत्यधिकरणे हि निर्णीतमादित्योपाधि ब्रह्मस्तूयमानत्वम्। अत एव "गायत्र्यमुमेव गायती"त्येवकारसहितं वाक्यं स्वरसत सङ्गच्छते। गायत्र्याश्च मुख्यं वाच्यं ब्रह्मैवेति वृहदारण्यकादिषु सुनिरूपितम् "गायन्तं त्रायत" इति तद्व्युत्पत्तिरप्यत एवोपपद्यते। ब्रह्मणि निष्ठा येषां ते

प्रवर्तक और दिन के स्वामी हैं। ये ही दिन और रात के जनक हैं, ये ही व को बारह भागों में विभाजित करते हैं, ये ही छः ऋतुओं के कारण हैं औ ये ही उत्तरायण तथा दक्षिणायन (उत्तर और दक्षिण मार्ग) का अवलम्ब करते हैं, इन्होंने ही सत्य, त्रेता, द्वापर और कलियुग का भेद किया है, इन्होंने ह कल्पों का विभाग किया है, इनका आधार लेकर ही ब्रह्मा की परार्द्ध (सब बड़ी और अन्तिम) संख्या पूरी होती है और ये ही बार-बार जगत् की सृष्टि पालन और संहार करते हैं। वेद इन्हीं की वन्दना करते हैं। गायत्री इन्हें

अमुमेवाहरहरुपतिष्ठन्ते। धन्य एष कुलमूलं श्रीरामचन्द्रस्य, प्रणम्य एष विश्वेषामि"ति उदेष्यन्तं भास्वन्तं प्रणमन् निजपर्णकुटीरात् निश्चक्राम कश्चित् गुरुसेवनपटुर्विप्रवटुः।

"अहो! चिररात्राय सुप्तोऽहम्, स्वप्नजालपरतन्त्रेणैव महान् पुण्यमयः समयोऽतिवाहितः, सन्ध्योपासन-समयोऽयमस्मद्गुरुचरणानाम्, तत् सपदि अवचिनोमि कुसुमानि" इति चिन्तयन्

वेदपारगा इत्यर्थः। उपतिष्ठन्ते = उपासते। "उपाद् देवपूजा-सङ्गतिकरण-मित्रकरण-पथिष्वि"त्यात्मनेपदम्। भास्वन्तम् = सूर्यम्। "भास्वद्विवस्वत्सप्ताश्वहरिदश्वोष्णरश्मयः" इत्यमरः। भास्वत्त्वं प्रणतिहेतुः। प्रणामो हि स्वापकृष्टत्वबोधनम्, तच्च प्रणम्ये गुणेषु सत्स्वेवेति न तिरोहितम्। ह्रस्वा कुटी कुटीरः। "कुटीशमीशुण्डाभ्यो रः"। गुरुसेवने पटुः = कुशलः। विप्रश्चासौ विप्रस्य वा वटुर्विप्रवटुः = ब्राह्मणब्रह्मचारी।

अहो = साश्चर्यखेदे नैत्यिककर्मानुष्ठानकाललोपोत्थे।

"नोपतिष्ठति यः पूर्वां नोपास्ते यश्च पश्चिमाम्।
स शूद्रवद् बहिष्कार्यः सर्वस्माद् द्विजकर्मणः॥"

इत्यादिभिः सन्ध्यावन्दनादिनित्यकर्माननुष्ठाने प्रत्यवाय-स्मरणेन शयनादिना तत्कालातिवाहने स्वाभाविको हि क्षोभः सताम्। चिररात्राय = चिरम्। "चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः" इत्यमरः। स्वप्नः = निद्रा, स एव जालम् = आनायः, तत्परतन्त्रेण = तदायत्तेन। पुण्यमयः, "ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेदि"ति मनूक्त्या। सपदि = सत्वरम्। अवचि-

---

का गान करती हैं और ब्रह्मनिष्ठ ब्राह्मण प्रतिदिन इन्हीं की उपासना करते हैं। भगवान् रामचन्द्र के कुल के मूल ये सूर्यदेव धन्य हैं। ये भगवान् सूर्य सभी के प्रणम्य हैं", यह विचार कर, उदय होते हुए सूर्य को प्रणाम करता हुआ, कोई गुरुसेवा में कुशल ब्राह्मण बालक अपनी पर्णकुटी से बाहर निकला।

"ओह, मैं बहुत देर तक सोता रहा, निद्रारूपी जाल में फँसकर मैंने बड़ा पुण्यमय समय गवाँ दिया, यह हमारे गुरुजी की सन्ध्योपासना का समय है।

कदलीदलमेकमाकुञ्च्य, तृणशकलैः सन्धाय, पुटकं विधाय पुष्पावचयं कर्त्तुमारेभे।

वटुरसौ आकृत्या सुन्दरः, वर्णेन गौरः जटाभिर्ब्रह्मचारी, वयस षोडशवर्षदेशीयः, कम्बुकण्ठः, आयतललाटः, सुबाहुर्विशाललोचन श्चाऽऽसीत्।

कदलीदलकुञ्जायितस्य एतत्कुटीरस्य समन्तात् पुष्पवाटिका पूर्वतः परम-पवित्र-पानीयं परस्सहस्र-पुण्डरीक-पटल-परिलसितं पत

नोमि = सङ्कल्पयामि। कदली = रम्भा, तस्या दलम् = पत्रम्। आकुञ्च्य = भुग्नं विधाय। तृणानां शकलैः = खण्डैः। सन्धाय = संमेल्य। पुटमे पुटकम् = समुद्गः। "दोना" इति हिन्दी। पुष्पाणाम्, अवचयः = सङ्ग्र लवनं वा, तम्।

आकृत्या = आकारेण। "प्रकृत्यादिभ्य उपसङ्ख्यानम्" इति तृतीया वर्णेनेत्यत्रापि। जटाभिः = सटाभिः। "इत्थंभूतलक्षणे" इति तृतीया जटाज्ञाप्यब्रह्मचारित्वसंवलित इत्यर्थः। षोडशवर्षदेशीयः = ईषदसमाप्त षोडशवर्षः। "ईषदसमाप्तौ कल्पब्देश्यदेशीयरः" कम्बुरिव कण्ठो यस स शङ्खग्रीव इत्यर्थः।

कुञ्ज इव = लतादिपिहितोदर इव, आचारीदित्यकुञ्जायिष्ट। "क क्यङ् सलोपश्चे"ति क्यङन्तात् क्ते कुञ्जायितम्। कदलीदलैः कुञ्जायितस्यो समासः। लुप्तोपमालङ्कारः। समन्तात् = परितः। पूर्वतः = पूर्वस्याम् "तसिलादिष्वाकृत्वसुचः" इति पुंवत्त्वम्। परस्सहस्राणाम् = सहस्राधिक

इसलिये तुरन्त फूल तोड़ लाऊँ", यह सोचता हुआ वह, केले के एक पत्ते क मोड़ कर, तिनकों से जोड़ कर, दोना बना कर, फूल चुनने लगा।

उस बालक की आकृति सुन्दर थी और रंग गोरा था। जटाओं से व ब्रह्मचारी प्रतीत होता था और अवस्था लगभग सोलह वर्ष की थी। उसक कण्ठ शङ्ख सा और ललाट विस्तीर्ण था, भुजाएँ प्रशस्त और आँखें बड़ी-बड़ी थीं

चारों ओर से केले के वृक्षों से घिरी होने के कारण कुञ्ज के समा लगने वाली इस पर्णकुटी के चारों ओर पुष्पवाटिका थी। पूर्व की ओर, परम

कुल-कूजित-पूजितं पयःपूरितं सर आसीत्। दक्षिणतश्चैको निर्झर-झर्झर-ध्वनि-ध्वनित-दिगन्तरः फल-पटलाऽऽस्वाद-चपलित-चञ्चु-पतङ्गकुलाऽऽक्रमणाधिक-विनत-शाख-शाखि-समूह-व्याप्तः सुन्दर-कन्दरः पर्वतखण्ड आसीत्।

नाम्, पुण्डरीकाणाम्=सिताम्भोजानाम्, पटलेन=समूहेन, परितः=सर्वतः, लसितम्=शोभितम्। पतत्रिणाम्=पक्षिणाम्, कुलस्य=गणस्य, कूजितेन=शब्देन, पूजितम्=विराजितम्। पयसां पूरेण=प्रवाहेण, पूरितम्=भरितम्। विशेषणानीमानि चत्वारि सरसो विशेष्यभूतस्य। दक्षिणतः=दक्षिणस्यां दिशि। पर्वतखण्ड आसीदित्यन्वयः। पर्वतखण्डः=प्रत्यन्तपर्वतः "टेकरी" इति हिन्दी। विशिनष्टि विशेषणत्रयेण–निर्झरस्य=प्रवाहस्य, "वारिप्रवाहो निर्झरो झरः" इत्यमरः, झर्झरध्वनिना ध्वनितम्=नादितम्, दिगन्तरम्=दिक्प्रान्तभागो यस्य सः। झर्झर इति जलशब्दानुकृतिः। फलानां पटलस्य=समूहस्य, आस्वादेन=भक्षणेन, चपलिताः=चञ्चलाः, चञ्चवः=त्रोटयः, "चञ्चुस्त्रोटिरुभे स्त्रियौ" इत्यमरः, येषां ते च ते पतङ्गाः=पक्षिणः, "पतङ्गौ पक्षिसूर्यौ च" इत्यमरः, तेषां कुलम्=समूहः, तस्याक्रमणेन, अधिकम्=अत्यन्तम्, विनताः=नम्रीभूताः, शाखाः=शिखाः, "शिखा शाखा शिफा लता" इत्यमरः, येषां ते च ते शाखिनः=वृक्षाः, "वृक्षो महीरुहः शाखी विटपी पादपस्तरुरि"त्यमरः, तेषां समूहेन व्याप्तः=आवृतः। सुन्दराः=शोभनाः, कन्दराः=गुहाः, यस्य सः। "दरी तु कन्दरो वा स्त्री"त्यमरः। अत्रानुप्रासः शब्दालङ्कारो गौडी च रीतिः।

पवित्र जल वाला, सहस्रों श्वेतकमलों से पूर्ण, पक्षियों के कलरव से सुशोभित और पानी से लबालब भरा एक तालाब था। दक्षिण की ओर झरने की झर-झर ध्वनि से दिशाओं को मुखरित करनेवाली, फल खाने से चञ्चल हो गई चोंच वाले पक्षियों के फुदक फुदक कर बैठने से और भी अधिक झुक जाने वाली शाखाओं वाले पेड़ों से व्याप्त तथा सुन्दर गुफाओं वाली एक पहाड़ी (या टेकरी) थी।

(यावदेष ब्रह्मचारी वटुरलिपुञ्जमुद्धूय कुसुमकोरकानवचिनोति; तावत् तस्यैव सतीर्थ्योऽपरस्तत्समानवयाः कस्तूरिका-रेणु-रूषित इव श्यामः, चन्दन-चर्चित-भालः, कर्पूरागुरु-क्षोद-च्छुरित-वक्षो-बाहु-दण्डः, सुगन्ध-पटलैरुन्निद्रयन्निव निद्रा-मन्थराणि कोरक-निकुरम्बकान्तराल-सुप्तानि मिलिन्द-वृन्दानि झटिति समुपसृत्य निवारयन् गौरवटुमेवमवादीत्—)

ब्रह्म=वेदः, तदध्ययनार्थं व्रतमपि ब्रह्म, तच्चरतीति ब्रह्मचारी। "ब्रह्मचर्यमहिंसा चे"त्यादौ तु यमभेदविशेषस्य मैथुनत्यागस्यैव ब्रह्मचर्यपदवाच्यता अलीनाम्=भ्रमराणाम्, पुञ्जः=राशिः, "स्यान्निकायः पुञ्जराशी" इत्यमरः, तम्, अवधूय=निवार्य। कुसुमानां कोरकाः=कलिकाः, "कलिका कोरकः पुमानि"त्यमरः, तान्। अवचिनोति=सङ्कलयति। सतीर्थ्यः=सहाध्यायी। "समानतीर्थे वासी"ति यत्प्रत्यये "तीर्थे य" इति सादेशः "सतीर्थ्यास्त्वेकगुरवः" इत्यमरः। तेन समानं वयः=अवस्था, यस्य सः "सतीर्थ्यं विशिनष्टि चतुर्भिर्विशेषणैः। श्याम इत्याद्यं विशेषणम्। स्वभावत कृष्णवर्णं तमुत्प्रेक्षते—कस्तूरिकायाः=मृगनाभेः, रेणुभिः=रजोभिः, रूषित इव=छुरित इव। चन्दनेन=गन्धसारेण, चर्चितम्=लिप्तम्, भालम्=ललाटम्, यस्य सः। कर्पूरस्य=घनसारस्य, अगुरोः=नृपार्हस्य. ("अगर" इति हिन्दी,) च क्षोदेन=चूर्णेन, छुरितम्=व्याप्तम्, वक्षोबाहुदण्डम्=उरःस्थल भुजद्वयम्, यस्य सः। सुगन्धपटलैः=सौरभसमूहैः, निद्रया मन्थराणि=अलसानि। कोरकाणाम्=कलिकानाम्, निकुरम्बकाणि=वृन्दानि, "निकुरम्ब कदम्बकम्" इत्यमरः। तेषाम्, अन्तराले=अभ्यन्तरे, सुप्तानि=शयानानि मिलिन्दानाम्=भ्रमराणाम्, वृन्दानि=समूहान्। उन्निद्रयन्निव=जागरयन्निव। अन्वयमनुसृत्यात्र व्याख्यातम्। सुगन्धलोलुपा द्विरेफाः श्यामवटुशरीरा

ज्यों ही वह ब्रह्मचारी बालक भौंरों को उड़ाकर, फूल की कलियाँ तोड़ने लगा, उसका सहपाठी और समवयस्क दूसरा ब्रह्मचारी जो कस्तूरी की बुकनी से सना हुआ सा साँवले रंग का था, मस्तक पर चन्दन लगाये था, और वक्षःस्थल तथा बाहुओं पर कपूर और अगर की बुकनी रमाये था—नींद से अलसाये और कलियों के अन्दर सोये हुए भौंरों को सुगन्ध की गमक से जगाते

"अलं भो अलम् ! मयैव पूर्वमवचितानि कुसुमानि, त्वं तु चिरं रात्रावजागरीरिति क्षिप्रं नोत्थापितः, गुरुचरणा अत्र तडागतटे सन्ध्यामुपासते, संस्थापिता मया निखिला सामग्री तेषां समीपे। यां च सप्तवर्षकल्पाम्, यावनत्रासेन निःशब्दं रुदतीम्, परम-सुन्दरीम्, कलित-मानव-देहामिव सरस्वतीं सान्त्वयन् मरन्द-मधुरा अपः पाययन्, कन्दखण्डानि भोजयन्, त्वं त्रियामाया याम-

---

लिप्तचन्दन-घनसार-कस्तूरिका-परिमलमाघ्राय पुष्पेभ्य उड्डीय तच्छरीरनिपत-नोत्सुकाः सञ्जाता इति स्वाभाविकवार्तया जागरणमुखेनात्रोत्प्रेक्षणम्।

अलं भो अलम्, पुष्पावचयं निषेधति। इतः परं कांश्चित् स्थलविशेषा-नपहाय वृत्तकं नाम गद्यम्। "अकठोराक्षरं स्वल्पसमासं वृत्तकं मतम्" इति तल्ल-क्षणात्। एतदेव "अनाविद्धपदं चूर्णम्" इति वामनसूत्रे चूर्णकनाम्नाऽभिहितम्। अजागरीः, "जागृ"धातोर्लुङि सिपि रूपम्। सप्तवर्षकल्पाम्=असमाप्त-सप्तवर्षाम्। यवनेभ्य आगतो यवनानां वाऽयं यावनः, स चासौ त्रासस्तेन। यवनजवनशब्दौ संस्कृतसाहित्ये समायातौ। आद्यो वसिष्ठविश्वामित्रसङ्ग्रामे धेनुस्तनसमुत्पन्नेषु रूढः, परश्च सगरसङ्ग्रामे वशिष्ठपरित्याजितार्यधर्मेषु सागर-पारस्थक्षत्रियेष्विति त्यक्तमहामहोपाध्यायपदवीकाः शक्तिसम्प्रदायाचार्याः श्रीपञ्चाननतर्करत्नभट्टाचार्याः। तन्मतानुसरणे भारतसमागतेष्वेषु जवन-शब्दप्रयोग एवोचित इति भाति। कलितः=धारितः मानवो देहः, यया सा, ताम्, मानवरूपेणावतीर्णा सरस्वतीमिवेत्युत्प्रेक्षा। मरन्देन=पुष्परसेन, मधुराः=

हुआ सा, झटपट समीप आकर, उस गोरे बालक को मना करता हुआ बोला—

"बस भाई बस ! फूल मैंने पहले ही तोड रखे हैं। तुम रात में देर तक जागते रहे थे इसीलिये तुम्हें जल्दी नहीं जगाया। गुरु जी यहाँ तालाब के किनारे सन्ध्योपासना कर रहे हैं। मैंने सारी सामग्री उनके पास पहुँचा दी है। जिस, लगभग ७ वर्ष की अवस्था वाली, यवनों के भय से सिसकियाँ भर-भर कर रोने वाली परम सुन्दरी, मानवशरीर धारण करके आई हुई सरस्वती के

त्रयमनैषीः; सेयमधुना स्वपिति, उद्बुद्ध्य च पुनस्तथैव रोदिष्यति, तत् परिमार्गणीयान्येतस्याः पितरौ गृहं च—"।

इति संश्रुत्य उष्णं निःश्वस्य यावत् सोऽपि किञ्चिद् वक्तुमियेष तावदकस्मात् पर्वतशिखरे निपपात उभयोर्दृष्टिः।

तस्मिन् पर्वते आसीदेको महान् कन्दरः। तस्मिन्नेव महामुनिरेकः समाधौ तिष्ठति स्म। कदा स समाधिमङ्गीकृतवानिति कोऽपि न वेत्ति। ग्रामणी-ग्रामीण-ग्रामाः समागत्य मध्ये मध्ये तं पूज-

---

मिष्टाः, अपां विशेषणम् "अयि दलदरविन्द! स्यन्दमानं मरन्दम्, तव किमपि लिहन्तो मञ्जु गुञ्जन्तु भृङ्गाः" इति पण्डितराजपद्ये प्रयुक्तोऽयं मरन्दशब्दः। मरम्=भ्रमरमरणम्, द्यति=खण्डयतीति मरन्दः भ्रमरजीवनम्, मकरन्द इति व्युत्पत्तिलभ्यत्वमर्थस्य। पाययन्, णिजन्ताच्छतरि। कन्दाः=ऋषीणां खाद्यविशेषाः। "शालूकं कन्दमौत्पलम्" "कन्दमस्त्री, मूलसस्यम्" इति च वैजयन्ती। त्रियामायाः=रात्रेः। "रात्रिस्त्रियामा क्षणदा क्षपे"त्यमरेण रूढत्वम्। अत एव यामत्रयमिति प्रहरत्रयार्थकं सङ्गच्छते। परिमार्गणीयानि=अन्वेषणीयानि। नपुंसकमनपुंसकेनेत्येकशेषः।

वक्तुमियेष=कथयितुमिच्छति स्म।

समाधौ=चित्तवृत्तिनिरोधात्मके योगे। ग्रामण्यः=ग्रामाधिपाः 'लम्बरदार, जमीन्दार', इति हिन्दी, ते च ते, ग्रामे भवा ग्रामीणाः=ग्रामवासिनः

समान, कन्या को, ढाढस बँधाते, मरन्द-मधुर जल पिलाते और कन्दों के टुकड़े खिलाते हुए, तुमने रात के तीन पहर बिता दिये थे, वह इस समय सो रही है, जागने पर फिर वैसे ही रोयेगी, इसलिये उसके माता-पिता और घर का पता लगाना चाहिये।"

यह सुन कर गरम साँस लेकर, ज्यों ही उसने भी कुछ कहना चाहा, त्यों ही अचानक उन दोनों की निगाह पहाड़ी की चोटी पर पड़ी।

उस पर्वत में एक बहुत बड़ी गुफा थी। उसमें एक महामुनि समाधि लगाये थे। उन्होंने समाधि कब लगाई थी इसका पता किसी को न था। कभी-कभी

यन्ति प्रणमन्ति स्तुवन्ति च । तं केचित् कपिल इति, अपरे लोमश इति, इतरे जैगीषव्य इति, अन्ये च मार्कण्डेय इति विश्वसन्ति स्म । स एवायमधुना शिखरादवतरन् ब्रह्मचारि-वटुभ्यामदर्शि ।

"अहो ! प्रबुद्धो मुनिः ! प्रबुद्धो मुनिः ! इत एवाऽऽगच्छति, इत एवाऽऽगच्छति, सत्कार्योऽयम् सत्कार्योऽयम्" इति तौ सम्भ्रान्तौ क्षुभितौ बभूवतुः ।

अथ समापित-सन्ध्यावन्दनादिक्रिये समायाते गुरौ, तदाज्ञया

तेषां ग्रामाः=समूहाः श्रुत्यनुप्रास-प्रदर्शनमात्रफलकोऽयम् । सरसे रौद्रादि-रसाभाववति प्रकृते दोषत्वमेतस्येति केचित् । तम्=समाधिनिरतम् । कपिल-लोमशजैगीषव्यमार्कण्डेयाश्चिरञ्जीविनो महर्षयः । "नारद इत्यबोधि सः" इत्यादिवदितिना निपातेनाभिहितत्वान्न तेषां द्वितीयान्तता विश्वसन्तिक्रिया-कर्मत्वेऽपीति बोध्यम् । ग्रहीतृभेदादेकस्यैवानेकधोल्लेखालङ्कारः । अदर्शि= दृष्टः । कर्मणि लुङि रूपम् ।

सत्कार्यः=आदरणीयः । सम्भ्रान्तौ=क्षुभितौ । बहोः कालात् कन्दरायां निवसन् मुनिरकस्माद् बहिरायात इति हर्षोद्रेकेण व्याकुलौ बभूवतुः । अत एव च तदुक्तिषु साम्रेडता ।

समापिता सन्ध्यावन्दनादिक्रिया येन सः, तथाभूते । आदिना स्वेष्ट-

ग्राम-प्रधान और ग्रामीण उनका पूजन, वन्दन और स्तवन कर आते थे । उन्हें कोई कपिल, कोई लोमश, कोई जैगीषव्य और कोई मार्कण्डेय समझता था । दोनों ब्रह्मचारियों ने, इस समय, उन्हीं को शिखर से उतरते देखा ।

"अहा ! मुनि जग गये ! मुनि जग गये ! इसी ओर आ रहे हैं, इसी ओर आ रहे हैं, इनका सत्कार करना चाहिये, इनका सत्कार करना चाहिये" यह कहते हुए वे दोनों शीघ्रता करने लगे ।

तदनन्तर, सन्ध्यावन्दन आदि कृत्य समाप्त कर के गुरु के आ जाने और उनकी आज्ञा से गौर ब्रह्मचारी के, सन्ध्यावन्दन आदि नित्यकर्म

नित्यनियम-सम्पादनाय प्रयाते गौरबटौ, छात्रगण-सहकारेण प्रस्तु
तासु च स्वागत-सामग्रीषु, "इत आगम्यतां सनाथ्यतामे
आश्रमः" इति सप्रणाममभिगम्य वदत्सु निखिलेषु, योगिराज आगत
तन्निर्दिष्ट-काष्ठ-पीठं भास्वानिवोदयगिरिमारुरोह, उपाविशच्च ।

तस्मिन् पूज्यमाने, "योगिराडुत्थित" इति, "आयात" इति
आकर्ण्य कर्णपरम्परया बहवो जनाः परितः स्थिताः । सुघटि
शरीरम्, सान्द्रां जटाम्, विशालान्यङ्गानि, अङ्गारप्रतिमे नय
मधुरां गम्भीरां च वाचं वर्णयन्तश्चकिता इव सञ्जाताः ।

देवतापूजन-स्वेष्टगुरुमन्त्रजपादिः । नित्या ये नियमाः = सन्ध्यावन्दनादयः, ते
सम्पादनाय । छात्रगणस्य, सहकारेण = साहाय्येन । स्वागत-सामग्रीषु
उपचारद्रव्येषु । "यस्य च भावेन भावलक्षणमि"ति भावाधिकरणे सप्तमी
प्रस्तुतासु = सन्नद्धासु । सनाथ्यताम् = समलङ्क्रियताम् । निखिलेषु = स
पस्थितेषु सर्वेषु । जनेष्विति शेषः । काष्ठपीठम् = दारुनिर्मितां चतुष्पादिकाम
"चौकी" इति हिन्दी । उदयगिरिमिव = उदयाचलमिव । आरुरोह = अ
शिश्रिये । उपाविशत् = आसितवान् । न सूर्य इवाधिश्रित्य दूरं गतोऽपि
तत्रैव स्थित इति क्रियाद्वयमुपात्तम् । उपमालङ्कारः ।

सुघटितम् = यथावस्थित-शोभनाङ्ग-संस्थानम् । सान्द्राम् = घनाम्
अङ्गारप्रतिमे = अङ्गारसदृशे, प्रतिमाशब्दोऽत्रोपमावाचकः, दृष्टश्च तादृशे
"न तस्य प्रतिमा अस्ति" इति वेदे, "गतः सुखान्यप्रतिमानि हित्वे"

करने के लिये, चले जाने पर, छात्रों के सहयोग से स्वागत सामग्री
प्रस्तुत हो जाने, और प्रणामपूर्वक सभी उपस्थित लोगों के "इधर पधारि
इस आश्रम को सनाथ कीजिये" यह कहने पर, योगिराज आकर, उन
द्वारा निर्दिष्ट चौकी पर, उदयाचल पर सूर्य की भाँति चढ़कर बैठ गये ।

उनकी पूजा हो ही रही थी कि 'योगिराज समाधि से जग गये हैं औ
यहाँ आये हैं' यह समाचार एक दूसरे से सुनकर चारों ओर लोगों की भी
लग गई । उनके सुघटित शरीर, घनी जटाओं, विशाल अंगों, अंगारों

अथ योगिराजं सम्पूज्य यावदीहितं किमपि आलपितुम्, तावत् कुटीराद् अश्रूयत तस्या एव बालिकायाः सकरुण-रोदनम्।

ततः "किमिति ? कुत इति ? केयमिति ? कथमिति ?" पृच्छापरवशे योगिराजे ब्रह्मचारिगुरुणा बालिकां सान्त्वयितुं श्यामबटुमादिश्य कथितम्—

"भगवन् ! श्रूयतां यदि कुतूहलम्। ह्यः सम्पादित-सायन्तन-कृत्ये, अत्रैव कुशाऽऽस्तरणमधिष्ठिते मयि, परितः समासीनेषु छात्र-वर्गेषु, धीर-समीर-स्पर्शेन मन्दमन्दमान्दोल्यमानासु व्रततिषु,

---

वाल्मीकीये च। पृच्छा = प्रश्नः, तत्परवशे = तत्परतन्त्रे।

कुतूहलम् = कौतुकम्। वृत्तान्तज्ञानोत्कण्ठेति यावत्। ह्यः = गतदिवसे, सम्पादितम् = विहितम्, सायन्तनम् = सायम्भवम्, कृत्यम् = सन्ध्यादि येन तादृशे। कुशास्तरणम् = कुशासनम्। "कुश की चटाई" इति हिन्दी। 'अधिशीङ्' इति कर्मसंज्ञा। धीरः = मन्दगतिः, समीरः = वायुः, तस्य स्पर्शेन। आन्दोल्यमानासु = सञ्चाल्यमानासु। व्रततिषु = लतासु। 'वल्ली तु व्रतति-र्लता' इत्यमरः।

समान (लाल) नेत्रों और मधुर गम्भीर वाणी का बखान करते हुए लोग चकित और मन्त्रमुग्ध-से हो गये।

तदनन्तर, योगिराज का विधिवत् पूजन-सत्कार कर ज्यों ही ब्रह्मचारी के गुरु ने उनसे कुछ पूछना चाहा, त्यों ही कुटी से उस बालिका का करुण क्रन्दन सुन पड़ा। तब योगिराज के, "यह क्या ? कहाँ से आई है ? यह कौन है ? कैसे आई ?" यह पूछने पर ब्रह्मचारी के गुरु ने साँवले ब्रह्मचारी को बालिका को ढाढस बँधाने के लिये भेज कर, कहना प्रारम्भ किया—

"भगवन् ! यदि आपको इसका वृत्तान्त जानने की उत्कण्ठा है तो सुनिये। कल, सायंकालीन नित्यकर्म से निवृत्त होकर, मैं यहीं कुशासन पर बैठा हुआ था और मेरे चारों ओर छात्रगण बैठे थे, मन्द-मन्द वायु के झोंकों से

समुदिते यामिनी-कामिनी-चन्दनबिन्दौ इव इन्दौ, कौमुदी-कपटेन सुधाधारामिव वर्षति गगने, अस्मन्नीतिवार्तां शुश्रूषुषु इव मौनमाकलयत्सु पतंग-कुलेषु, कैरव-विकाश-हर्ष-प्रकाश-मुखरेषु चञ्चरीकेषु, अस्पष्टाक्षरम्, कम्पमान-निःश्वासम्, श्लथत्कण्ठम्, घर्घरितस्वनम्, चीत्कारमात्रम्, दीनतामयम्, अत्यवधानश्रव्यत्वादनुमितदविष्ठतं क्रन्दनमश्रौषम्। तत्क्षणमेव च "कुत इदम्? किमिदमिति दृश्यतां-

इन्दौ = चन्द्रमसि। समुदिते = उदयं प्राप्ते। चन्द्रमसं रूपयति—यामिनी = निशीथिनी, सैव कामिनी = ललना, तस्याः, चन्दनबिन्दौ = ललाट-तिलके इव। कौमुदी = चन्द्रिका, 'चन्द्रिका कौमुदी ज्योत्स्ने'त्यमरः, तस्याः कपटेन = व्याजेन। वर्षतीवेत्युत्प्रेक्षा। पतगकुलेषु = पक्षिसमूहेषु। मौनम् = निःशब्दताम्, आकलयत्सु = आश्रयत्सु। किमिति मौनावलम्बनमित्युत्प्रेक्षते—अस्मन्नीतीति। शुश्रूषुषु = श्रोतुमिच्छुषु। कैरवाणाम् = सिताम्भोजानाम्, यो विकाशः = प्रफुल्लनम्, तेन यो हर्षप्रकाशः = मोदाविर्भावः, तेन मुखरेषु = शब्दायमानेषु। चञ्चरीकेषु = द्विरेफेषु। "इन्दिन्दिरो मधुकरश्चञ्चरीको मधुव्रतः" इति वैजयन्ती। क्रन्दनम् = रोदनम्, अश्रौषम् = आकर्णिषम्।

लताएँ धीरे-धीरे हिल रही थीं, निशानायिका के चन्दनबिन्दु के समान चन्द्र-मण्डल उदित हो चुका था, आकाश चाँदनी के बहाने मानो अमृत वरसा रहा था, पक्षिगण—मानो हम लोगों की नीतिचर्चा सुनने की इच्छा से मौन धारण किये थे, और कुमुदों के खिल जाने से भौंरे हर्षातिरेक से गुनगुना रहे थे, कि मैंने किसी का अस्पष्ट अक्षरों और कम्पित निश्वासों वाला, रुँधे गले से निकलने वाला, घर्घरशब्दमय, चीत्कारमय और दीनतापूर्ण करुण क्रन्दन सुना। रोने की आवाज ध्यान देने पर ही सुनाई देती थी, जिससे उसके बहुत दूर होने का अनुमान होता था। मैंने उसी क्षण, "यह आर्तस्वर कहाँ से

ज्ञायताम्" इत्यादिश्य छात्रेषु विसृष्टेषु, क्षणानन्तरं छात्रेणैकेन भय-भीता सवेगमत्युष्णं दीर्घं निःश्वसती, मृगीव व्याघ्राऽऽघ्राता, अश्रु-प्रवाहैः स्नाता, सवेपथुः कन्यकैका अङ्के निधाय समानीता। चिरा-न्वेषणेनापि च तस्याः सहचरी सहचरो वा न प्राप्तः। तां च चन्द्र-कलयेव निर्मिताम्, नवनीतेनेव रचिताम्, मृणाल-गौरीम्, कुन्द-

---

सप्तभिर्विशेषणैः स्वभावोक्त्या क्रन्दनं विशिनष्टि—अस्पष्टानि अक्षराणि, यस्मिंस्तत्। कम्पमाना निःश्वासाः, यस्मिंस्तत्। श्लथन् = शिथिलः, कण्ठः, यस्मिंस्तत्। अत्यवधानेन = विशेषध्यानेन, श्रव्यम् = श्रवणार्हम्, तस्य भाव-स्तत्त्वं तस्मात्, हेतौ पञ्चमी। अतिशयेन दूरं दविष्ठम्, तस्य भावो दविष्ठता, अनुमिता = विज्ञाता, दविष्ठता = अतिदूरता यस्य तत्। आदिश्य=आज्ञाप्य। व्याघ्रेण = शार्दूलेन, आघ्राता = आक्रान्ता। उपमालङ्कारः। सवेपथुः = सकम्पा। एकेनाङ्के निधाय कन्यका समानीतेति स्थले क्रियापदद्वयम्। प्रधान-क्रियानिरूपितकर्मत्वाभिधानेऽप्रधानक्रियानिरूपितकर्मत्वमनभिहितमप्यभिहितवत् प्रकाशत इति महाभाष्ये ध्वनितम्—

"प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।
यदा गुणे तदा तद्वदनुक्ताऽपि प्रतीयते॥"

इत्यादिना वाक्यपदीये स्पष्टीकृतं च। नवनीतेनेव=हैयङ्गवीनेनेव। 'मक्खन' इति हिन्दी। मृणालमिव = कमलदण्ड इव, गौरीम् = श्वेताम्, लुप्तोपमा।

(सु)न आ रहा है ? क्या बात है ? देख कर पता लगाओ" यह आज्ञा देकर, छात्रों को भेजा और क्षण भर बाद ही एक छात्र, डरी हुई, जल्दी-जल्दी गरम और लम्बी साँसें ले रही, बाघ से सूँघी गई हरिणी के समान, आँसुओं से नहाई हुई और काँपती हुई एक बालिका को गोद में उठाकर लाया। काफी देर तक खोजने पर भी उसकी कोई सखी या उसका कोई साथी नहीं मिला। चन्द्रमा की कलाओं से रची गई सी, मक्खन से बनाई गई सी, कमल-

कोरकाग्रदतीम् सक्षोभं रुदतीमवलोक्याऽस्माभिरपि न पारि निरोद्धुं नयनवाष्पाणि।

अथ "कन्यके! मा भैंषीः, पुत्रि! त्वां मातुः समीपे प्रापयि ष्यामः, दुहितः! खेदं मा वह, भगवति! भुङ्क्ष्व किञ्चित्, पि पयः, एते तव भ्रातरः, यत् कथयिष्यसि तदेव करिष्यामः, मा स्म रोदनैः प्राणान् संशयपदवीमारोपयः, मा स्म कोमलमिदं शरी शोकज्वालावलीढं कार्षीः" इति सहस्रधा बोधनेन कथमपि सम्बुद्धा किञ्चिद् दुग्धं पीतवती। ततश्च मया क्रोडे उपवेश्य "बालिके! कथय क्व ते पितरौ? कथमेतस्मिन्नाश्रमप्रान्ते सम याता? किं ते कष्टम्? कथमरोदीः? किं वाञ्छसि? किं कुर्मः?

कुन्दकोरकाः=माध्वकलिकाः, तेषामग्राणीव दन्ता यस्याः सा ताम्। "अग्रान्त शुद्धशुभ्रवृषवराहेभ्यश्च" इति दत्रादेशे, उगिदन्तत्वाद् ङीप्। सक्षोभम् ससाध्वसम्।

मा भैषीः, "माङि लुङ्" "न माङ्योगे" इत्यण्णिषेधः। मा व निषेधार्थकोऽत्र माशब्दो न तु माङ्, अत एव लोट्। प्राणान्=असून्, "पुं भूम्न्यसवः प्राणाः" इत्यमरः। आरोपयः, "स्मोत्तरे लङ्चे"ति लङ्। शोव

नाल के समान गोरी और कुन्दकलिका के अग्रभाग के समान दाँतों वाली उ वालिका को व्याकुल होकर रोते देख, हम लोग भी अपने आँसू रोक सके।

उसके बाद "वेटी! डरो मत, बच्ची! तुम्हें माँ के पास पहुँचा दें वेटी, अफसोस मत करो, रानी विटिया, कुछ खाओ, दूध पियो, ये तुम्हारे भ हैं, जो कुछ तुम कहोगी हम वही करेंगे, रो-रोकर प्राणों को सन्देह में म डालो, इस कोमल शरीर को शोकाग्नि की लपटों से मत झुलसाओ' इस प्रक हजारों तरह से समझाने-बुझाने पर किसी प्रकार आश्वस्त हो उस वालिका कुछ दूध पिया। तदनन्तर, मैंने उसे गोद में लेकर पूछा, 'बच्ची! वतला तुम्हारे माता-पिता कहाँ रहते हैं? तुम इस आश्रम के किनारे कैसे आ गई तुम्हें क्या कष्ट है? तुम रोती क्यों थी? क्या चाहती हो? हम तुम्हारे लि

इति पृष्टा मुग्धतया अपरिकलित-वाक्पाटवा, भयेन विशिथिलवचन-विन्यासा, लज्जया अतिमन्दस्वरा, शोकेन रुद्धकण्ठा, चकितचकितेव कथं कथमपि अबोधयदस्मान् यद्—

"एषा अस्मिन्नेदीयस्येव ग्रामे वसतः कस्यापि ब्राह्मणस्य तनयाऽस्ति। एनां च सुन्दरीमाकलय्य कोऽपि यवन-तनयो नदीतटान्मातुर्हस्ता-दाच्छिद्य क्रन्दन्तीं नीत्वाऽपससार। ततः कञ्चिदध्वानमतिक्रम्य यावदसिधेनुकां सन्दर्श्य विभीषिकयाऽस्याः क्रन्दन-कोलाहलं शमयि-तुमियेष; तावदकस्मात् कोऽपि काल-कम्बल इव भल्लूको वनान्ता-

---

ज्वालया=शोकाग्निना, अवलीढम्=व्याप्तम्। क्रोडे=अङ्के। मुग्धतया=बालस्वभावादज्ञतया। अपरिकलितम्=अविज्ञातम्। वाक्पाटवम्=भाषण-चातुर्यं यया सा। भयेन=भीत्या। हेतौ तृतीया। विशिथिलः=अस्तव्यस्तः, वचनविन्यासः=भाषणम्, यस्याः सा। चकितचकितेव=अतिभीतेव। नेदीयसि=अतिनिकटे। "अन्तिकबाढयोर्नेदसाधौ" इत्यन्तिकस्य नेदादेशः। आकलय्य=निश्चित्य। इयं न ब्राह्मणतनया किन्तु क्षत्रियतनया स्नातुं च गता न मात्रा सह, अपि तु दास्या, पुरोहितं पितरं दासीं च मातरं मेन इत्यग्रेतनकथया स्पष्टीभविष्यति। असिधेनुकाम्="छुरिकाम् "छुरिका चासिधेनुके"त्यमरः। विभीषिकया=भयप्रदर्शनेन। कालश्चासौ कम्बल इति कर्मधारयः। कृष्णवाची कालशब्दः। कालस्य=यमस्य कम्बल इवेति वा। शाल्मलितरुर्लोके "सेंमर"

क्या करें?" निरी बच्ची होने के कारण भाषणचातुरी से एकदम अपरिचित, भय के मारे अस्त-व्यस्त शब्दों में बोलनेवाली, लज्जा से धीमे स्वर और शोक से रुँधे गलेवाली, अत्यन्त चकित हुई-सी इस बालिका ने बड़ी कठिनाई से हमें बताया कि यह समीप के ही गाँव में रहनेवाले किसी ब्राह्मण की कन्या है। इसे सुन्दर देखकर, कोई मुसलमान का लड़का, नदी के किनारे से, माँ के हाथ से छीनकर, रोती-बिलखती हुई इसको ले भागा। कुछ दूर जाकर उसने, छुरा दिखा कर, डरा कर, इसको चुप करना चाहा, इतने में ही एकाएक काले कम्बल-सा एक रीछ जंगल के किनारे से उधर आ निकला। उसे देखते

दुपाजगाम । दृष्ट्वैव यवन-तनयोऽसौ तत्रैव त्यक्त्वा कन्यकामिमां शाल्मलितरुमेकमारुरोह । विप्रतनया चेयं पलाश-पलाशि-श्रेण्यां प्रविश्य घुणाक्षरन्यायेन इत एव समायाता यावद् भयेन पुना रोदितुमारब्धवती, तावदस्मच्छात्रेणैवाऽऽनीते"ति ।

तदाकर्ण्य कोपज्वालाज्वलित इव योगी प्रोवाच—"विक्रम-राज्येऽपि कथमेष पातकमयो दुराचाराणामुपद्रवः ?"

ततः स उवाच—

"महात्मन् क्वाधुना विक्रमराज्यम् ? वीरविक्रमस्य तु भारत-भुवं विरहय्य गतस्य वर्षाणां सप्तदश-शतकानि व्यतीतानि । क्वाधुना मन्दिरे मन्दिरे जयजयध्वनिः ? क्व सम्प्रति तीर्थे तीर्थे घण्टानादः ? क्वाद्यापि मठे मठे वेदघोषः ? अद्य हि वेदा विच्छिद्य

निगद्यते। पलाशाः = किंशुकाः, ते च ते पलाशिनः = तरवः, तेषां श्रेण्याम् = पङ्क्तौ पलाशानि पत्राणि वा, "पत्रं पलाशं छदनम्" इत्यमरः । घुणाक्षर-न्यायेन, काष्ठवेधकैः कृमिभिः काष्ठानुवेधे क्रियमाणे यथाऽकस्मादक्षरमिव प्रतीयते, तथा यत्रावितर्कित-कार्य-सिद्धिस्तत्रेत्थमभिधीयते । पुना रोदितुम्, "रो रि" इति लोपे "ढ्रलोपे पूर्वस्य दीर्घोऽणः" इति दीर्घः ।

विरहय्य = परित्यज्य । सप्तदशशतकानि, शिवराजसमयसूचनार्थ-मिदम् । शिवराजकालिकयवनदुराचारान् वर्णयति—क्वेत्यादि । मठे मठे =

ही वह मुसलमान का लड़का, इस लड़की को वहीं छोड़, एक सेमर के पेड़ पर चढ़ गया और यह ब्राह्मण-बालिका पलाश वृक्षों के झुरमुट में प्रवेश कर घुणाक्षर न्याय से इधर आकर मारे भय के पुनः रोने लगी, इसी बीच हमारा छात्र इसे वहाँ ले आया ।"

यह सुनकर क्रोधाग्नि की लपटों से प्रदीप्त हुए से योगिराज बोले—"विक्रमादित्य के राज्य में भी दुराचारियों का यह पापमय उपद्रव कैसा ?"

तदनन्तर ब्रह्मचारी के गुरु ने कहा—"महात्मा जी, अब विक्रम का राज्य कहाँ रहा ? वीर विक्रमादित्य को तो भारतभूमि को छोड़कर गये सत्रह सौ वर्ष व्यतीत हो गये । अब मन्दिरों में जय-जयकार कहाँ ? तीर्थों में घण्टा-

वीथीषु विक्षिप्यन्ते, धर्मशास्त्राण्युद्धूय धूमध्वजेषु ध्मायन्ते, पुराणानि पिष्ट्वा पानीयेषु पात्यन्ते, भाष्याणि भ्रंशयित्वा भ्राष्ट्रेषु भर्ज्यन्ते; "क्वचिन्मन्दिराणि भिद्यन्ते, क्वचित् तुलसीवनानि छिद्यन्ते, क्वचिद् दारा अपह्रियन्ते, क्वचिद् धनानि लुण्ठ्यन्ते, क्वचिदार्त्तनादाः, क्वचिद् रुधिरधाराः, क्वचिदग्निदाहः, क्वचिद् गृहनिपातः" इत्येव श्रूयतेऽवलोक्यते च परितः।

तदाकर्ण्य दुःखितश्चकितश्च योगिराडुवाच—"कथमेतत् ? ह्य एव पर्वतीयाञ्छकान् विनिर्जित्य महता जयघोषेण स्वराज-

प्रतिच्छात्रालयम्। "मठश्छात्रादिनिलयः" इत्यमरः। वेदाः = वेदपुस्तकानि। विच्छिद्य = विपाट्य, वीथीषु = पथिषु, उद्धूय = उत्तोल्य। धूम एव ध्वजो येषां ते तेषु = वह्निषु। ध्मायन्ते = ज्वाल्यन्ते। पुराणानि = ब्रह्मवैवर्त्तादीनि। पिष्ट्वा = चूर्णीकृत्य। भाष्याणि = सूत्रव्याख्यानानि वात्स्यायनादिनिर्मितानि। भ्राष्ट्रेषु = भर्जनपात्रेषु "क्लीबेऽम्वरीषं भ्राष्ट्रो ने"त्यमरः। "भाड" इति हिन्दी। दाराः = भार्याः। दृ विदारण इत्यस्माण्णिजन्तात् "दारजारौ कर्त्तरि णि लुक् चे"ति घञ्, "दाराक्षतलाजासूनां बहुत्वम्"।

"क्रोडा हारा तथा दारा त्रय एते यथाक्रमम्।
क्रोडे हारे च दारेषु शब्दाः प्रोक्ता मनीषिभिः॥"

इति हेमचन्द्रानुसारेण टावन्तोऽप्ययम्। यथा च "दारात्रय" इति पद्ये दृश्यते तथा टावन्तस्यैकवचनादिष्वपि प्रयोगस्तदिष्टोऽवधार्यते। क्वाधुनेत्यारभ्य परित इत्यन्तं समतानामगुणो दण्डिमते। प्रसादस्तु सर्वसम्मतः। रीतिर्वैदर्भी।

निनाद कहाँ ? मठों में वेदध्वनि कहाँ ? आज तो वेद की पुस्तकें फाड़-फाड़ कर सड़कों पर बिखेरी जाती हैं, धर्मशास्त्र के ग्रन्थ उछाल (उठा) कर आग में झोंके जाते हैं, पुराण की पुस्तकें पीस (फाड़) कर पानी में फेंकी जाती हैं और भाष्यग्रन्थ तोड़-मरोड़ कर भाड़ों में झोंके जाते हैं। "कहीं मन्दिर तोड़े जाते हैं, कहीं तुलसी-वृक्ष काटे जाते हैं। कहीं स्त्रियों का अपहरण किया जाता है और कहीं धनसम्पत्ति लूटी जाती है। कहीं करुण क्रन्दन है तो कहीं रुधिर की धारा, कहीं अग्निकाण्ड है और कहीं गृहध्वंस। चारों ओर यही सुनाई देता है और यही दिखाई देता है।

यह सुनकर खिन्न और विस्मित हुए योगिराज ने कहा—"यह कैसे ?

धानीमायातः श्रीमानादित्य-पदलाञ्छनो वीरविक्रमः। अद्या
तद्विजयपताका मम चक्षुषोरग्रत इव समुद्धूयन्ते, अधुनापि ते
पटहगोमुखादीनां निनादः कर्णशष्कुलीं पूरयतीव, तत् कथमद्य वर्षा
सप्तदश-शतकानि व्यतीतानि" इति ?

ततः सर्वेषु स्तब्धेषु चकितेषु च ब्रह्मचारिगुरुणा प्रण
कथितम्—

"भगवन् ! बद्ध-सिद्धासनैर्निरुद्ध-निश्वासैः प्रबोधितकुण्डलिनी
कैर्विजित–दशेन्द्रियैरनाहत–नाद–तन्तुमवलम्ब्याऽऽज्ञाचक्रं संस्पृश

पर्वतीयान् = पर्वतप्रान्तस्थान्। स्वराजधानीम् = उज्जयिनीम्। आदित्य
पदलाञ्छनः = आदित्यपदविभूषितः। लक्ष्मवाची लाञ्छनशब्दः "कलङ्का
लाञ्छनं च चिह्नं लक्ष्म च लक्षणमि"त्यमरः। समुद्धूयन्ते = कम्पमा
विराजन्ते। पटह-गोमुखादीनाम् = वाद्यविशेषाणाम्। पटहः = नगारा इ
गोमुखम् = तुरही च इति हिन्दी। भाविकालङ्कारोऽतीतस्य प्रत्यक्षायमाणत्वात्

भवादृशैः = योगनिरतैः, कालस्य वेगः = गतिर्न ज्ञायत इत्यन्वयः
भवादृशान् विशिनष्टि—बद्धं सिद्धासनम् = योगशास्त्रीय आसनविशेषो यैस्तैः
निरुद्धाः = अन्तर्नियमिताः, निश्वासाः = प्राणा यैस्तैः। प्रबोधिता = उद्व
तिता, कुण्डलिनी = पराशक्त्यभिधेया नाडीरूपा प्रधानव्यक्तिस्थानम्, यैस्तैः
विजितानि = वशीकृतानि, दशेन्द्रियाणि यैस्तैः। वाक्-पाण-पाद-पायूपस्था

श्रीमान् आदित्यपद विभूषित वीर विक्रम अभी कल ही पर्वत प्रान्त निवा
शकों को जीतकर, महान् जय-जयकार के साथ अपनी राजधानी उज्जयि
आये हैं। आज भी उनकी विजयपताकाएँ मेरे नेत्रों के सामने फहरा सी रही
इस समय भी उनके नगाड़े, तुरही आदि बाजों की ध्वनि मेरे कर्णविवरों
पूर्ण सी कर रही है, फिर आज सत्रह सौ वर्ष कैसे बीत गये ?"

योगिराज के ये वचन सुनकर सबके स्तब्ध और विस्मित हो जाने प
ब्रह्मचारी के गुरु ने प्रणाम कर कहा—"भगवन् ! सिद्धासन बाँध कर, श्
रोककर, कुण्डलिनी को जगाकर, दसों इन्द्रियों पर विजय प्राप्त कर, अनहद न

चन्द्रमण्डलं भित्त्वा, तेजःपुञ्जमविगणय्य, सहस्रदलकमलस्यान्तः प्रविश्य, परमात्मानं साक्षात्कृत्य, तत्रैव रममाणैर्मृत्युञ्जयैरानन्दमात्रस्वरूपैर्ध्यानावस्थितैर्भवादृशैर्न ज्ञायते कालवेगः।

पञ्च कर्मेन्द्रियाणि, चक्षुः-श्रोत्र-घ्राण-रसन-त्वगाख्यानि पञ्च ज्ञानेन्द्रियाणि। अनाहतश्चासौ नादः तस्य तन्तुं=तन्तुतुल्यां सूक्ष्मावस्थालतिकाम्। सुषुम्णामध्ये स्थितं तुरीयं पद्ममनाहतनाम्ना योगशास्त्रे प्रसिद्धम्, तदुत्थो नादोऽनाहतनादः। आज्ञाचक्रम्=भ्रुवोर्मध्ये द्विदलात्मकं चक्रम्। संस्पृश्य=ध्यानावलम्वनं कृत्वा। चन्द्रमण्डलम्=ततः परवर्ति षोडशदलात्मकं चक्रम्। तेजःपुञ्जम्=सोमचक्रवर्तिनं महाप्रकाशम्। सहस्रदलकमलस्य=ब्रह्मरन्ध्रवर्त्तिनः सहस्रारचक्रस्य। परमात्मानम्=परं ब्रह्म। तत्रैव=ब्रह्मणि। रममाणैः=विहरद्भिः। अनिर्वचनीयमानन्दमुपभुञ्जद्भिरिति यावत्। मृत्युञ्जयैः=स्वायत्तीकृतकालवृत्तिभिः, आनन्दमात्रस्वरूपैः=आनन्दमये ब्रह्मणि लीनत्वात् तत्स्वरूपैः यत् तु योगशास्त्रमात्रप्रसिद्धानां शव्दानामुपादानं तच्छास्त्रानभिज्ञस्य वोधाजनकमित्यप्रतीतत्वदोषदुष्टमिदमिति—तन्न, अत्रत्यगद्यस्य योगशास्त्रोक्त-ध्यानप्रकारे व्युत्पत्त्याधायकत्वादेतदर्थमेव समुल्लिखितत्वाच्च। अत एव "न सा विद्या न तच्छास्त्रमि"त्यादिना साहित्यस्य व्युत्पत्त्यापि तदर्थस्य सर्वमयत्वं सूचितम्। कथमन्यथा "वह्निर्विकारं प्रकृतेः पृथगि"त्यादीनां "वागर्थाविव संपृक्तावि"त्यादीनां च न तद्दोषदुष्टत्वमित्यलमसदावेशेन।

(सुषुम्णा के मध्य में स्थित, योगशास्त्र में अनाहत नाम से प्रसिद्ध चतुर्थ पद्म से उत्पन्न होने वाले नाद) के तन्तु का अवलम्वन कर, (भौंहों के बीच में स्थित द्विदलात्मक) आज्ञाचक्र को ध्यान का लक्ष्य वनाकर, षोडशदलात्मक चक्र 'चन्द्रमण्डल' को भेद कर, चन्द्रचक्रवर्ती महाप्रकाश का तिरस्कार कर, सहस्रारचक्र के अन्दर प्रविष्ट हो परब्रह्म का साक्षात्कार कर उसी में रमण करनेवाले, मृत्यु के विजेता, आनन्दस्वरूप और ध्यान में स्थित आप जैसे महात्माओं को समय का वेग प्रतीत नहीं होता। उस समय आपने

तस्मिन् समये भवता ये पुरुषा अवलोकिताः तेषां पञ्चाशत्तमोऽपि पुरुषो नावलोक्यते । अद्य न तानि स्रोतांसि नदीनाम्, न सा संस्था नगराणाम्, न सा आकृतिर्गिरीणाम्, न सा सान्द्रता विपिनानाम्। किमधिकं कथयामो भारतवर्षमधुना अन्यादृशमेव सम्पन्नमस्ति"

इदमाकर्ण्य किञ्चित् स्मित्वेव परितोऽवलोक्य च योगी जगाद-"सत्यं न लक्षितो मया समय-वेगः । यौधिष्ठिरे समये कलित-समाधिरहं वैक्रम-समये उदस्थाम् । पुनश्च वैक्रम-समये समाधि-माकलय्य अस्मिन् दुराचारमये समयेऽहमुत्थितोऽस्मि । अहं पुनर्गत्वा समाधिमेव कलयिष्यामि, किन्तु तावत् सङ्क्षिप्य कथ्यतां का दशा भारतवर्षस्येति"--

तत् संश्रुत्य भारतवर्षीय-दशा-संस्मरण-संजात-शोको हृदयस्थ-प्रसाद-सम्भारोद्गिरण-श्रमेणेवातिमन्थरेण स्वरेण "मा स्म धर्मध्वंसन-घोषणैर्योगिराजस्य धैर्यमवधीरय" इति कण्ठं रुन्धतो बाष्पा-

पञ्चाशत्तमः = पञ्चाशत्सङ्ख्यापूरकः । कैमुतिकन्यायसूचकोऽपि । यौधिष्ठिरे = युधिष्ठिरस्यायं समयो यौधिष्ठिरस्तस्मिन् ।

भारतवर्ष-सम्बन्धिन्या दशायाः संस्मरणेन सञ्जातः शोको यस्य सः। हृदयस्थो यः प्रसादः = प्रसन्नता, तस्य सम्भारः = अतिशयः, तस्योद्गिरणे = वमने यः श्रमः, तेनेवेत्युत्प्रेक्षा । धर्मस्य = श्रुतिप्रतिपाद्यस्य यद् ध्वसनम् = उन्मूलनम्, तस्य घोषणैः = कथनैः ।

जिन लोगों को देखा होगा, उनकी पचासवीं पीढ़ी का पुरुष भी आज नहीं दिखायी देता । आज नदियों के वे स्रोत नहीं रहे, नगरों की वह स्थिति नहीं रही, पर्वतों का वह आकार नहीं रहा और जंगलों की वह गहनता (सघनता) नहीं रही । अधिक क्या कहें भारतवर्ष इस समय दूसरा-सा ही हो गया है।"

यह सुनकर कुछ मुस्कराते हुए से, चारों ओर देखकर, योगिराज बोले—"सचमुच मुझे समय के वेग की प्रतीति नहीं हुई । युधिष्ठिर के समय में समाधि लगा कर मैं विक्रम के समय में जागा था, और पुनः विक्रम के समय में समाधिस्थ होकर इस अनाचारमय समय में जागा हूँ । मैं फिर जाकर समाधि ही लगाऊँगा, किन्तु तब तक संक्षेप में बताइये कि भारतवर्ष की क्या दशा है ?"

यह सुनकर भारतवर्ष की दुर्दशा के स्मरण से ब्रह्मचारी के गुरु का शोक

नर्विगणय्य, नेत्रे प्रमृज्य, उष्णं निःश्वस्य, कातराभ्यामिव नयनाभ्यां परितोऽवलोक्य, ब्रह्मचारिगुरुः प्रवक्तुमारभत—

"भगवन् ! दम्भोलिघटितेयं रसना, या दारुण-दानवोदन्तोदीरणैर्न दीर्य्यते, लोहसारमयं हृदयम्, यत् संस्मृत्य यावनान् परस्सहस्रान् दुराचारान् शतधा न भिद्यते, भस्मसाच्च न भवति। धिगस्मान्, येऽद्यापि जीवामः, श्वसिमः, विचरामः, आत्मन आर्य्यवंश्यांश्चाऽभिमन्यामहे"

उपक्रममुमाकर्ण्य अवलोक्य च मुनेर्विमनायमानं हरिद्राद्रवक्षालितमिव वदनम्, निपतद्वारिविन्दुनी नयने, अञ्चित-रोम-

दम्भोलिघटिता = वज्रमयी। "दम्भोलिरशनिर्द्वयोरि"त्यमरः। दारुणानाम् = भयानकानाम्, दानवानाम् = म्लेच्छानाम्, उदन्तस्य = वृत्तान्तस्य। "वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यादि"त्यमरः। उदीरणैः = कथनैः, लोहसारमयम् = अयोनिर्मितम्। सहस्रात् पराः परस्सहस्राः, तान्। राजदन्तादित्वात् सहस्रशब्दस्य परनिपातः। पारस्करादित्वात् सुट्। विशेष्यनिघ्नत्वाद् वाच्यलिङ्गता। नास्मज्जीवनं जीवनम्, अपि तु भस्त्रेव श्वसनमिति सूचयन् जीवाम् इत्यभिधाय श्वसिम इति।

विमनायमानम् = दुर्मनायमानम्। हरिद्रा = महारजनं, तद्द्रवेण = तद्रसेन, क्षालितमिव = धौतमिव। उत्प्रेक्षा। निपतन्तः = स्खलन्तः,

उमड़ आया। मानो हृदयस्थित प्रसन्नता के प्रकाशन करने के श्रम से धीमे पड़ गये स्वर से, 'धर्मविध्वंस की कथाओं से योगिराज का धैर्य मत डिगाओ' यह कहते हुए से गला रूँधने वाले आँसुओं की परवाह न कर, नेत्र पोंछकर, गरम साँस लेकर, कातर नेत्रों से चारों ओर देखकर, ब्रह्मचारी के गुरु ने कहना प्रारम्भ किया—

"भगवन् ! मेरी यह जीभ वज्र से वनी है, जो भीषण म्लेच्छों के वृत्तान्त के वर्णन से कट (फट) नहीं जाती, मेरा हृदय लोहे का बना हुआ है, जो यवनों के हजारों दुराचारों का स्मरण कर टुकड़े-टुकड़े नहीं हो जाता और जलकर राख नहीं हो जाता। धिक्कार है हम लोगों को, जो आज भी जीते हैं, साँस लेते हैं, इधर-उधर घूमते हैं और अपने को आर्यों का वंशज मानते हैं।"

इस उपोद्घात को सुनकर और ब्रह्मचारी के गुरु के हल्दी से रँगे हुए से

कञ्चुकं शरीरम्, कम्पमानमधरम्, भज्यमानं च स्वरम्, अव-
गच्छत् "सकलानर्थमयः, सकल-वञ्चनामयः, सकलपापमयः
सकलोपद्रवमयश्चायं वृत्तान्तः"—इति, "अत एव तत्स्मरणमात्रेणा
खिद्यत एष हृदये, तन्नाहमेनं निरर्थं जिग्लापयिषामि, न वा चिखे-
यिषामि" इति च विचिन्त्य—

"मुने ! विलक्षणोऽयं भगवान् सकल-कला-कलाप-कल-
सकल—कालनः करालः कालः। स एव कदाचित् पयः—पूर—पूरि-
तान्यकूपार-तलानि मरूकरोति। सिंह-व्याघ्र-भल्लूक-गण्डक-
फेरु-शश-सहस्र-व्याप्तान्यरण्यानि जनपदीकरोति, मन्दिर-प्रासाद-
हर्म्य-शृङ्गाटक-चत्वरोद्यान-तडाग-गोष्ठमयानि नगराणि च कानन-

वारिबिन्दवः=अश्रुकणा याभ्यां ते। अञ्चितरोमकञ्चुकम् = सरोमाञ्च-
जिग्लापयिषामि=ग्लपयितुमिच्छामि। चिखेदयिषामि = खेदयितुमिच्छामि।
सकलानां कलानां यः कलापः=समूहः, तत्कलनः=तन्निर्माता। सकल-
कालयतीति सकलकालनः = सकलजरयिता। कालः=महाकालः। "का-
मृत्यौ महाकाले समये यमकृष्णयोरि"ति मेदिनी। अकूपारतलानि=समु-
तलानि। "समुद्रोऽब्धिरकूपारः" इत्यमरः। मरूकरोति = मरुतुल्यानि करोति
अभूततद्भावे च्विः। गण्डकः=खड्गी, लोके "गैंडा" इति। फेरवः
शृगालाः। "शृगालवञ्चकक्रोष्टुफेरुफेरवजम्बुकाः" इत्यमरः। मन्दिराणिः
देवनिवासाः। प्रासादाः=भूभृन्निवासाः। हर्म्यम् = धनिकावासः। "हर्म्या-

(पीले) उदास चेहरे, आँसू बरसाते नेत्रों, रोमाञ्चित शरीर, काँपते ओं
और लड़खड़ाते स्वर से, योगिराज समझ गये कि यह सारा वृत्तान्त अन-
वञ्चनाओं तथा पाप और उपद्रव की घटनाओं से भरा है, यही कारण है
उसका स्मरण करके ही इनका मन खिन्न हो जाता है। अतः मैं इन्हें व्यर्थ
म्लान या खिन्न न करूँगा, यह सोचकर—

"हे मुनि ! सारी कलाओं के निर्माता और सबके संहारक, भगवा-
महाकाल बड़े ही विलक्षण हैं। वे ही कभी जलप्रवाह से परिपूर्ण समुद्रत-
को मरुस्थल बना देते हैं, हजारों शेरों, बाघों, भालुओं, गैंडों, सिया-
और खरगोशों से भरे जंगलों को नगर बना देते हैं, तथा मन्दिरों, रा-

करोति। निरीक्ष्यतां कदाचिदस्मिन्नेव भारते वर्षे यायजूकै राजसूयादियज्ञा व्ययाजिषत, कदाचिदिहैव वर्ष-वाताऽऽतप-हिम-सहानि तपांसि अतापिषत। सम्प्रति तु म्लेच्छैर्गावो हन्यन्ते, वेदा विदीर्यन्ते, स्मृतयः समृद्यन्ते, मन्दिराणि मन्दुरीक्रियन्ते, सत्यः पात्यन्ते, सन्तश्च सन्ताप्यन्ते। सर्वमेतन्माहात्म्यं तस्यैव महाकालस्येति कथं धीरधौरेयोऽपि धैर्यं विधुरयसि? शान्तिमाकलय्यातिसङ्क्षेपेण कथय यवन-राज्य-वृत्तान्तम्। न जाने किमित्यनावश्यकमपि शुश्रूषते मे हृदयम्"—इति कथयित्वा तूष्णीमवतस्थे।

धनिनां वासः" इत्यमरः। शृङ्गाटकम्=चतुष्पथम्। "चौराहा" इति हिन्दी। चत्वरम्=अङ्गणम्। "अङ्गणं चत्वराजिरे" इत्यमरः। उद्यानम्=वाटिका। "पुमानाक्रीड उद्यानम्" इत्यमरः। गोष्ठं "गोस्थानकमि"त्यमरः। "गोशाला" इति हिन्दी। प्राचुर्यार्थे मयट्। एतत्प्रचुराणीत्यर्थः। काननीकरोति=जङ्गलीकरोति। यायजूकैः=इज्याशीलैः। "इज्याशीलो यायजूकः" इत्यमरः। व्ययाजिषत=कृताः, व्युपसृष्टाद् यजेर्लुङि। अतापिषत=तप्तानि। मन्दुरीक्रियन्ते=वाजिशालीक्रियन्ते। "वाजिशाला तु मन्दुरा" इत्यमरः। पात्यन्ते, पातिव्रत्यात्। व्यभिचार्यन्त इत्यर्थः। धीरधौरेयः=धीरधुरन्धरः। विधुरयसि=विकलयसि। "वैकल्येऽपि च विश्लेषे विधुरं विकले त्रिष्वि"ति मेदिनी। शुश्रूषते=श्रोतुमिच्छति। "ज्ञाश्रुस्मृदृशां सनः" इत्यात्मनेपदम्।

महलों, अट्टालिकाओं, चौराहों, चबूतरों, उपवनों, सरोवरों और गोशालाओं से भरे नगरों को जंगल बना देते हैं। देखिए कभी इसी भारतवर्ष में याज्ञिकों ने राजसूय आदि यज्ञ किये थे, कभी यहीं पर वर्षा, आँधी, धूप और हिमपात सह कर तपस्याएँ की गयी थी, परन्तु इस समय म्लेच्छों द्वारा गायें मारी जाती हैं, वेद की पुस्तकें फाड़ी जाती हैं, स्मृतियाँ कुचली जाती हैं, मन्दिर घुड़साल बनाये जाते हैं, सतियों का सतीत्व नष्ट किया जाता है और सज्जनों को कष्ट पहुँचाया जाता है। यह सब उसी महाकाल की महिमा है, आप धीर-श्रेष्ठ होकर भी धैर्य क्यों खोते हैं? शान्त होकर अति संक्षेप में यवन-राज्य का वृत्तान्त कहिये। अनावश्यक समझते हुए भी, न जाने क्यों मन इसे सुनना चाहता है।" यह कहकर योगिराज चुप हो गये।

अथ स मुनिः—"भगवन् ! धैर्येण, प्रसादेन, प्रतापेन, तेजस वीर्येण, विक्रमेण, शान्त्या, श्रिया, सौख्येन, धर्मेण, विद्यया समेत्र परलोकं सनाथितवति तत्रभवति वीरविक्रमादित्ये, श शनैः पारस्परिक-विरोध-विशिथिलीकृतस्नेहबन्धनेषु राज भामिनी-भ्रूभङ्ग-भूरिभाव-प्रभाव-पराभूत-वैभवेषु भटेषु, स्वार्थ-चिन्त सन्तान-वितानैकतानेष्वमात्यवर्गेषु, प्रशंसामात्रप्रियेषु प्रभुषु, "इन्द्र स्त्वं वरुणस्त्वं कुबेरस्त्वम्" इति, वर्णनामात्रसक्तेषु बुधजनेषु कश्च गजिनी-स्थाननिवासी महामदो यवनः ससेनः प्राविशद् भार वर्षे। स च प्रजा विलुण्ठ्य, मन्दिराणि निपात्य, प्रतिमा विभिद्य, प

सनाथितवति=सनाथं कृतवति। धैर्यादिना साकं सनाथीकरणमि सहोक्तिरलङ्कारः। सौकुमार्यं नाम गुणः, अमङ्गलस्य विस्पष्टमनभिधानात् तत्रभवति=श्रेष्ठे "तत्र च भावेने"ति सप्तमी। पारस्परिकविरोध विशिथिलीकृतानि=शिथिलतामापादितानि स्नेहबन्धनानि यैस्तेषु भामिनीनाम्=मानिनीनाम्, भ्रूभङ्गाः=सकटाक्षेक्षणानि, भूरिभाव =हावाद्याश्चेष्टाः, तेषां प्रभावेण पराभूतानि=तिरस्कृतानि, वै वानि=धनानि येषां तादृशेषु। गजिनी="गजनी" इति लोके प्रसिद्धा संस्कृतशब्दापभ्रंशीभूता एव सर्वे भाषाशब्दा इत्यभिप्रायेण प्रायः सार्थ संस्कृतशब्दानामेव नामादिष्वपि प्रयोगः महामदः=महमूद इति लो प्रसिद्धं तन्नाम, देशनाम्ना "महमूद गजनवी" इति वृत्तेषु समुल्लिखितम्

तदनन्तर उन मुनि ने कहना प्रारम्भ किया—"भगवन् ! धै प्रसन्नता, प्रताप, तेज, बल, पराक्रम, शान्ति, शोभा, सुख, धर्म और वि के साथ वीर विक्रमादित्य के परलोक चले जाने पर, राजाओं पारस्परिक स्नेहबन्धन के आपसी झगड़ों के कारण ढीले पड़ जाने प वीरों के, कामिनियों के कटाक्षों और हाव-भाव के प्रभाव में आकर स सम्पत्ति बरबाद कर चुकने पर, अमात्यों के स्वार्थचिन्तामात्रपरायण जाने पर, राजाओं के प्रशंसामात्र प्रिय हो जाने पर तथा विद्वानों 'आप इन्द्र हैं, आप वरुण हैं, आप कुबेर हैं' कहकर चाटुकारिता कर प्रभुओं को प्रसन्न करने में लग जाने पर, गजिनी स्थान निवासी, कि महमूद नाम के यवन ने सेना के साथ भारतवर्ष में प्रवेश किया। वह प्र

श्शनान् जनांश्च दासीकृत्य, शतश उष्ट्रेषु रत्नान्यारोप्य स्वदेशमनैषीत्। एवं स ज्ञातास्वादः पौनःपुन्येन द्वादशवारमागत्य भारतमलुलुण्ठत्। तस्मिन्नेव च स्वसंरम्भे एकदा गुर्जरदेश-चूडायितं सोमनाथतीर्थमपि धूलीचकार। अद्य तु तत्तीर्थस्य नामापि केनापि न स्मर्यंते; परं तत्समये तु लोकोत्तरं तस्य वैभवमासीत्। तत्र हि महार्हं-वैदूर्य-पद्मराग-माणिक्य-मुक्ताफलादि-जटितानि कपाटानि स्तम्भान्, गृहावग्रहणीः, भित्तीः, वलभीः विटङ्कानि च निर्मथ्य, रत्ननिचयमादाय, शतद्वय-मणसुवर्ण-शृङ्खलावलम्बिनीं चञ्चच्चाकचक्य-चकितीकृतावलोचक-लोचन-निचयां महाघण्टां प्रसह्य संगृह्य, महादेवमूर्तावपि गदामुदतूतुलत्।

अलुलुण्ठत् = लुण्ठितवान्। गुर्जरदेश-चूडायितम् = गुर्जरदेशभूषणतुल्यम्। धूलीचकार = नाशयामास। जटितानि, 'जट, झट सङ्घात' इत्यस्य प्रयोगः "जड़े हुवे" इति हिन्दी। गृहावग्रहणीः = देहलीः। भित्तीः = कुड्यानि। वलभीः = गोपानसीः। "गोपानसी तु वलभी च्छादने वक्रदारुणी"-त्यमरः। "छज्जा" इति हिन्दी "धरना" इति वा। मणशव्दो लोके "मन" इति ख्यातः। चञ्चता = समुच्छलता, चाकचक्येन, चकितीकृतः = विस्मेरीकृतः, अवलोचकलोचनानाम् = द्रष्टृजननयनानाम्, निचयः = समूहो यया

को लूट कर, मन्दिरों को ध्वस्त कर, मूर्तियों को तोड़ कर, सैकड़ों लोगों को दास बनाकर, सैकड़ों ऊँटों पर रत्न लाद कर, अपने देश को ले गया। इस प्रकार, स्वाद मिल जाने के कारण वार-वार आकर उसने बारह बार भारतवर्ष को लूटा। अपने इन्हीं हमलो में उसने एक बार गुजरात के आभूषण-तुल्य सोमनाथ तीर्थ को भी धूल में मिला दिया। आज तो उस तीर्थ का नाम भी किसी को याद नहीं है, पर उस समय उसका वैभव लोकोत्तर था। उसमें बहुमूल्य वैदूर्य (मूँगा), पद्मराग, हीरे और मोती जड़े किवाड़ों, खम्भों देहलियों, दीवारों, छज्जों और कबूतरों के दरबों को छानकर, रत्नराशि लेकर, दो सौ मन सोने की जंजीर में लटकने वाली और देदीप्यमान चमचमाहट से दर्शकों के

अथ "वीर! गृहीतमखिलं वित्तम्, पराजिता आर्य्यसेना बन्दीकृता वयम्, सञ्चितममलं यशः, इतोऽपि न शाम्यति ते क्रो- श्चेदस्मांस्ताडय, मारय, छिन्धि, भिन्धि, पातय, मज्जय, खण्ड- कर्तय, ज्वलय; किन्तु त्यजेमामकिञ्चित्करीं जडां महादेव-प्रतिमाम् यद्येवं न स्वीकरोषि तद् गृहाणास्मत्तोऽन्यदपि सुवर्णकोटिद्वयम् त्रायस्व, मैनां भगवन्मूर्ति स्प्राक्षीः" इति साम्रेडं कथयत्सु रुदत्सु पत- विलुण्ठत्सु प्रणमत्सु च पूजकवर्गेषु; "नाहं मूर्तीर्विक्रीणामि, कि- भिनद्मि" इति संगर्ज्य जनताया हाहाकार-कलकलमाकर्णयन् घोत-

ताम्। उदतूतुलत् = उदतिष्ठिपत्। प्रहृतवानिति यावत्। उत्पूर्वकादु- नार्थकाच्चौरादिकात् तुलधातोः कर्त्तरि लुङि। "अकिञ्चित्करीं जडामि" तदीयबोधमादाय तत्प्रीतये वा, न वस्तुगत्येति बोध्यम्। स्प्राक्षीः, माङ्- लुङ्, अत एव नाट्। स्प्राक्षीः स्पृक्ष इत्यपि रूपे। जनतायाः = जनसमूहस-

नेत्रों को चकाचौंध कर देनेवाली महाघण्टा को जबर्दस्ती हथिया कर, महा- की मूर्ति पर भी गदा उठाई।

उसके बाद पुजारियों के "वीर! तुमने सारा धन ले लिया, हिन्दु- की सेनाओं को हरा दिया, हम लोगों को बन्दी बना लिया, निर्मल य- का सञ्चय कर लिया, यदि इतने पर भी तुम्हारा क्रोध शान्त न हुआ हो हमें पीटो, मारो, चीर डालो, काट डालो, (पहाड़ से) नीचे गिरा दो, (स- में) डुबा दो, टुकड़े-टुकड़े कर डालो, कतर डालो, जला डालो, लेकिन इ- बेचारी जड़ महादेव की मूर्ति को छोड़ दो। यदि इस तरह भी स्वीकार न हो हमसे दो करोड़ स्वर्णमुद्राएँ और ले लो, रक्षा करो, इस महादेवमूर्ति मत छुओ।" यह कहकर वार-वार विनय करने पर, रोने-गिड़गिड़ा- पैरों पड़ने, भूमि पर लोटने और प्रणाम करने पर, "मैं मूर्ति बेचता न- किन्तु तोड़ता हूँ" यों गरज कर, जनता की हाहाकार-ध्वनि के बीच

गदया मूर्तिमतुत्रुटत् । गदापातसमकालमेव चानेकार्बुदपद्ममुद्रा-मूल्यानि रत्नानि मूर्तिमध्यादुच्छलितानि परितोऽवाकीर्यन्त । स च दग्धमुखः तानि रत्नानि मूर्तिखण्डानि च क्रमेलकपृष्ठेष्वारोप्य सिन्धु-नदमुत्तीर्य स्वकीयां विजयध्वजिनीं गजिनीं नाम राजधानीं प्राविशत् ।

अथ कालक्रमेण सप्ताशीत्युत्तरसहस्रतमे (१०८७) वैक्रमाब्दे सशोकं सकष्टं च प्राणांस्त्यक्तवति महामदे, गोरदेशवासी कश्चित् शहावुद्दीन-नामा प्रथमं गजिनीदेशमाक्रम्य, महामदकुलं धर्म-राजलोकाध्वन्यध्वनीनं विधाय, सर्वाः प्रजाश्च पशुमारं मारयित्वा, तद्रुधिरार्द्रमृदा गोरदेशे बहून गृहान् निर्माय चतुरङ्गिण्याऽनीकिन्या

अतुत्रुटत्=अभिनत्, भेदितवानित्यर्थः । उच्छलितानि=उत्पतितानि । दग्धमुखः=दुष्टः । "मुँहजरा" इति हिन्दी । क्रमेलकाः=उष्ट्राः, "उष्ट्रे क्रमेलकमयमहाङ्गा" इत्यमरः । विजयध्वजिनीम्=विजयध्वजवतीम् । "न कर्मधारयाद्" इति निषेधस्यासार्वत्रिकत्वमुक्तम् ।

गोरदेशः=सिन्धुनद्याः पश्चिमदिशि यवनप्रधानो देशविशेषः । शहावुद्दीनमपि देशनाम्ना "शहावुद्दीन गोरी" इति कथयन्ति । अध्वनीनम्= पान्थम् । चतुर्भिरङ्गैः समेता चतुरङ्गिणी । "हस्त्यश्वरथपादातं सेनाङ्गं स्याच्चतुष्टयमि"त्यमरः । अनीकिन्या=सेनया । शीतलशोणि-

महमूद गजनवी ने भीषण गदा से मूर्ति तोड़ डाली । गदा गिरते ही अनेक अरब पद्म मूल्य के रत्न मूर्ति से उछलकर इधर-उधर बिखर गये । वह मुँहजला उन रत्नों और मूर्तिखण्डों को ऊँटों की पीठ पर लाद कर, सिन्धु नद को पार कर अपनी विजयध्वज वाली राजधानी गजनी में प्रविष्ट हुआ ।

तदनन्तर, समय के फेर से वि० सं० १०८७ में महमूद की शोक और क्लेशपूर्वक मृत्यु हो जाने पर, गोरदेश निवासी शहावुद्दीन नामक किसी यवन ने, पहले गजनी देश पर आक्रमण करके, महमूद के, वंशजों को यमलोक के पथ का पथिक बनाकर, सारी प्रजा को पशुओं की मौत मारकर, प्रजा के रुधिर से गीली मिट्टी से गोरदेश में अनेक महलों का निर्माण कर, चतुरङ्गिणी

भारतवर्षं प्रविश्य, शीतलशोणितानप्यसयन् पञ्चाशदुत्तर-द्वाद
शतमितेऽब्दे (१२५०) दिल्लीमश्वयाम्बभूव ।

ततो दिल्लीश्वरं--पृथ्वीराजं- कान्यकुब्जेश्वरं जयचन्द्रं च पा
स्परिकविरोध-ज्वर-ग्रस्तं विस्मृत-राजनीतिं भारतवर्ष-दुर्भाग्या
माणमाकलय्यानायासेनोभावपि विशस्य, वाराणसीपर्यन्तमखण
मण्डलमकण्टकमकीटकिट्टं महारत्नमिव महाराज्यमङ्गीचकार

तेन वाराणस्यामपि बह्वोऽस्थिगिरयः प्रचिताः, रिङ्गत्तरङ्ग-भ
गङ्गाऽपि शोणित-शोणा शोणीकृता, परस्सहस्राणि च देवमन्दिरा
भूमिसात्कृतानि ।

तान्=अनुष्णरक्तान् युद्धेच्छाविरहितान् इतिः भावः। असयन्=असि
घ्नन्। अश्वयाम्बभूव=अश्वैरतिचक्राम। 'तेनातिक्रामति' इति णि
विस्मृता राजनीतिः="वयं पञ्च वयं पञ्च वयं पञ्च शतञ्च ते। परैः स
विवादे तु वयं पञ्चोत्तरं शतम्" इत्येवं यौधिष्ठिरनीतिः, येन त
आकलय्य=अवधार्य। विशस्य=घातयित्वा, अकीटकिट्टम्=कीटकि
विरहितम्। कीटाः=कृमयः, किट्टम्=मलम्। अस्थिगिरयः=कीक
पर्वताः। गिरिशब्दप्रयोगो महतो नाशकाण्डस्य ध्वननाय। रिङ्गन्तः=चलन्
तरङ्गभङ्गाः=ऊर्मिभेदा यस्यां सा। शोणितेन शोणा=रक्ता। शो
कृता=शोणनदतामापादिता। मेकलगिरिसमुद्भूतो विहारविहारी महान

सेना के साथ भारतवर्ष में प्रवेश कर, ठण्डे खून वाले (युद्ध की इच्छा
रहित) भारतीयों को भी तलवार के घाट उतारते हुए, १२५० में दिल्ली
घुड़सवार सेना से घेर लिया ।

तत्पश्चात् मुहम्मद गोरी ने दिल्लीश्वर पृथ्वीराज और कन्नौज-न
जयचन्द को आपसी फूट रूपी ज्वर से ग्रस्त, राजनीति के ज्ञान से शून्य,
भारतवर्ष का दुर्भाग्यस्वरूप समझकर, दोनों को अनायास ही मारकर, वारा
तक विस्तृत, निष्कण्टक, कीट और मल से अस्पृष्ट महारत्न के समान राज्य
अधिकार कर लिया। वाराणसी में भी उसने हड्डियों के बहुत से पहाड़
दिये, चञ्चल तरंगों वाली गंगा को भी (भारतीयों के) रुधिर से रँग कर शोण

स एव प्राधान्येन भारते यावनराज्याङ्कुराऽऽरोपकोऽभूत्। तस्यैव च कश्चित् क्रीतदासः कुतुबुद्दीननामा प्रथमभारतसम्राट् संजातः।

तमारभ्याद्यावधि राक्षसा एव राज्यमकार्षुः। दानवा एव च दीनानदीदलन्। अभूत् केवलम् अकबरशाह-नामा यद्यपि गूढशत्रु-र्भारतवर्षस्य, तथापि शान्तिप्रियो विद्वत्प्रियश्च। अस्यैव प्रपौत्रो मूर्तिमदिव कलियुगं, गृहीतविग्रह इव चाधर्मः, आलमगीरोपाधिधारी अवरङ्गजीवः सम्प्रति दिल्लीवल्लभतां कलङ्कयति। अस्यैव पताकाः

शोणः। भूमिसात्कृतानि = धूलिसात्कृतानि। भारतसम्राट्, सम्राट्सदृशे लाक्षणिकोऽयं शब्दः।

राक्षसाः = निर्दयाः हिंसाप्रियाश्च। अदीदलन् = अजीघतन्, हिंसितवन्त इत्यर्थः। गूढशत्रुः = गुप्तरिपुः। राजपुत्रवंश्यैः सहोद्वाहादिसम्बन्धं प्राचारयदिति मुद्रान्तरेण सर्वान् म्लेच्छान् विधित्सुरासीदिति तत्त्वम्। अवरङ्गजीवः = "औरङ्गजेव" इति नामवान्।

बना दिया, और हजारों देव-मन्दिरों को धूल में मिला दिया।

भारतवर्ष में यवन-राज्य का बीजारोपण (मुसलमानी राज्य के अङ्कुर आरोपण) मुख्यतः उसी ने किया, और उसी का कुतुबुद्दीन नाम का एक गुलाम भारतवर्ष का प्रथम यवन सम्राट् हुआ।

उससे लेकर आज तक राक्षसों ने ही राज्य किया है, और दानवों ने ही दीनों की निर्मम हत्या की है। केवल अकबर नाम का बादशाह—यद्यपि वह भी भारतवर्ष का गुप्त शत्रु था—कुछ शान्तिप्रिय और विद्वानों का आदर करने वाला हुआ। उसी का प्रपौत्र, मूर्तिमान कलियुग और शरीर धारण करके आया हुआ अधर्म-सा औरङ्गजेव—जिसने 'आलमगीर' उपाधि धारण कर रखी है—इस समय दिल्ली के शासन को कलंकित कर रहा है।

केकयेषु मत्स्येषु मगधेषु अङ्गेषु वङ्गेषु कलिङ्गेषु च दोधूयन्ते, केव
दक्षिणदेशेऽधुनाऽप्यस्य परिपूर्णो नाधिकारः संवृत्तः।

दक्षिणदेशो हि पर्वतबहुलोऽस्ति अरण्यानीसङ्कुलश्चास्ती
च्चिरोद्योगेनापि नायमशकन्महाराष्ट्रकेसरिणो हस्तयितुम्। साम्प्र
मस्यैवाऽऽत्मीयो दक्षिणदेश-शासकत्वेन "शास्तिखान" नामा प्रेष्य

वितस्ताया (झेलम) श्चंद्रभागाया (चनाव) श्चान्तरालवर्त्ती केक
देशः=रामायणसमये "गिरिव्रज" नाम्ना ख्याता नगर्येतदीयराजधान्यासीत्
भरतजनन्याः केकय्या जन्मभूरियमेवेति रामायणे व्यक्तम्। गिरिव्रजस्य (गिं
झक) यवनसाम्राज्यकाले "जलालपुर" इति नामकरणमभूत्।

इन्द्रप्रस्थात् पश्चिमस्थो दृषद्वत्याश्च दक्षिणस्थो मरुभूमेः पूर्वस्थो भूख
मत्स्यदेशः। मगधदेशः=कीकटापरनामा वर्त्तमान-दक्षिणविहारो गयाद
गृहादिसमवेतः। अङ्गदेशः=वर्त्तमान-भागलपुरसंवलितो भूखण्डविशे
अङ्गदेशात् पूर्वस्थितोऽधुना वङ्गालनाम्ना ख्यातो वङ्गदेशः। कलिङ्गदेशः
'उड़ीसा' इति साम्प्रतं ख्यातः।

अरण्यानी=महदरण्यम्, तया सङ्कुलः=व्याप्तः। महाराष्ट्रके
रिणः, अत्र केसरिपदं श्रेष्ठवाचकम्,

"स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः।
सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः॥" इत्यमरः।

हस्तयितुम्=हस्ते कर्तुम्। वशीकर्तुमिति यावत्। शान्तिखानः

केकय (पंजाव), मत्स्य (राजपूताना), मगध (दक्षिण विहार), अङ्ग (
विहार), वङ्ग (वङ्गाल) और कलिङ्ग (उड़ीसा) में आज इसी के
फहरा रहे हैं, केवल दक्षिण देश ही ऐसा है जहाँ अभी भी इसका
अधिकार नहीं हो पाया है।

दक्षिण देश में पर्वतों की अधिकता है और घने जंगल भी
बहुत हैं, इसीलिये बहुत दिनों के प्रयत्न के बावजूद भी औरं
सिंहसदृश मराठों को वश में नहीं कर सका। सुना जाता है कि अब

इति श्रूयते। महाराष्ट्रदेशरत्नम्, यवन-शोणित-पिपासाऽऽकुलकृपाणः, वीरता-सीमन्तिनी-सीमन्त-सुन्दर-सान्द्र-सिन्दूर-दान-देदीप्यमान-दोर्दण्डः, मुकुटमणिर्महाराष्ट्राणाम्, भूषणं भटानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम्, कश्चन प्रातः-स्मरणीयः, स्वधर्माऽऽग्रह-ग्रह-ग्रहिलः, शिव इव धृतावतारः शिववीर-श्चास्मिन् पुण्यनगरान्नेदीयस्येव सिंहदुर्गे ससेनो निवसति। विजय-पुराधीश्वरेण साम्प्रतमस्य प्रवृद्धं वैरम्। "कार्यं वा साधयेयं देहं वा पातयेयम्!" इत्यस्य सारगर्भा महती प्रतिज्ञा। सतीनाम्, सताम्, त्रैवर्णि-कस्य आर्यकुलस्य, धर्मस्य, भारतवर्षस्य च आशा-सन्तान-वितानस्याय-

---

"शाइस्ता खां" इति प्रसिद्धं नाम। रत्नशब्दस्य नित्यक्लीवत्वम्। यवनानाम् = मोहमदानां, शोणितस्य पिपासायामाकुलः कृपाणो यस्य सः। वीरस्य भावो वीरता = शूरता, सैव सीमन्तिनी = ललना, तस्याः सीमन्ते = केशवेशे, सुन्दरं सान्द्रं = घनं, यत् सिन्दूरदानं = नागकेशरचर्चनं, तेन देदीप्यमानो दोर्दण्डः = बाहुदण्डो यस्य सः। श्रुत्यनुप्रासः। स्वधर्मस्य = सनातनधर्मस्य, य आग्रहग्रहः = हठादपि पालनम्, तत्र ग्रहिलः = दृढतरः। शिव इवेत्युत्प्रेक्षा। शिववीरः = "शिवाजी" इति विख्यातः। पुण्य-नगरात्—"पूना" इति ख्यातात्। नेदीयसि = अतिशयेनान्तिक इति नेदीयान्, तस्मिन्। आशायाः, सन्तानम् = परम्परा, तस्य, वितानम् = विस्तारः, तस्य।

का सगा-सम्बन्धी शाइस्ता खाँ दक्षिण देश का शासक बनाकर वहाँ भेजा जा रहा है। महाराष्ट्र देश के रत्न, यवनों के रुधिर की प्यासी तलवार वाले, वीरता रूपी नायिका की माँग में सुन्दर चटकीला सिन्दूर लगाने से देदीप्यमान भुजाओं वाले, मराठों के मुकुटमणि, योद्धाओं के आभूषण, नीतियों के निधान, निपुणताओं के कुलगृह, परम उत्साहों के सागर, प्रातःस्मरणीय, सनातनधर्म के दृढ़तम पालक, अवतार धारण कर आये शिव के समान, महाराज शिवाजी पूना नगर के निकट ही सिंहगढ़ में सेनासहित रह रहे हैं। बीजापुर-नरेश के साथ इस समय इनकी शत्रुता बढ़ी हुई है। 'या तो कार्य को ही पूरा करूँगा, या देह को ही नष्ट कर डालूँगा' यह इनकी सारगर्भित गम्भीर प्रतिज्ञा है। सतियों, सज्जनों,

मेवाऽऽश्रयः। इयमेव वर्तमाना दशा भारतवर्षस्य। किमधिकं विनिवे यामो योग-बलावगत-सकल-गोप्यतम-वृत्तान्तेषु योगिराजेषु" इ कथयित्वा विरराम।

तदाकर्ण्य विविध-भाव-भङ्ग-भासुर-वदनो योगिराजो मुनिरा तत्सहचरांश्च निपुणं निरीक्ष्य, तेषामपि शिववीरान्तरङ्गतामङ्गीकृत मुनिवेषव्याजेन स्वधर्मरक्षाव्रतिनश्चोररीकृत्य "विजयतां शिववी सिद्ध्यन्तु भवतां मनोरथाः" इति मन्दं व्याहार्षीत्।

अथ "किमपि पिपृच्छिषामी"ति शनैरभिधाय बद्धकरसम् सोत्कण्ठे जटिलमुनौ "अवगतम्, यवनयुद्धे विजय एव, दैवादाप ग्रस्तोऽपि च सखिसाहाय्येनाऽऽत्मानमुद्धरिष्यति" इति समभ णीत्। मुनिश्च 'गृहीतमि'त्युदीर्य, पुनः किञ्चिद् विचार्येव, स्मृत्वेव दीर्घमुष्णं निःश्वस्य, रोरुध्यमानैरपि किञ्चिदुद्गतैर्बाष्पबिन्दु

योगबलेन=योगसामर्थ्येन, अवगतः=विज्ञातः, सकलो गोप्यतमः=रहस्यात्म वृत्तान्तो यैस्तेषु। दीर्घमुष्णं निःश्वस्य, गभीरशोकद्योतकमिदम्। रोरुद्ध्यमानैः

द्विज आर्यों, धर्म और भारतवर्ष की आशाओं के एकमात्र आधार यही हैं भारतवर्ष की यही वर्तमान दशा है। आप योगिराज हैं और योगबल से स अत्यन्त गोप्य वृत्तान्त भी जानते हैं, अतः आपसे अधिक क्या कहना ?" कह कर मुनि चुप हो गये।

यह वृत्तान्त सुनकर, योगिराज का मुख विविध भाव-भङ्गियों से खि उठा। उन्होंने मुनि और उनके साथियों को गौर से देखकर, उन्हें भी शिवा के अन्तरङ्ग सहायक समझ कर, और मुनि के वेष के बहाने अपने धर्म की र करने में कटिबद्ध जानकर, धीरे से 'वीर शिवाजी की जय हो, आपके मनो पूरे हों' यह कहा।

तत्पश्चात्, धीरे से, 'मैं कुछ पूछना चाहता हूँ' यह कहकर, जटाधा मुनि के उत्कण्ठापूर्वक हाथ जोड़ने पर योगिराज बोले, "समझ लि यवन-युद्ध में शिवाजी की जीत ही होगी, दुर्दैव से आपत्तिग्रस्त होकर मित्रों की सहायता से वे अपने को उबार लेंगे।' मुनि ने भी, 'भगवन्! स गया' यह कह कर, पुनः कुछ विचार-सा करके, कुछ स्मरण-सा करके, ल

राकुलनयनो "भगवन्! प्रायो दुर्लभो युष्मादृक्षाणां साक्षात्कार इत्यपराऽपि पृच्छाऽऽच्छादयति माम्" इति न्यवेदीत्। स च "आम्! ऊरीकृतम्, जीवति सः, सुखेनैवाऽऽस्ते" इत्युदतीतरत्। अथ "तं कदा द्रक्ष्यामि" इति पुनः पृष्टवति "तद्विवाहसमये द्रक्ष्यसि" इत्यभिधाय, बहूनि सान्त्वना-वचनानि च गम्भीर-स्वरेणोक्त्वा, सपदि उपत्यकाम्, गण्डशैलान्, अधित्यकां चाऽऽरुह्य पुनस्तस्मिन्नेव पर्वतकन्दरे तपस्तप्तुं जगाम।

ततः शनैः शनैर्नियतिष्वपरिचितजनेषु, संवृत्ते च निर्मक्षिके, मुनिर्गौरबटुमाहूय, विजयपुराधीशाऽऽज्ञया शिववीरेण सह योद्धुं ससेनं प्रस्थितस्य अपजलखानस्य विषये यावत् किमपि प्रष्टुमियेष, तावत् पादचारध्वनिमिव कस्याप्यश्रौषीत्। तमवधार्याऽन्यमनस्के इव मुनौ

भृशं वार्यमाणैः। ऊरीकृतम्=स्वीकृतम्। उदतीतरत्=उत्तरयाञ्चकार। सान्त्वना-वचनानि=सामवाक्यानि। उपत्यकाम्=अद्रेरधः सन्निहितां भूमिम्। गण्डशैलान्=पर्वतात् पतितान् स्थूलपाषाणान्। "गण्डशैलास्तु च्युताः स्थूलोपला गिरेरि"त्यमरः। अधित्यकाम्=अद्रेरूर्ध्वां भूमिम् "उपाधिभ्यां त्यकन्नासन्नारूढयोरि"त्युभयत्रापि त्यकन्। "उपत्यकाऽद्रेरासन्ना भूमिरूर्ध्वमधित्यके"त्यमरः। निर्मक्षिके=मक्षिकाणामभावो निर्मक्षिकं तस्मिन्, एकान्ते। मानवसञ्चारदेशे सर्वत्र मक्षिकास्तिष्ठन्तीति तदभावेन

और गरम साँस लेकर, रोके जाने पर भी कुछ निकल आये अश्रुकणों से आकुल-नेत्र होकर निवेदन किया: 'भगवन्! आपके समान महात्माओं का दर्शन दुर्लभ है, अतः एक और प्रश्न मुझे उत्सुक कर रहा है।' योगिराज के 'हाँ; स्वीकार किया, वह जीवित है, सुखपूर्वक ही है।' यह उत्तर देने पर, मुनि ने फिर पूछा: 'उसे कब देखूँगा?' 'उसके विवाह के समय देखोगे।' यह कह कर, गम्भीर स्वर से अनेक प्रकार के आश्वासन देकर, योगिराज उसी समय पर्वत की घाटी, पर्वत से गिरी हुई बड़ी-बड़ी शिलाओं और पर्वत के ऊपर की भूमि पर चढ़कर पुनः उसी गुफा में तपस्या करने चले गये।

उसके बाद, अपरिचित लोगों के धीरे-धीरे चले जाने और एकान्त हो जाने पर, मुनि ने ज्यों ही गौरबटु को बुला कर, बीजापुरनरेश की आज्ञा से वीर शिवाजी के साथ लड़ने के लिये सेना के साथ कूच कर चुके अफ़जल खाँ के विषय में कुछ पूछना चाहा कि किसी के पैरों की आहट सुनाई दी।

गौरबटुरपि तेनैव ध्वनिना कर्णयोः कृष्ट इव समुत्थाय, निपुणं परि
निरीक्ष्य, पर्य्यटच, 'कोऽयम् ?' इति च साम्रेडं व्याहृत्य, कमप्यनव
लोक्य, पुनर्निवृत्य, 'मन्ये मार्जारः कोऽपि' इति मन्दं गुरवे निवे
पुनस्तथैवोपविवेश। मुनिश्च 'मा स्म कश्चिदितरः श्रौषीत्' इ
सशङ्कः क्षणं विरम्य पुनरुपन्यस्तुमारेभे--

"वत्स गौरसिंह ! अहमत्यन्तं तुष्यामि त्वयि, यत् त्वमेका
अपजलखानस्य त्रीनश्वान् तेन दासीकृतान् पञ्च ब्राह्मणतनयां
मोचयित्वा आनीतवानसीति। कथं न भवेरीदृशः ? कुलमेवेदृ
राजपुत्रदेशीयक्षत्रियाणाम्"। तावत् पुनरश्रूयत मर्मरः पादक्षेपश्च
ततो विरम्य, मुनिः स्वयमुत्थाय, प्रोच्चं शिलापीठमेकमारुह्
निपुणतया परितः पश्यन्नपि कारणं किमपि नावलोकयामा
चरणाक्षेपशब्दस्य। अतः पुनरेकतानेन निपुणं निरीक्षमाणेन गौ

जन-सञ्चाराभावो लक्ष्यते। श्रौषीत्=मा आकर्णयतु। उपन्यस्तुम्
कथयितुम्। राजपुत्रदेशः=राजपुत्रशब्दापभ्रंशीभूतो लोके सम्प्र
"राजपूताना" इति प्रसिद्धशब्दव्यपदेश्यो देशः। मर्मरः=शुष्कपर्णध्वनि
"अथ मर्मरः। स्वनिते वस्त्रपर्णानामि"त्यमरः। एकतानेन=एकचित्ते

उसे सुन कर मुनि के अन्यमनस्क से हो जाने पर, वह गोरा ब्रह्मचारी उ
ध्वनि से आकृष्ट हुआ-सा उठ कर, चारों ओर भलीभाँति देख कर, टहल क
बार-बार 'कौन है' कह कर, किसी को न पाकर, फिर लौट कर, गुरु से, धी
से, 'मालूम होता है कोई बिल्ली है, यह कह कर, फिर वैसे ही ब
गया। मुनि ने भी 'कोई दूसरा न सुन ले' इस आशङ्का से थोड़ी देर रु
कर फिर कहना शुरू किया :

"बेटा गौरसिंह ! मैं तुम पर बहुत प्रसन्न हूँ। तुम अकेले
अफजल खाँ के तीन घोड़ो और उसके द्वारा दास बनाये गये प
ब्राह्मण बालकों को छुड़ा कर ले आये। तुम ऐसे क्यों न हो
राजपूताने के क्षत्रियों का कुल ही ऐसा है।" इसी बीच मर्मर ध्वनि और प
की आहट पुनः सुनाई दी। तब बोलना बन्द कर, मुनि ने स्वयं उठकर ए
ऊँची शिला पर चढ़कर, चारों ओर भलीभाँति देखा, पर पैरों की आ
का कोई कारण नहीं दिखाई दिया। इसलिए, एकाग्रचित्त होकर नि

सिहेन दृष्टम्, यत् कुटीर-निकटस्थ-निष्कुटक-कदलीकूटे द्वित्रास्तरवोऽतितरां कम्पन्ते इति। तदेव संशयस्थानमित्यङ्गुल्या निर्दिश्य, कुटीर-वलीके गोपयित्वा स्थापितानामसीनामेकमाकृष्य, रिक्तहस्तेनैव मुनिना पृष्ठतोऽनुगम्यमानः कपोल-तल-विलम्बमानान् चक्षुश्चुम्बिनः कुटिल-कचान् वामकराङ्गुलिभिरपसारयन्, मुनिवेषोऽपि किञ्चित् कोप-कषायित-नयनः, कर-कम्पित-कृपा-कृपण-कृपाणो महादेवमारिराधयिषुस्तपस्विवेषोऽर्जुन इव शान्तवीररस-ह्रयस्नातः सपदि समागतवान् तन्निकटे, अपश्यच्च लता-प्रतान-वितान-वेष्टित-रम्भा-स्तम्भ-त्रितयस्य मध्ये नीलवस्त्र-खण्ड-वेष्टित-

निष्कुटा एव निष्कुटकाः=गृहारामाः, "गृहारामास्तु निष्कुटाः" इत्यमरः, कुटीरनिकटे तिष्ठन्तीति कुटीरनिकटस्थाश्च ते गृहारामास्तेषु, कदलीनाम्=रम्भाणाम्, कूटे=समूहे। वलीके=पटले। 'वलीकनीध्रे पटलप्रान्ते" इत्यमरः। 'छप्पर की ओरी" इति हिन्दी।

रिक्तहस्तेन=शून्यकरेण। कपोलतल-विलम्बमानान्=गण्ड-लग्नान्। किञ्चित्कोपेन=ईषत्क्रोधेन, कषायिते=कलुषिते, नयने=नेत्रे, यस्य सः। करे कम्पितः कृपाकृपणः=दयाशून्यः, कृपाणः=असिर्यस्य सः। आरिराधयिषुः=सेवितुमिच्छुः। शङ्करसमाराधाय करकलितचापो मध्यमपाण्डवस्तपश्चचारेति महाभारतीया कथा किरातार्जुनीयमहाकाव्यमूलभूता। पूर्णोपमा। लतानाम्=वल्लीनाम्, "वल्ली तु व्रततिर्लते"त्यमरः,

भलीभाँति देखते हुए गौरसिंह ने देखा कि कुटी के निकट की गृहवाटिका केलों के झुरमुट में दो-तीन पेड़ बहुत अधिक हिल रहे हैं। 'सन्देह का स्थान वही है' ऐसा उँगली के इशारे से बताकर, छप्पर की ओरी में छिपाकर रखी गयी तलवारों में से एक तलवार खींच कर गौरसिंह उसी ओर चल दिया। मुनि खाली हाथ ही उसके पीछे हो लिये। गालों पर लटकते और आँखों पर आ जाने वाले अपने घुँघराले बालों को बाँयें हाथ की उंगुलियों से सँभालते हुए, मुनिवेष में होते हुए भी कुछ क्रोध से लाल नेत्र किये हुए, हाथ में निर्दय तलवार लिये हुए, महादेव की आराधना करने के लिए तपस्वी वेषधारी अर्जुन के समान शान्त और वीर दोनों रसों से सराबोर गौरसिंह, झट उसके समीप पहुचा और वहाँ आकर उसने लताओं की विस्तृत बेलों से वेष्टित केले के तीन पेड़ों के बीच, नीले कपड़े के

मूर्द्धानं हरित-कञ्चुकं श्याम-वसनानद्ध-कटितट-कर्बुराधोवसनम् काकासनेनोपविष्टम्, रम्भालवाल-लग्नाधोमुख-खड्ग त्सरुन्यस्त विपर्यस्त-हस्त-युगलम्, लशुनगन्धिभिर्निश्वासैः कदली-किसलयानि मलिनयन्तम्, नवाङ्कुरित-श्मश्रु-श्रेणि-च्छलेन कन्यकापहरण-प कलङ्कपङ्क-कलङ्किताननम्, विंशतिवर्ष-कल्पं यवनयुवकम् । त

प्रतानानि = सूक्ष्मतन्तवस्तेषाम्, वितानम् = विस्तारः, तेन वेष्टितम् = यितम्, रम्भास्तम्भानां त्रितयम् = कदलीस्तम्भत्रयं, तस्य । यवनयु मपश्यदित्यन्वयः । तमेव विशिनष्टि—नील्या रक्तं नीलं, तच्च वस्त्रखण तेन वेष्टितो मूर्धा यस्य तम् । हरितः = हरिद्वर्णः, कञ्चुकः = चो यस्य तम् । "अङ्गरखा, चोंगा" इति हिन्दी । श्यामवसनेन = कृष्णव "वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकमि"त्यमरः, आनद्धम् = आ दितम्, कटितटे कर्बुरम् = अनेकवर्णम्, "चित्रं किर्मीर-कल्माषश ताश्च कर्बुर" इत्यमरः, अधोवसनम् = नाभ्यूरुजङ्घाच्छादनम्, "त लुङ्गी" इति हिन्दी, यस्य तम् । काकासनेन = चिबुकार्पितजानुयुगलास रम्भाया आलवाले = आवापे, "स्यादालवालमावाप" इत्यमरः, वृक्ष मूले समन्ततोऽम्भसां धारणार्थं वेष्टनमालवालम्, "ओटा" इति हिन्दी, अ मुखस्य = निम्नाननस्य, खड्गस्य त्सरौ = मुष्टौ, "तलवार की मूंठ" हिन्दी "त्सरुः खड्गादिमुष्टौ स्यादि"त्यमरः । विशिष्टवाचकानां श सति विशेषणे विशेष्यमात्रपरत्वमित्यभियुक्ताभ्युपगमात् प्रकृतेऽधिकपददोष नवकाशः । न्यस्तम् = स्थापितम्, विपर्यस्तम् = न्युब्जीभूतम् हस्तयुगल करद्वयं यस्य तम् । लशुनस्य गन्ध इव गन्धो येषां तैः, किसलयानि = पल्लवानि । नवाङ्कुरितायाः = नवस्फुरितायाः, श्मश्रुश्रेण्याः छले कन्यकाया अपहरणरूपं यत् पङ्कम् = पापम् "अस्त्री पङ्कं पुमान् प

टुकड़े को सिरपर लपेटे हुए, हरे रंग का कुर्ता पहने हुए, कमर में काला बाँधे हुए, चितकबरे रंग की लुङ्गी पहने हुए, काकासन से (घुटनों में ठोढ़ी डालकर, सिकुड़कर) बैठे हुए, केले के थाले पर अधोमुख रखी की मूठ पर दोनों हाथ उलटे रखे हुए, लहसुन की दुर्गन्ध से युक्त निश्व कदलीवृक्ष के पल्लवों को मलिन करने वाले जरा-जरा सी निकलती रेखा और दाढ़ी) के बहाने कन्यापहरण रूप पापकर्म से उत्पन्न अपयश रूपी

परस्परं चाक्षुषे सम्पन्ने दृष्टोऽहमिति निश्चित्य, उत्प्लुत्य, कोशात् कृपाणमाकृष्य, युयुत्सुः सोऽपि सम्मुखमवतस्थे। ततस्तयोरेवं सञ्जाताः परस्परमालापाः।

गौरसिंहः—कुतो रे यवन-कुल-कलङ्क!

यवन-युवकः—आः! वयमपि कुत इति प्रष्टव्याः? भारतीय-कन्दरिकन्दरेष्वपि वयं विचरामः, शृङ्ग-लाङ्गूल-विहीनानां हिन्दुपद-व्यवहार्याणां च युष्मादृक्षाणां पशूनामाखेटक्रीडया रमामहे।

गौरसिंहः—[सक्रोधं विहस्य] वयमपि तु स्वाङ्कागतसत्त्ववृत्तयः

इत्यमरः, तस्य यः कलङ्कः=दुर्यशः। स एव पङ्कः=कर्दमः, "पङ्कोऽस्त्री शादकर्दमावि"त्यमरः, तेन कलङ्कितम्=भ्रष्टम्, आननं यस्य तम्। मुख-समुद्भूतश्मश्रूणां कलङ्कपङ्कत्वेनोत्प्रेक्षा। विंशतिवर्षकल्पम्=प्रायो विंशतिवर्ष-वयस्कम्। चाक्षुषे=चक्षुरिन्द्रियजन्यप्रत्यक्षे। उत्प्लुत्य=उत्पत्य। "कूद कर" इति हिन्दी। युयुत्सुः=योद्धुमिच्छुः, अवतस्थे=स्थितः, "समवप्रविभ्यः स्थः" इत्यात्मनेपदम्। भारतीयाः=भारतभवाः, ये कन्दरिणः=शैलास्तेषां कन्दरेषु=गुहासु। आखेटक्रीडया=मृगयाखेलया। स्वाङ्के आगताः सत्त्वाः=प्राणिन एव वृत्तयः=जीवनसाधनानि, येषां ते। दीर्घश्चासौ

कलङ्कित मुखवाले, लगभग बीस वर्ष की उम्र के एक मुसलमान युवक को देखा। तदनन्तर सामना हो जाने पर, 'मैं देख लिया गया हूँ' यह समझकर, घोड़े पर से कूदकर म्यान से तलवार खींचकर, वह मुसलमान युवक भी लड़ने के लिए सामने खड़ा हो गया। तदनन्तर उन दोनों की आपस में इस प्रकार बातचीत हुई :

गौरसिंह—क्यों रे यवन-कुलकलङ्क! यहाँ कहाँ से आया?

यवनयुवक—अरे! हमसे भी 'कहाँ' से पूछता है? हम भारतवर्ष की पर्वतगुफाओं में भी विचरण करते हैं, और हिन्दू नामधारी तुम जैसे सींग-पूछ हीन पशुओं का शिकार कर आनन्द मनाते हैं।

गौरसिंह—(क्रोधपूर्वक हँसकर) पास में आये हुए दुष्ट जीवों पर ही

शिवस्य गणा अत्रैव निवसामः, तत् सुप्रभातमद्य, स्वयमेव त्वं दी
दाव-दहने पतङ्गायितोऽसि ।

यवनयुवकः--अरे रे वाचाल! ह्यो रात्रौ युष्मत्कुटीरे रुदतीं सम
यातां ब्राह्मण-तनयां सपदि प्रयच्छथ, तत् कदाचिद् दयया जीवतो
त्यजेयम्, अन्यथा मदसिभुजङ्गिन्या दष्टाः क्षणात् कथावशे
संवत्स्यंथ ।

कलकलमेतमाकर्ण्य श्यामवटुरपि कन्यासमीपादुत्थाय दृष्ट्वा
हन्तुमेतं यवनवराकं पर्य्याप्तोऽयं गौरसिंह इति मा स्म गमदन्यो
कश्चित् कन्यकामपजिहीर्षुरिति वलीकादेकं विकटखड्गमाकृष्य त
गृहीत्वा कन्यकां रक्षन्, तदध्युषित-कुटीर-निकट एव तस्थौ ।

दावदहनः=वनाग्निस्तस्मिन् । "दवदावौ वनानले" इत्यमरः । जीवतः,
रूपमिदम्=युष्मानित्यध्याह्रियमाणविशेष्यस्य विशेषणम् । मद
भुजङ्गिनी=सर्पिणी, तया । रूपकम् । संवत्स्यंथ, "वृद्भ्यः स्यसनोरि
परस्मैपदम्, "न वृद्भ्यश्चतुर्भ्यः" इतीण्निषेधः ।

कलकलम्=कोलाहलम् । वलीकात्=पटलप्रान्तात्, तया=कन्य
अध्युषितस्य=सेवितस्य, कुटीरस्य निकटे तस्थौ=स्थितः ।

जीवित रहने वाले शिव के गण रूप हम लोग भी तो यहीं रहते हैं, तो
की सुवह वहुत शुभ है, तुम स्वयं ही घघकती दावाग्नि में पतंग की तरह
आ गये हो ।

यवनयुवक—अरे वकवादी ! कल रात जो ब्राह्मण की लड़की
हुई तुम्हारी कुटी में आई थी, उसे तुरन्त मेरे हवाले कर दो, तो शायद
करके तुम्हें जीता छोड़ दूँ, नहीं तो क्षण भर में ही मेरी इस नागिन सी त
से डसे गये तुम्हारी सिर्फ कहानी ही वाकी वचेगी ।

यह कोलाहल सुनकर, साँवला ब्रह्मचारी भी, वालिका के पास से उठ
यवनयुवक और गौरसिंह को देखकर, यवनयुवक का काम समाप्त कर
के लिए अकेले गौरसिंह को ही काफी समझ कर, वालिका का अपहरण
कोई दूसरा यवन भी न आ जाय, यह सोचकर छप्पर की ओरी से एक
तलवार खींचकर उसकी मूँठ पकड़कर, वालिका की रक्षा करता हुआ
कुटी में वालिका थी, उसके समीप ही खड़ा हो गया ।

गौरसिंहस्तु "कुटीरान्तः कन्यकाऽस्ति, सा च यवन-वध-व्यसनिनि मयि जीवति न शक्या द्रष्टुमपि, किं नाम स्प्रष्टुम्? तद् यावत् तव कवोष्ण-शोणित-तृषित एष चन्द्रहासो न चलति, तावत् कूर्द्दनं वा, उत्फालं वा यच्चिकीर्षसि तद् विधेहि" इत्युक्त्वा व्यालीढ-मर्य्यादया सज्जः समतिष्ठत।

ततो गौरसिंहः दक्षिणान् वामांश्च परश्शतान् कृपाणमार्गानङ्गी-कृतवतः, दिनकर-कर-स्पर्श-चतुर्गुणीकृत-चाकचक्यैः चञ्चच्चन्द्रहास-चमत्कारैश्चक्षूंषि मुष्णतः, यवन-युवक-हतकस्य, केनाप्यनुपलक्षितो-द्योगः, अकस्मादेव स्वासिना कलित-क्लेद-सञ्जात-स्वेदजल-जालं

यवनानां वध एव व्यसनं यस्य तादृशे। कवोष्णस्य=ईषदुष्णस्य, "कोष्णं कवोष्णं मन्दोष्णं कदुष्णं त्रिषु तद्वति" इत्यमरः। शोणितस्य=लोहितस्य, तृषितः=पिपासितः। चन्द्रहासः=खड्गः="खड्गे तु निस्त्रिंशचन्द्रहासासि-रिष्टयः" इत्यमरः। कूर्दनं वा उत्फालं वा="कूदना, उछलना" इति हिन्दी। व्यालीढं=युद्धावस्थानविशेषः, तन्मर्यादया। कोदण्डमण्डनादिषु प्रसिद्धमिदम्। "पैंतरा" इति हिन्दी।

दिनकरकराणाम्=सूर्यकिरणानाम्, स्पर्शेन चतुर्गुणीकृतम्—वर्धितम्, चाकचक्यम्=प्रतिभासविशेषो यैस्तैः। चञ्चच्चन्द्रहासचमत्कारैः= सञ्चरत्खड्गचमत्कारैः। मुष्णतः=चोरयतः। हतकस्य=दुष्टस्य। केनापीत्य-नुपलक्षितविशेषणम्। "सविशेषणानां वृत्तिर्न" इति तु न नित्यसापेक्षस्थल इति सुव्यक्तमेव। स्वासिना शिरश्चिच्छेदेत्यन्वयः। शिरो विशिनष्टि—कलितेन= व्याप्तेन, क्लेदेन=श्रमेण, सञ्जातस्य=उत्पन्नस्य, स्वेदजलस्य=घर्मजल-

गौरसिंह—"वालिका कुटी के भीतर है, यवनों के वध के व्यसनी मेरे जीते जी तू उसे छूना तो दूर, देख भी नहीं सकता। जब तक तेरे गरम खून की प्यासी यह तलवार नहीं चलती तब तक चाहे जो उछल-कूद मचा ले," यह कहकर पैंतरा बना कर, तैयार हो गया।

तब गौरसिंह ने, तलवार के, दायें वायें सैकड़ों पैंतरे बदलने वाले, सूर्य की किरणों के सम्पर्क से जिसकी चमक चौगुनी हो रही थी, ऐसी चलती हुई तलवार की चमचमाहट से आँखों को चौंधिया रहे उस दुष्ट यवन के, श्रम

विशिथिल-कच-कुल-मालं भग्न-भ्रू-भयानक-भालं शिरश्चिच्छेद।

अथ मुनिरपि दाडिम-कुसुमास्तरणाच्छन्नायामिव गाढ-रुधि दिग्धायां ज्वलदङ्गार-चितायां चितायामिव वसुधायां शयानं वियुज्य मान—भारतभुवमालिङ्गन्तमिव निर्जीवीभवदङ्गबन्ध-चालनप शोणित-सङ्घात-व्याजेनान्तः-स्थित-रजोराशिमिवोद्गिरन्तं कलि

स्य, "घर्मो निदाघः स्वेदः" इत्यमरः, जालम् = समूहो यस्मिंस्तत्। विशि लाः = इतस्ततः परिभ्रष्टाः, कचानाम् = केशानाम्, कुलस्य = समूह माला = पङ्क्तिः, यस्मिंस्तत्। भग्नया = छिन्नया, भ्रुवा = दृगूर्ध्वभागेन, "ऊ र्ध्वं दृग्भ्यां भ्रुवौ स्त्रियौ" इत्यमरः, भयानकम् = भीषणम्, भालम् = ललाट यस्मिंस्तत्। जालम् मालम् भालमित्यत्र यमकम्।

वसुधायाम् = पृथिव्याम्। शयानम् = पतितम्। वसुधां विशिनष्टि गाढेन = घनीभूतेन, रुधिरेण = लोहितेन, दिग्धायाम् = लिप्तायाम्। "दिग्ध विषाक्तवाणे स्यात् पुंसि लिप्तेऽन्यलिङ्गक" इति मेदिनी। उत्प्रेक्षते-दाडिमस्य करकस्य, 'दाडिमस्तु त्रिलिङ्गः स्यादेलायां करके त्रिषु' इति मेदिनी, कुसु नाम्, आस्तरणेन=विष्टरेण, आच्छन्नायामिव। पुनरप्युत्प्रेक्षते-ज्वलदङ्गा चितायाम् = व्याप्तायाम्। चितायाम् = चितौ, "चिता चित्या चितिः स्त्रिया इत्यमरः। भस्मीभवनाय न यावनैश्चिता प्राप्यते। हिन्दुकरेण मृत्युमवा कियतः कालस्य कृते सा लब्धाऽनेनेति ध्वनिः। चिन्ताचितयोर्दाहकत्वप लोचनापरमिदं पद्यमनुभवपथपथिकम्-"चिन्ताचिताद्वयोर्मध्येविन्दुमात्रं विशे कम्। सजीवं दहते चिन्ता निर्जीवं दहते चिता॥" यवनहतकं विशिनष्टि निर्जीवीभवताम् = निष्प्राणतां गच्छताम्, अङ्गबन्धानाम् = शरीरसन्धीन चालने, परम् = निरतम्। शोणितसङ्घातव्याजेन = रुधिरप्रवाहच्छले

करने से निकले हुए पसीने में तर, अस्तव्यस्त बालों वाले, टेढ़ी भौहों से भय लगने वाले ललाट से युक्त शिर को अकस्मात् ऐसी सफाई से काट डा कि कोई देख भी न पाया।

तत्पश्चात् मुनि ने भी, अनार के फूलों के बिछौने से ढकी हुई सी, खून से लथपथ हो रही, जलते अंगारों से व्याप्त चिता के समान पृथ्वी लुढ़क रहे, बिछुड़ती हुई भारत भूमि का आलिङ्गन करते हुए से निर्जी रही अंगसंधियों को हिलाते और छटपटाते हुए, रुधिर राशि के बहाने भीत

सायन्तन-घनाऽऽडम्बर-विभ्रमं सतत-ताम्रचूड-भक्षण-पातकेनेव ताम्रीकृतं छिन्न-कन्धरं यवनहतकमवलोक्य सहर्षं ससाधुवादं सरोमोद्गमं च गौरसिंहमाश्लिष्य, भ्रूभङ्गमात्राऽऽज्ञप्तेन भृत्येन मृतककञ्चुक-कटिबन्धोष्णीषादिकमन्विष्याऽऽनीतं पत्रमेकमादाय सगणः स्वकुटीरं प्रविवेश।

इति प्रथमो निश्वासः।

अन्तःस्थितो यो रजोराशिः = रजोगुणसमूहः तमिवेत्युत्प्रेक्षा। उद्गिरन्तम् = वमन्तम्। कलितः = धारितः, सायन्तनस्य = सायम्भवस्य, घनाडम्बरस्य = मेघविडम्बनायाः, विभ्रमः = विलासो येन तम्। सततम् = सर्वदा यं ताम्रचूडस्य = कुक्कुटस्य, "कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः" इत्यमरः, भक्षणम् = अशनम्, तदेव पातकम् = पापं तेनेव, ताम्रीकृतम् = रक्तीकृतम्। छिन्न-कन्धरम् = कृत्तग्रीवम्। सायङ्कालिकसूर्य इव सञ्जातमिति यावत्। कटिबन्धः = जघनपट्टिका, "पेटी" इति हिन्दी। उष्णीषम् = शिरोवेष्टनम्।

निश्वास इति वाक्यविन्यासरूपे गद्यकाव्ये निश्वासप्रश्वासा एव परिच्छेदका भवन्तीति परिच्छेदकानामङ्कसर्गाध्यायादिसंज्ञाः समुपेक्ष्य निश्वाससंज्ञामेवादरयाञ्चकार ग्रन्थकारः। यद्यपि बाणादिभिरुच्छ्वाससंज्ञा गृहीता, किन्तु सा शोक-क्रोधादावेवापेक्षितेति तामपि तत्याज। भवति चात्र प्राचीनं पद्यम्—"प्रौढिप्रकर्षेण पुराणरीति-व्यतिक्रमः श्लाघ्यतमः कवीनाम्" इति ग्रन्थकृच्छिष्यकृता टिप्पणी।

इति शिवराजविजयवैजयन्त्यां प्रथमनिश्वासविवरणम्।

रजोगुण को उगलते हुए से, सायंकालीन मेघ के समान, मानो निरन्तर मुर्गा खाने के पाप से लाल हो गये, कटे हुए सिर वाले, दुष्ट यवन को देखकर, हर्षपूर्वक, शावाशी देते हुए, रोमाञ्चित होकर, गौरसिंह का आलिंगन कर के, आँखों के इशारे मात्र से आज्ञप्त भृत्य द्वारा, मृतक के चोंगे, कमरबन्द और पगड़ी की तलाशी लेकर लाये गये एक पत्र को लेकर, सब के साथ अपनी कुटी में प्रवेश किया।

शिवराजविजय का प्रथम निश्वास समाप्त।

॥ श्रीः ॥

अथ द्वितीयो निश्वासः

रात्रिर्गमिष्यति भविष्यति सुप्रभातम्
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त ! हन्त !! नलिनीं गज उज्जहार ।।—स्फुटकम् ।

कपटपटुरपजलखानः शिवं निग्रहीतुं कीर्तिमर्जयितुं च विहितविविधमनो
श्रीमता शिवेनैव निगृहीतो मृत्युवशगः कृतश्चेति द्वितीयनिश्वासकथाभागो
पायाऽऽदौ "रात्रिर्गमिष्यति" इति पद्यं समुल्लिखति । व्याख्या चास्य निता
सरला । द्विरेफपदं च द्वौ रेफौ यस्मिन्निति व्युत्पत्त्या रेफद्वयवत्त्वेन भ्रमर
पस्थापनद्वारा मधुकरवाचकम्, योगरूढं चेति नेतरतादृशशब्दसङ्ग्रहानुचिन्त
भवति चात्र कोशः 'द्विरेफपुष्पलिड्भृङ्गषट्पदभ्रमरालयः' इति । परे तु
धर्मेण लाक्षणिकं मन्यन्ते; तेषां निरूढिरेव कारणत्वेनाभिप्रेता । अद्यतनान
नोभयविधभविष्यत्स्थले लुट्प्रयोगस्यैवेष्टव्यत्वेऽपि पूर्वं विशेषाविवक्षायां लृटि
विशेषान्वेषणमिति स्थलेष्वीदृशेषु नासाधुत्वविषयकभ्रान्तिरवलम्बनीयेति
अपजलखानः प्रतापदुर्गाविदूर एव तिष्ठति स्मेति सम्बन्धः । अपजल

"रात बीतेगी, सुहावना प्रभात होगा, सूर्य उदित होगा, कमल खिल
(और मैं बाहर निकल आऊँगा)" कमल-कली के अन्दर बन्द भौंरा यह
ही रहा था कि कमल को हाथी ने उखाड़ डाला ।

इतस्तु स्वतन्त्र–यवनकुल–भुज्यमान–विजयपुराधीश–प्रेषितः पुण्यनगरस्य समीपे एव प्रक्षालित–गण्डशैल–मण्डलायाः, निर्झर-वारिधारा–पूर–पूरित–प्रबल–प्रवाहायाः, पश्चिम–पारावार–प्रान्त-प्रसूत–गिरि–ग्राम–गुहा–गर्भ–निर्गताया अपि प्राच्य–पयोनिधि-चुम्बन–चञ्चुरायाः, रिङ्गत्–तरङ्ग–भङ्गोद्भूतावर्त्त–शत–भीमायाः,

विशिनष्टि—स्वतन्त्रम् स्वच्छन्दम् यद् यवनकुलं तेन भुज्यमानस्य = शास्यमानस्य, विजयपुरस्य = तन्नामकनगरस्य, अधीश्वरेण, प्रेषितः = प्रहितः। इदं तात्कालिकस्थितिप्रदर्शनमात्रफलकं न तु साहित्यिकविवेचनया समुपयोगि विशेषणमिति वेदितव्यम्।

भीमाया नीरं कटूकुर्वन्निति सम्बन्धः। नदीं विशिनष्टि-प्रक्षालितानि = धौतानि, गण्डशैलानाम् = गिरिच्युतस्थलशिलानाम् मण्डलानि यया तस्याः। निर्झराणाम् = जलनिर्गमस्रोतसाम्, वारिधारापूरैः = जलधारासमूहैः, पूरितः = भरितः, प्रबलः = वेगवान्, प्रवाहो = यस्यास्तस्याः। पश्चिमश्चासौ पारावारः = समुद्रः "समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः" इत्यमरः, तस्य, प्रान्ते = निकटप्रदेशे यः प्रसूतः = उत्पन्नः, गिरीणां ग्रामः = समूहः, तस्य गुहाः = गह्वराणि, तासां गर्भतः = मध्याद्, निर्गतायाः = समुत्पन्नायाः। प्राच्यः = प्राचीभवः, यः पयोनिधिः, तच्चुम्बने चञ्चुरायाः = चपलायाः। पश्चिमसमुद्रान्निःसृत्य पूर्वसमुद्रं प्रविष्टाया इति वाच्योऽर्थः। एवमुक्तिः पाश्चात्त्यरमणीनां प्राच्यसम्पर्करूपसाम्प्रतिकव्यवहारोपहासाय। रिङ्गताम् = सञ्चलताम्, तरङ्गाणाम् = ऊर्मीणाम्, भङ्गैः = छेदैः,

इधर स्वेच्छाचारी यवनों द्वारा शासित बीजापुर के अधिपति द्वारा भेजा गया, पूना के समीप ही, पर्वतों से गिरे हुए बड़े-बड़े पर्वतों को धोने वाली, झरनों की जलधाराओं से पूर्ण प्रबल प्रवाह वाली, पश्चिमी सागर की तटवर्ती पर्वत श्रेणियों की गुफाओं से निकली हुई भी पूर्वी समुद्र को चूमने को उतावली (पूर्वी समुद्र में गिरने वाली), चञ्चल लहरों के टूटने से उत्पन्न होने वाले सैकड़ों भँवरों के कारण भयंकर लगने वाली भीमा नदी के निरन्तर

भीमाया नद्याः, अनवरत-निपतद्-बकुल-कुल-कुसुम–कदम्ब-सुरभीकृत मपि नीरं वगाहमान-मत्त-मतङ्गज-मद–धाराभिः कटूकुर्वन्; हय-हेषा ध्वनि–प्रतिध्वनि–बधिरीकृत–गव्यूति–मध्यगाध्वनीनवर्गः, पट कुटीर–कूट–विहित–शारदाम्भोधर–विडम्बनः, निरपराध–भारत

उद्भूताः = उत्पन्नाः, ये आवर्ताः = अम्भसां भ्रमाः, तेषां शतैः भीमायाः = भयदायिन्याः। "घोरं भीमं भयानकम्" इत्यमरः। भीमायाः = 'भीमा नामवत्याः। अनवरतम् = सततम्, निपतताम् = प्रच्यवताम्, बकुलकु कुसुमानाम् = वञ्जुल-समूह-सुमनानाम्, कदम्बेन = समूहेन, सुरभीकृतम् = सुगन्धितामापादितम्। वगाहमानानाम् = प्रविशताम्, जलक्रीडां कुर्वता भावः, "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इत्यल्लोपः, मत्तानाम् = मरितानाम्, मतङ्गजानाम् = करिणाम्, मदधाराभिः = दानजलैः। करणे हेतुः। हयानाम् = अश्वानाम्, हेषा = ध्वनिः। यद्यपि हेषाशब्दोऽश्वश "अश्वानां हेषा ह्रेषा च निःस्वनः" इत्यमरात् तथा चाश्वशब्दोच्चारणमनर्थ तम्, तथापि विशिष्टवाचकपदानां सति विशेषणवाचकपदान्तरप्रयोगे विशे मात्रपरत्वस्य "सकीचकैर्मारुतपूर्णरन्ध्रैः" इत्यादिषु दृष्टत्वेन केवलनिःस्वनवा कत्वेन नाश्वशब्दवैयर्थ्यमिति वेदितव्यम्।

तद्ध्वनिप्रतिध्वनिभिः बधिरीकृतः = श्रुतिसामर्थ्यविकलीकृ गव्यूतिमध्यगः = क्रोशद्वयान्तरालवर्ती, "गव्यूतिः स्त्री क्रोशयुगम्" इत्यम अध्वनीनवर्गः = पथिकसमूहो येन सः। पटकुटीराणाम् = उपका काणाम्, "उपकार्योपकारिका" इत्यमरः, कूटैः = समूहैः, विहिता, शा दाम्भोधराणाम् = शरन्मेघानाम्, निर्जलत्वेन श्वेतवर्णानामिति तात्पर्य

गिर रहे बकुल पुष्पों से सुगन्धित जल को जलक्रीडा कर रहे मदमत्त हा की मदधारा से कटु बनाता हुआ, घोड़ों के हिनहिनाने की आवाज की प्रतिध्व से दो कोस तक के यात्रियों को बहरा बना देनेवाला, सफेद खेमों के समूह शरद के बादलों का उपहास करने वाला, निरपराध भारतीय जनता के उत्पी

ऽभिजन-जन-पीडन-पातक-पटलैरिव समुद्धूयमान-नीलध्वजैरुपलक्षितः, विजयपुरेश्वरस्यान्यतमः सेनानीः अपजलखानः प्रतापदुर्गादविदूर एव शिववीरेण सहाऽऽहवद्यूतेन चिक्रीडिषुः ससेनस्तिष्ठति स्म ।

अथ जगतः प्रभाजालमाकृष्य, कमलानि सम्मुद्रय, कोकान् सशोकीकृत्य, सकल-चराचर-चक्षुःसञ्चार-शक्ति शिथिलीकृत्य, कुण्डलेनेव निज-मण्डलेन पश्चिमामाशां भूषयन्, वारुणी-सेवने-

विडम्बना = अनुकृतिर्येन सः । समुद्धूयमानैः = कम्पमानैः, नीलध्वजैः = नीलपताकाभिः, उपलक्षितः = युतः । उत्प्रेक्षते—निरपराधानाम् = निर्दोषाणाम्, भारताभिजनानाम् = भारतीयानाम् । यत्र पूर्वंरुपितं तदभिजनात्मना-ऽऽख्यायते । तिष्ठति स्म = अतिष्ठत् । 'लट् स्मे' इति स्मयोगे लट् । अन्यतमः = अनेकेष्वेकः । आहवद्यूतेन = युद्धदुरोदरेण ।

अथ भगवान् भास्वान् चक्षुषामगोचर एव सञ्जात इति सम्बन्धः । जगतः = संसारस्य । प्रभाजालम् = दीप्तिसमूहम् । आकृष्य = आकुञ्च्य । सम्मुद्रय = सङ्कोच्य । कोकान् = चक्रवाकान् । "कोकश्चक्रश्चक्रवाकः" इत्यमरः । सशोकीकृत्य = दुःखिनो विधाय । दम्पत्योः परस्परं वियोगेन शोकः । सकलस्य, चराचरस्य = स्थावरजङ्गमात्मकस्य । चक्षुषाम् = नेत्राणाम् । सञ्चारस्य = कार्यकरणस्य, दर्शनस्येति यावत्, शक्तिम् = सामर्थ्यम् । कुण्डलेन = कर्णभूषणेन । 'कुण्डलं कर्णभूषणम्' इत्यमरः । पश्चिमा चासौ,

उत्पन्न पापराशि के समान नीली पताकाओं से पहचाना जाने वाला, बीजापुराधीश का प्रधान सेनापति अफ़ज़ल खाँ, शिवाजी के साथ युद्धरूपी जुआ खेलने की इच्छा से, प्रताप दुर्ग के समीप ही सेना के साथ पड़ाव डाले हुए था ।

तदुपरान्त, संसार के प्रकाश-समूह को खींच कर कमलों को संकुचित कर, चक्रवाकों को शोकमग्न कर, सम्पूर्ण जड-चेतन जगत् की दर्शन-शक्ति को शिथिल कर, अपने कुण्डल सदृश मण्डल से पश्चिम दिशा को अलंकृत करते हुए, मानो वारुणी (पश्चिम दिशा और मदिरा) के सेवन के कारण

नेव माञ्जिष्ठ-मञ्जिम-रञ्जितः, अनवरत-भ्रमण-परिश्रम-श्रान्त
इव सुषुप्सुः, म्लेच्छ-गण-दुराचार-दुःखाऽऽक्रान्त-वसुमती-वेदनाम्
समुद्रशायिनि निविवेदयिषुः, वैदिक-धर्म-ध्वंस-दर्शन-सञ्जात-निर्वे
इव गिरिगह्नेषु प्रविश्य तपश्चिकीर्षुः, घर्म-ताप-तप्त इव समुद्र
सिस्नासुः, सायं समयमवगत्य सन्ध्योपासनमिव विधित्सुः, "नाति

आशा=काष्ठा,ताम् । "दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः" इत्यम
वरुणस्येयं वारुणी= पश्चिमा दिग् मद्यं च, "सुरा प्रत्यक् च वारुणी" इत्यम
मञ्जिष्ठाया:=मण्डूकपर्ण्याः, "मजीठ" इति हिन्दी, अयं माञ्जिष्ठः, स चा
मञ्जिमा=रक्तिमा, तेन रञ्जितः=रक्तः । यथा जनो वारुणी–(सुरा)
पानानन्तरं शोणवर्णो भवति तथा भास्करोऽपि वारुणी-(पश्चिमा)—संसर्गा
शोणः सञ्जात इत्युत्प्रेक्षा । अनवरत-भ्रमण-परिश्रम-श्रान्तः=सततचलनखे
खिन्नः । सुषुप्सुः=स्वप्तुमिच्छुः । स्वाभाविकी चरमाचलप्राप्तिः खेदकारणक
नेच्छावत्त्वेनोत्प्रेक्षिता । म्लेच्छगणस्य=यवनसमूहस्य,दुराचारैः=असदाच
गोहननमन्दिरध्वंसनादिभिः, दुःखाक्रान्तायाः=कष्टपीडितायाः, वसुमत्याः
पृथिव्याः, वेदनाम्=पीडाम् । समुद्रशायिनि=विष्णौ । निविवेदयिषुः
निवेदयितुमिच्छुः । स इवेत्युत्प्रेक्षा । पत्नीक्लेशस्य पत्यावेव निवेदनीयत्वाद्
भावः । वैदिकधर्मस्य=सनातनधर्मस्य, ध्वंसदर्शनेन=विनाशावलोकने
सञ्जातः=समुत्पन्नः, निर्वेदः=वैराग्यं यस्य स इव । गिरिगह्नेषु=पर्व
दुर्गमेषु । चिकिर्षुः=कर्तुमिच्छुः । सिस्नासुः=स्नातुमिच्छुः । सर्वो हि त

मजीठ की-सी लालिमा से लाल, निरन्तर भ्रमण करने के परिश्रम से थके से
के इच्छुक, मानो म्लेच्छों के अनाचारों से दुःखी पृथ्वी की वेदना को समुद्र में
रहे भगवान् से कहने के इच्छुक, मानो वैदिक धर्म के ह्रास को देखकर खिन्न हो
दुर्गम पर्वतों में जाकर तप करने के इच्छुक, मानो धूप की गर्मी से सन्तप्त
के कारण समुद्र के जल में स्नान करने के इच्छुक, सायंकाल का समय हुआ

कोऽपि मत्कुले; यः सकण्ठग्रहं धर्म-ध्वंसिनो यवनहतकान् यज्ञियाद-स्माद् भारत-गर्भान्निस्सारयेत्" इति चिन्ताऽऽक्रान्त इव कन्दरि-कन्द-रेषु प्रविविक्षुर्भगवान् भास्वान्, क्रमशः क्रूरकरानपहाय, दृश्य-परिपूर्ण-मण्डलः संवृत्य, श्वेतीभूय, पीतीभूय, रक्तीभूय च गगन-धरातला-भ्यामुभयत आक्रम्यमाण इवाऽण्डाकृतिमङ्गीकृत्य, कलि-कौतुक-कवलीकृत-सदाचार-प्रचारस्य पातकपुञ्ज-पिञ्जरित-धर्मस्य च यवन-गण-ग्रस्तस्य भारतवर्षस्य च स्मारयन्, अन्धतमसे च जगत् पातयन्, चक्षुषामगोचर एव सञ्जातः।

स्नातुमिच्छति। अवगत्य = ज्ञात्वा। विधित्सुः = चिकीर्षुः। सकण्ठ-ग्रहम् = कण्ठं गृहीत्वा। अर्धचन्द्रं दत्त्वेत्यर्थः। णमुलन्तम्। यज्ञियात् = यज्ञकरणयोग्यात्। "यज्ञर्त्विग्भ्यां घखञौ" इति घः। प्रविविक्षुः = प्रवेष्टु-मिच्छुः। क्रूरकरान् = तीव्रकिरणान्। दृश्यम् = अवलोकयितुमर्हम्, सम्पूर्णम् = समस्तम्, मण्डलम् = विम्बं, यस्य सः। श्वेतीभूयेत्यादि स्वभावोक्तिः। अण्डाकृतिम् = सूर्योऽण्डाकृतिरेवोदेत्यस्तमेति चेति तत्काल-च्छटावलोकनेन प्रतीयते। अत्र सर्वत्रोत्प्रेक्षा। कलिकौतुकेन = कलियुग-कौतूहलेन, कवलीकृतस्य = विनष्टस्य। पातकपुञ्जेन = अघौघेन, पिञ्ज-रितस्य = पीतवर्णस्य। जर्जरीकृतस्येति भावः। धर्मस्य = सनातन-धर्मस्य। भारतवर्षस्य च स्मारयन्नित्यत्र "अधीगर्थदयेषाम्" इति कर्मणि

कर सन्ध्योपासन करने के इच्छुक से, 'मेरे कुल में ऐसा कोई भी व्यक्ति नहीं है, जो धर्मध्वंसी यवनों को इस यज्ञयोग्य भूमि से गर्दनियाँ देकर निकाल बाहर करे, इस प्रकार चिन्तित से होकर पर्वत की गुफा में प्रवेश करने के इच्छुक भगवान् सूर्य, क्रमशः तीखी किरणों को छोड़ कर, अपने सारे विम्ब को दर्शन योग्य बना कर, पहले सफेद, फिर पीले और फिर लाल होकर आकाश और पृथ्वी दोनों ओर से दवाये जा रहे से अण्डाकार वन कर, कलियुग के प्रताप से विनष्ट सदाचार वाले, पापराशि से पीले पड़े धर्म वाले तथा यवनों से ग्रस्त भारतवर्ष का स्मरण कराते हुए

ततः संवृत्ते किञ्चिदन्धकारे धूप-धूमेनेव व्याप्तासु हरि[त्सु]
भुशुण्डीं स्कन्धे निधाय निपुणं निरीक्षमाणः, आगत-प्रत्यागतं
विदधानः, प्रताप-दुर्ग-दौवारिकः, कस्यापि पादक्षेपध्वनिमिव
ऽश्रौषीत् । ततः स्थिरीभूय पुरतः पश्यन् सत्यपि दीप-प्रकाशेऽव[त]
मसवशादागन्तारं कमप्यनवलोकयन्, गम्भीरस्वरेणैवमवादीत्—"[क]
कोऽत्र भोः ? कः कोऽत्र भोः ?" इति ।

अथ क्षणानन्तरं पुनः स एव पादध्वनिरश्रावीति भूयः साक्षे[प]
मवोचत्—"क एष मामनुत्तरयन् मुमूर्षुः समायाति बधिरः ?"

षष्ठी । अन्धतमसे = गाढध्वान्ते । 'ध्वान्ते गाढेऽन्धतमसम्' इत्यमरः । चक्[षु]
षामगोचरः = अदृश्यः । सूर्यास्तमनवेलाऽभूदित्यर्थः ।

हरित्सु = दिक्षु । भुशुण्डीम् = आयुधविशेषम् । "वन्दूक" इति हिन्दी
आगतप्रत्यागतम् = यातायातम् । विदधानः = कुर्वाणः । प्रतापदुर्गस्यः
तन्नाम्ना ख्यातदुर्गस्य, "किला" इति हिन्दी, दौवारिकः = द्वारपालः । पा[द]
क्षेप-ध्वनिम् = चरणचङ्क्रमणशब्दम् । अवतमसम् = क्षीणध्वान्तम् "अ[व]
समन्धेभ्यस्तमसः" इति सूत्रेण समासान्तोऽच्, तस्य वशात् सामर्थ्यात्

संसार को घोर अन्धकार में ढकेलते हुए, आँखों से ओझल हो गए

उसके बाद, कुछ अँधेरा हो जाने पर और दिशाओं के मानों धूप से उ[ठने]
वाले धूम से व्याप्त हो जाने पर, वन्दूक को कन्धे पर रख कर गौर से इध[र]
उधर देखते हुए और गश्त लगाते हुए प्रताप दुर्ग के द्वारपाल ने किसी के पैरों [की]
आहट सी सुनी । तब खड़े होकर, सामने देखकर, दीपक का प्रकाश होते हु[ए]
भी धुंधलेपन के कारण आने वाले को न देखकर उसने गम्भीर स्वर से क[हा]
"अरे यहाँ यह कौन है ? यह कौन है ?"

क्षण भर बाद फिर वही पैरों की आहट सुन पड़ी, इसलिए फिर विगड़ क[र]
बोला, अरे, 'यह कौन वहरा विना मुझे जवाव दिये ही मरने के लिये वढ़ता च[ला]
आ रहा है ?'

ततो "दौवारिक ! शान्तो भव, किमिति व्यर्थं मुमूर्षुरिति वधिर इति च वदसि ?" इति वक्तारमपश्यतैवाऽऽकर्णि मन्द्रस्वरमेदुरा वाणी। अथ "तत् किं नाज्ञायि अद्यापि भवता प्रभुवर्य्याणामादेशो यद् दौवारिकेण प्रहरिणा वा त्रिः पृष्टोऽपि प्रत्युत्तरमददद् हन्तव्य इति" इत्येवं भाषमाणेन द्वाःस्थेन "क्षम्यतामेष आगच्छामि, आगत्य च निखिलं निवेदयामि" इति कथयन्, द्वादशवर्षेण केनापि भिक्षु-बटुनाऽनुगम्यमानः, कोपि काषायवासाः, धृत-तुम्बी-पात्रः, भस्म-च्छुरित-ललाटः, रुद्राक्ष-मालिका-सनाथित-कण्ठः, भव्यमूर्त्तिः संन्यासी दृष्टः। ततस्तयोरेवमभूदालापः—

मुमूर्षुः = मर्तुमिच्छुः। मन्द्रस्वरेण = गम्भीरनादेन, मेदुरा = सान्द्र-स्निग्धा। "सान्द्रस्निग्धस्तु मेदुरः" इत्यमरः। अपश्यता = अनवलोकमानेन, दौवारिकेणेति शेषः। आकर्णि = श्रुतः। अज्ञायि = ज्ञातः। श्रुत इति यावत्। द्वारि तिष्ठतीति द्वाःस्थः = द्वारपालः, तेन। प्रहरिणा = यामिकेन। नगरादिषु सशब्दं जनताजागरवेण चौरनिवारयित्रेति यावत्। कषायेण रक्तं काषायम्, वासो यस्य सः। त्रिः = वारत्रयम्। "द्विस्त्रिश्चतुरिति कृत्वोऽर्थे"

तत्पश्चात् उस दौवारिक ने बोलने वाले को न देखते हुए 'द्वारपाल ! शान्त रहो, क्यों बेकार मरणासन्न और वहरा कहते हो ?' यह गम्भीर स्वर से स्निग्ध वाणी सुनी। उसके वाद 'तो क्या आपको अभी तक महाराज शिवाजी का यह आदेश नहीं मालूम है कि द्वारपाल या पहरेदार के तीन वार पूछने पर भी जो व्यक्ति उत्तर न दे, उसे गोली मार दी जाय' यह कहते हुए, द्वारपाल ने, 'क्षमा करो मैं आ रहा हूँ, आकर सारा हाल वताऊँगा' यह कहते हुए, वारह साल के किसी भिक्षु-बालक के आगे-आगे आते हुए किसी कषाय वस्त्रधारी, तुम्वी पात्र लिए हुए, मस्तक पर भस्म लगाये तथा गले में रुद्राक्ष की माला पहने किसी भव्यमूर्ति संन्यासी को देखा। फिर उन दोनों में आपस में इस प्रकार वातचीत हुई।

संन्यासी—कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्ति स्करोषि ?

दौवारिकः—भगवन् ! भवान् संन्यासी तुरीयाश्रमसेवीति प्र म्यते, परन्तु प्रभूणामाज्ञामुल्लङ्घ्य निजपरिचयमददेवाऽऽयात त्याक्रुश्यते ।

संन्यासी—सत्यं क्षान्तोऽयमपराधः, परमद्यावधि, संन्यासि ब्रह्मचारिणः, पण्डिताः, स्त्रियः, बालाश्च न किमपि प्रष्टव्या आत्मानमपरिचाययन्तोऽपि प्रवेष्टव्याः ।

रुद्राक्षमालिकया, सनाथितः = भूषितः, कण्ठो यस्य सः । आलापः = अ न्यसम्बोधनपूर्वकभाषणम् ।

तुरीयाश्रमसेवी = चतुर्थाश्रमवासी । "स संन्यासी च योगी च न निर चाक्रियः" इति भगवद्वचनेन संन्यासिपदस्य न चतुर्थाश्रमि-गैरिकधारिमात्र तेति ध्वनयता पदद्वयं विशेष्यविशेषणभावेनोपात्तमिति विज्ञाः । अददत् = अयच्छ "नाभ्यस्ताद्" इति नुम्निषेधः ।

अपरिचाययन्तः = परिचयमददतः । अपरिचितानपि प्रवेशयेति भाव

संन्यासी—तुम हम संन्यासियों को भी कठोर वचनों द्वारा अपमानित करते हो ?

दौवारिक—भगवन् ! आप संन्यासी हैं, चतुर्थ आश्रम में हैं, अतः मैं को प्रणाम करता हूँ, किन्तु आप महाराज की आज्ञा का उल्लंघन कर अ परिचय दिये विना ही आ रहे हैं, इसलिए हम आप पर बिगड़ रहे हैं ।

संन्यासी—सच है, अच्छा, तुम्हारा यह अपराध मैंने क्षमा कर दिया, लेकि आज से संन्यासियों, ब्रह्मचारियों, पण्डितों, स्त्रियों, और बालकों से कुछ मत पूछना, और यदि वे अपना परिचय न दें, तो भी उन्हें अन्दर आने की मति दे देना ।

दौवारिकः—संन्यासिन्! संन्यासिन्! बहूक्तम्, विरम, न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे। किन्तु यो वैदिकधर्मरक्षा-व्रती, यश्च संन्यासिनां ब्रह्मचारिणां तपस्विनां च संन्यासस्य ब्रह्म-चर्यस्य तपसश्चान्तरायाणां हन्ता, येन च वीरप्रसविनीयमुच्यते कोङ्कणदेश-भूमिः, तस्यैव महाराज-शिववीरस्याऽऽज्ञां वयं शिरसा वहामः।

संन्यासी—अथ किमप्यस्तु, पन्थानं निर्दिश, आवां शिववीरनिकटे जिगमिषावः।

दौवारिकः—अलमालप्यापि तत्, प्राह्णे महाराजस्य सन्ध्योपा-

संन्यासिनामित्यादित्रिकस्य संन्यासस्येत्यादित्रिकेण यथासङ्ख्यमन्वयः। अत एव यथासङ्ख्यनामाऽलङ्कारः। शिरसा वहामः=सर्वथा पालयामः। अन्तरायाणाम्=विघ्नानाम्। "विघ्नोऽन्तरायः प्रत्यूहः" इत्यमरः। हन्ता= निवारयिता।

अलमालप्यापि=इदमालपनीयमपि नास्तीत्यर्थः। "अलंखल्वोः प्रति-षेधयोः प्राचां क्त्वे"ति क्त्वाप्रत्ययः। यथा शाकुन्तले "अलं रुदित्वा, ननु भवती-भ्यामेव स्थिरीकर्त्तव्या शकुन्तला" इत्यत्र, शिशुपालवधे "आलप्यालमिदं वभ्रोर्यत् स दारानपाहरत्" इत्यत्र च प्रसिद्धोऽयम्। प्राह्णे=पूर्वाह्णे।

दौवारिक—संन्यासी! संन्यासी! बहुत कह चुके, अब बस करो, हम दौवारिक लोग ब्रह्मा की आज्ञा की भी परवाह नहीं करते, वरन् जिन्होंने वैदिक-धर्म की रक्षा का व्रत ले रखा है, जो संन्यासियों, ब्रह्मचारियों तथा तपस्वियों के विघ्नों तथा संन्यास, ब्रह्मचर्य और तप के विघ्नों के नाशक हैं, जिनके कारण ही कोङ्कण देश की भूमि वीरप्रसू (वीरों को जन्म देने वाली) कहलाती है, उन्हीं महाराज शिवाजी की आज्ञा को शिरोधार्य करते हैं।

संन्यासी—अच्छा जो कुछ भी हो, हमें रास्ता दिखाओ, हम वीर शिवाजी के पास जाना चाहते हैं।

दौवारिक—उसकी तो बात भी न कीजिये, आपके समान लोगों के मिलने का

सनसमये भवादृशानां प्रवेश-समयो भवति; न तु रात्रौ ।

संन्यासी—तत् किं कोऽपि न प्रविशति रात्रौ ?

दौवारिकः—(साक्षेपम्) कोऽपि कथं न प्रविशति ? परिचि वा प्राप्त-परिचयपत्रा वा आहूता वा प्रविशन्ति, न तु भवादृशाः ये तुम्बीं गृहीत्वा द्वाराद् द्वारम्—इति कथयन्नेव तत्तेजसेव धर्षि मध्य एव विरराम ।

संन्यासी—(स्वगतम्) राजनीति-निष्णातः शिववीरः । सर्व दौवारिकता-योग्य एवायं द्वारपालः स्थापितोऽस्ति । परीक्षितमप नमेकस्मिन् विषये पुनः परीक्षिष्ये तावत् । (प्रकटम्) दौवारिक इत आयाहि, किमपि कर्णे कथयिष्यामि ।

दौवारिकः—(तथा कृत्वा) कथ्यताम् ।

तुम्बी=अलाबूपात्रम् । भिक्षाभाजनमिति सव्यङ्ग्यम् । धर्षितः=भीषित राजनीतौ, निष्णातः=निपुणः । "प्रवीणे निपुणाभिज्ञविज्ञनिष्णा शिक्षिताः" इत्यमरः । दौवारिकता=द्वारपालकर्म । परीक्षिष्ये=परी करिष्ये ।

समय प्रातःकाल महाराज के सन्ध्योपासन के समय होता है, न कि रात में।

संन्यासी—तो क्या रात में कोई नहीं आता ?

दौवारिक—(बिगड़ता हुआ) 'कोई कैसे नहीं आता ? महाराज के प चित लोग, परिचय-पत्र प्राप्त लोग या आमन्त्रित लोग आते हैं, न कि आप से लोग जो तुम्बी लिए दरवाजे से दरवाजे'—यह कहते ही कहते मानो उ तेज से घबराकर वह बीच में ही रुक गया ।

संन्यासी—(अपने मन में) शिवाजी राजनीति में कुशल हैं । उन्ह पहरेदारी के योग्य ही द्वारपाल नियुक्त किया है । यद्यपि मैं इसकी परीक्षा चुका हूँ, फिर भी मैं इसकी एक विषय में पुनः परीक्षा लूँगा । (प्रकाश द्वारपाल ! इधर आओ, कुछ तुम्हारे कान में कहूँगा ।

दौवारिक—(वैसा ही करके) कहिये ।

संन्यासी—निरीक्षस्व, त्वमधुना दौवारिकोऽसि, प्राणानगणयन् जीविकां निर्वहसि, त्वं सहस्रं वाऽयुतं वा मुद्रा राशीकृताः कदापि प्राप्स्यसीति न कथमपि सम्भाव्यते।

दौवारिकः—आम्, अग्रे कथ्यताम्।

संन्यासी—वयं च संन्यासिनो वनेषु गिरिकन्दरेषु च विचरामः, सर्वं रसायन-तत्त्वं विद्मः।

दौवारिकः—स्यादेवम्, अग्रे अग्रे ?

संन्यासी—तद् यदि त्वं मां प्रविशन्तं न प्रतिरुन्धेः, तदधुनैव परिष्कृतं पारद-भस्म तुभ्यं दद्याम्; यथा त्वं गुञ्जामात्रेणापि द्वापञ्चाशत्सङ्ख्याक-तुलापरिमित ताम्रं जाम्बूनदं विधातुं शक्नुयाः।

निरीक्षस्व=अवलोकय। त्वम्=निस्स्वः साधारणदौवारिकः क्लेशेन जीविकां निर्वहन्निति ध्वनिः। अत एव तत्प्रयोगः, अन्यथा 'निरीक्षस्व इत्यनेनैव गतार्थता स्यात्। रसायनानाम्=ताम्रादीनां सुवर्णादिनिर्माणशक्तिमतामोपधि-विशेषाणाम्, तत्त्वम्=सामर्थ्यम्। प्रतिरुन्धेः=प्रतिवारयेः। 'रुधिर् आवरणे' इत्यस्य विधौ सिपि रूपम्। परिष्कृतम्=सुसाधितम्। तुला=पलानां शतम्। "तुला स्त्रियां पलशतम्" इत्यमरः। ताम्रम् धातुनाम। जाम्बूनदम्=सुवर्णम्।

संन्यासी—देखो इस समय तुम द्वारपाल हो, प्राणों की बाजी लगाकर जीवन-निर्वाह करते हो, तुम कभी हजार-दस हजार रुपये इकट्ठे पा जाओगे यह किसी भी तरह सम्भव नहीं है।

दौवारिक—हाँ, आगे कहिये।

संन्यासी—और हम संन्यासी लोग वनों और पर्वत-कन्दराओं में विचरते हैं, हमें सारा रसायन-रहस्य मालूम है।

दौवारिक—हो सकता है, आगे, और आगे कहिये।

संन्यासी—तो यदि तुम मुझे अन्दर जाने से न रोको, तो मैं अभी तुम्हें शोधित पारे की भस्म दे दूँ, जिससे तुम रत्ती भर से भी मनो ताँबे को सोना बना सकोगे।

दौवारिक :—हंहो ! कपटसंन्यासिन् !! कथं विश्वासघातं स्वामि-वञ्चनं च शिक्षयसि ? ते केचनान्ये भवन्ति जार-जाताः, ये उत्कोच-लोभेन स्वामिनं वञ्चयित्वा आत्मानमन्धतमसे पातयन्ति, न व शिवगणास्तादृशाः। (संन्यासिनो हस्तं धृत्वा) इतस्तु सत्यं कथ कस्त्वम् ? कुत आयातः ? केन वा प्रेषितः ?

संन्यासी—(स्मित्वेव) अथ त्वं मां कं मन्यसे ?

दौवारिकः—अहं तु त्वामस्यैव ससेनस्याऽऽयातस्य अपज-खानस्य—

संन्यासी—(विनिवार्य मध्य एव) धिग् धिग् !

दौवारिकः—कस्याप्यन्यस्य वा गूढचरं मन्ये। तदादेशं पा-यिष्यामि प्रभुवर्यस्य। (हस्तमाकृष्य) आगच्छ दुर्गाध्यक्ष-समी

जारजाताः, "अमृते जारजः कुण्डो मृते भर्तरि गोलकः" इति कोशात् प-जीवति परपुरुषेण समुत्पादिता जारजाता इत्युच्यन्ते, अत्र निन्दार्थकम् उत्को

दौवारिक—अच्छा जी ? क्यों रे कपटी संन्यासी, विश्वासघात और स्वा को छलने की शिक्षा देता है ? वे हरामज़ादे कोई दूसरे ही होते हैं जो घूस लालच से स्वामी को छल कर अपने को नरक में डालते हैं। महाराज शिवा के सेवक हम लोग वैसे नहीं हैं। (संन्यासी का हाथ-पकड़ कर) अच्छा, सच-सच कह तू कौन है, कहाँ से आया है, या तुझे किसने भेजा है।

संन्यासी—(मुस्कराता हुआ सा) अच्छा तुम मुझे कौन समझते हो ?

दौवारिक—मैं तो तुझे इसी सेना सहित आये हुए अफ़जल खाँ का—

संन्यासी—(बीच ही में रोककर) छिः छिः !!

दौवारिक—या किसी दूसरे का गुप्तचर समझता हूँ, अतः मैं महाराज आदेश का पालन करूँगा। (हाथ खींच कर) इधर आओ, दुर्गाध्यक्ष के स

स एवाभिज्ञाय त्वया यथोचितं व्यवहरिष्यति ।

ततः संन्यासी तु—"त्यज, नाहं पुनरायास्यामि, नाहं पुनरेवं कथयिष्यामि, महाशयोऽसि, दयस्व दयस्व"—इति सहस्रधा समचकथत्, तथापि दौवारिकस्तु तमाकृष्य नयन्नेव प्रचलितः ।

अथ यावद् द्वारस्थ–स्तम्भोपरि संस्थापितायां काच-मञ्जूषायां जाज्वल्यमानस्य प्रबल–प्रकाशस्य दीपस्य समीपे समायातः, तावत् संन्यासिनोक्तम्—"दौवारिक ! अपि मां पूर्वमपि कदाऽप्यद्राक्षीः ?" ततो दौवारिकः पुनस्तं निपुणं निरीक्षमाणो मन्द्रेण स्वरेण, अरुणापाङ्गाभ्यां लोचनाभ्याम्, गौरतरेण वर्णेन, चुम्बितयौवनेन वयसा, निर्भीकेण हारिणा च मुखमण्डलेन पर्यचिनोत् । भुशुण्डी–समु-

---

हिन्द्यां "घूस" इति, "रिशवत" इति चोच्यते ।

काचघटिता मञ्जूषा काचमञ्जूषा = रक्तवर्तिका । "लालटेन" इति हिन्दी । अपाङ्गः = नेत्रप्रान्तभागः । अपाङ्गौ नेत्रयोरन्तौ" इत्यमरः । चुम्बितम् = स्पृष्टम्, यौवनम् = नवं वयो येन तेन । निर्भीकेण = भयशून्येन । हारिणा = मनोहरेण । पर्यचिनोत् = परिचितवान् । भुशुण्ड्याः = आयुध-

---

चलो, वह सोच-समझकर और तुम्हें पहचान कर तुम्हारे साथ जैसा उचित समझेंगे वैसा व्यवहार करेंगे ।

उसके वाद संन्यासी ने कहा : "छोड़ दीजिये, मैं फिर नहीं आऊँगा, ऐसी वात नहीं कहूँगा, आप बड़े उदार हैं, दया कीजिये, दया कीजिये" ऐसा हजारों वार कहा, पर दौवारिक फिर भी उसे खींच ही ले चला ।

तदनन्तर द्वारपाल के फाटक पर रखी लालटेन में जल रहे प्रखर प्रकाश वाले दीपक के समीप पहुँचने पर संन्यासी ने कहा : 'द्वारपाल ! क्या मुझे तुमने कभी पहले भी देखा है ?' तव द्वारपाल ने पुनः उसे गौर से देख कर, उसके गम्भीर स्वर, आरक्त नेत्र प्रान्त वाली आँखों, गोरे रंग, उमड़ रही नई जवानी और निर्भीक तथा मनोहर मुखमण्डल से उसे पहचान लिया । पहचानते ही,

त्तोलन-किण-कर्कश-करग्रहमपहाय, सलज्ज इव च मन्नीभूय, प्रण-मन्नुवाच—"आः! कथं श्रीमान् गौरसिंह आर्यः? क्षम्यतामनुचित-व्यवहार एतस्य ग्राम्य-वराकस्य"। तदवधार्य तस्य पृष्ठे हस्तं विन्यस्यन् संन्यासिरूपो गौरसिंहः समवोचत्—

"दौवारिक! मया बहुशः परीक्षितोऽसि, ज्ञातोऽसि यथायोग्य एव पदे नियुक्तोऽसि चेति। त्वादृक्षा एव प्रभूणां पुरस्कारभाज-नानि भवन्ति, लोकद्वयं च विजयन्ते। तव प्रामाणिकतां जानीत एवाऽत्रभवान् प्रभुवर्य्यः, परमहमपि विशिष्य कीर्तयिष्यामि। निर्दिश तावत्, कुत्र श्रीमान्? किं चानुतिष्ठति?

ततः पुनर्बद्धाञ्जलेर्दौवारिकस्य किमपि कर्णे कथितमाकर्ण्य

विशेषस्य, समुत्तोलनेन = उत्थापनेन, यः किणः = चिह्नविशेषः, तेन कर्कशस्य = कठोरस्य, करस्य, ग्रहः = ग्रहणम्। गौरसिंहः कथाभागे पूर्वं गौरवटुनाम्ना समायातोऽयमेवेति न विस्मर्तव्यम्।

बन्दूक उठाने से जिसमें घट्ठे पड़ गये थे ऐसे कठोर हाथ को संन्यासी से हटा-कर अर्थात् संन्यासी का हाथ छोड़कर सहमा-सा, सिर झुकाकर प्रणाम करता हुआ बोला: "अरे! श्रीमान् गौरसिंहजी, आप? इस बेचारे गँवार के अनुचित व्यवहार को क्षमा कीजियेगा।"

यह सुनकर उसकी पीठ ठोंकते हुए संन्यासी वेषधारी गौरसिंह बोले: "दौवारिक! मैंने तुम्हारी कई बार परीक्षा ली है, मैं तुम्हें समझ गया, तुम यथायोग्य पद पर ही नियुक्त किये गये हो। तुम्हारे जैसे लोग ही स्वामियों के पुरस्कार के पात्र होते हैं तथा इहलोक और परलोक दोनों में सम्मान पाते हैं। तुम्हारी प्रामाणिकता को तो पूज्य शिवाजी जानते ही हैं, फिर भी मैं उनसे विशेष रूप से कहूँगा। बताओ, महाराज कहाँ हैं और क्या कर रहे हैं?"

तदनन्तर द्वारपाल ने हाथ जोड़कर गौरसिंह के कान में कुछ कहा, उसे

प्रधानद्वारमुल्लङ्घ्य, नेदीयस्यामेकस्यां निम्बतरु-तल-वेदिकायां सहचरं समुपवेश्य, तुम्बीमेकतः संस्थाप्य, स्वाङ्गरक्षिकावरण-काषाय-वसनं चैकतो निम्वशाखायामवलम्बय्य, पट-खण्डेन पक्ष्मणोः कपोलयोः कर्णयोर्भ्रुवोश्चिवुके नासायां केशप्रान्तेषु च छुरितामिव विभूतिं प्रोञ्छ्य, स्कन्धयोः पृष्ठे च लम्बमानान् मेचकान् कुञ्चितान् कचानावध्य, सहचरपोटलिकात उष्णीषमादाय, शिरसि चाऽऽधाय, सुन्दरमुत्तरीयं चैकं स्कन्धयोर्निक्षिप्य, दौवारिक-निर्देशानुसारं श्रीशिववीरालङ्कृतामट्टालिकां प्रति प्रतिष्ठत।

शिववीरस्तु कस्याञ्चिच्चन्द्रचुम्बिन्यां सान्द्र-सुधासार-संलिप्त-

---

नेदीयस्याम् = समीपवर्तिन्याम्। अङ्गरक्षिका = कञ्चुकस्यैव सङ्क्षेपः। "अंगरखी" इति हिन्दी। पक्ष्मणोः = अक्षिलोम्नोः "पक्ष्माक्षिलोम्नि" इत्यमरः। "पलक" इति हिन्दी। चिबुकं "ठोड़ी" इति हिन्दीप्रसिद्धम्। छुरिताम् = व्याप्ताम्, संलग्नामित्यर्थः। प्रोञ्छ्य = दूरीकृत्य। "पोंछ कर" इति हिन्दी। मेचकान् = कृष्णवर्णान्, "कृष्णे नीलसितश्यामकालश्यामलमेचकाः" इत्यमरः। पोटलिकातः = "गठरी से" इति भाषायाम्।

शिववीरोऽट्टालिकायामुपविष्ट आसीदिति सम्बन्धः। अट्टालिकां विशिनष्टि—चन्द्रचुम्बिन्याम् = अत्युच्छ्रायाम्। असम्बन्धे सम्बन्धवर्णनादति-

---

सुनकर, प्रधान द्वार पार कर, पास में ही स्थित नीम के पेड़ के नीचे के एक चबूतरे पर साथ के बालक को विठा कर, तुम्बी को एक ओर रखकर, अपने अंगरखे को ढकने के लिए पहने गये गेरुए वस्त्र को नीम की शाखा में एक ओर लटका कर, रूमाल से पलकों, गालों, कानों भौंहों, ठोढी, नाक तथा वालों में लगी भस्म को पोंछ कर, कन्धों और पीठ पर लटक रहे काले घुँघराले वालों को संभाल-सँवार कर, साथ के वच्चे के हाथ की पोटली से एक पगड़ी निकाल कर, उसे सिर पर रख (वाँध) कर, और एक सुन्दर उत्तरीय को कन्धों पर डाल कर गौरसिंह, द्वारपाल के द्वारा वताये गये रास्ते से, श्रीशिवाजी द्वारा अलंकृत अट्टालिका की ओर चल दिये।

शिवाजी एक गगनचुम्बी, गाढ़े चूने से पुती दीवारों वाले, धूप से

भित्तिकायां धूपधूपितायां गजदन्तिकावलम्बित-विविध-च्छुरिकाखड्ग रिष्टिकायां सुवर्ण-पिञ्जर-परिलम्बमान-शुक-पिक-चकोर-सारिका कल-कूजित-पूजितायामट्टालिकायां सन्ध्यामुपास्योपविष्ट आसीत् परितश्च तस्यैव खर्वामप्यखर्व-पराक्रमां श्यामामपि यशःसमूह-श्वेती

शयोक्तिः। सान्द्रेण = घनेन, सुधासारेण = चूर्णद्रव्येण, संलिप्ताः = रूषिताः भित्तिकाः = कुड्यानि यस्यां तस्याम्। स्वल्पो गजदन्तो गजदन्तिका = भित्तिशङ्कुः, "खूंटी" इति हिन्दी, तस्यामवलम्बिताः, विविधाः = अनेक प्रकाराः छुरिकाखड्गरिष्टिका यस्यां तस्याम्। छुरिकाऽसिधेनुका, खड्गोऽसिः रिष्टिका तद्विशेषः। सुवर्णपिञ्जरेषु,परिलम्बमानानां = निवसताम्, शुक पिकचकोरसारिकाणाम्, कलकूजितैः = मधुरभाषणैः, पूजितायाम् = भूषि तायाम्। शुकाः = कीराः, पिकाः = कोकिलाः, चकोराः = जीवञ्जीवाः सारिकाः, = शारिकाः, "मैना" इति हिन्दी। परितश्च तस्यैव मूर्तिं दर्शं द वयस्याः कटानध्यवसन्निति सम्बन्धः। मूर्तिं विशिनष्टि—खर्वाम् = ह्रस्वाम् शिववीरः खर्वः स्थूलोऽपठितश्चाऽऽसीदति वृत्तवेदिनो वदन्ति। अखर्वः = अनल्पः पराक्रमो यस्यां ताम्। अखर्वस्य पराक्रमो यस्यामिति विगृहीं यः खर्वस्तस्मिन्नखर्वस्य पराक्रमः कुत आयात इति विरोध इवाऽऽभासते परिहारोपायश्च वास्तविकविग्रहाश्रयणेन। तथा च विरोधो न वास्तव इति विरोधाभासोऽत्रालङ्कारः। कलितगौरवामपि कलितलाघवामित्यन्तं सर्वत्रैव मेव। सोऽपि च स्वभावोक्त्योत्प्रेक्षया चानुप्राणित इति विपुलां शोभा माश्रयति। श्यामाम् = कृष्णाम्। यशःसमूहेन = कीर्तिकूटेन, श्वेतीकृतम् =

सुगन्धित प्रासाद में, जिसमें खूँटियों पर नाना प्रकार के छुरे, कृपाण, तलवार आदि लटक रही थी और जो सोने के पिजड़ों में लटक रहे तोतों,कोयलों,चकोरों और सारिकाओं के कलरव से सुशोभित था, सन्ध्यावन्दन से निवृत्त होकर बैठे हुए थे। उनके चारो ओर, उन्हीं की, देखने में ठिगनी होने पर भी महापराक्रम

कृत-त्रिभुवनां कुशासनाश्रयामपि सुशासनाश्रयां पठन-पाठनादि-परिश्रमानभिज्ञामपि नीतिनिष्णातां स्थूलदर्शनामपि सूक्ष्म-दर्शनां ध्वंस-काण्डव्यसनिनीमपि धर्म-धौरेयीं कठिनामपि कोमलाम् उग्रामपि शान्तां शोभित-विग्रहामपि दृढ-सन्धि-बन्धां कलित-गौरवामपि कलित-

धवलितम्, त्रिभुवनं यया ताम्। श्यामया धवलीकरणं विरोधविषयः, परिहारश्च कीर्त्तेः श्वैत्याभिधानद्वारेण। कुशानाम्, आसनम् = विष्टरः, आश्रयः = अवस्थितिः, यस्यास्ताम्। सुशासनम् = शोभनराष्ट्रस्थितिः, आश्रयो यस्यास्ताम्। कुत्सितं शासनं कुशासनमाश्रयो यस्या इति विग्रहे या कुशासनाश्रया सा कथं सुशासनश्रयेति विरोधः। स्थूलं दर्शनम् = नेत्रं यस्यास्ताम्। सूक्ष्मं दर्शनम् = कर्तव्याकर्तव्यविचारो यस्यास्ताम्। या स्थूलदर्शना सा कथं सूक्ष्मदर्शनेति विरोधः सामान्यतोऽर्थाश्रयणे। सूक्ष्मबुधित्वरूपवास्तविकार्थे परिहारश्च। ध्वंस-काण्डस्य = विधर्मिहिंसनस्य, व्यसनमस्ति यस्यां तादृशीमपि धर्मधौरेयीम् = धर्मभारधारिणीम्। या ध्वंसव्यसनवती सा कथं धर्मं पालयेदिति विरोधः, विधर्मि-वधेन सनातनधर्मपालिका चेति विरोधपरिहारः। उग्रशान्तयोर्विरोधः स्पष्ट एव; उग्रत्वं दुर्धर्षत्वाच्छान्तत्वं च दयाविभूषितत्वादिति परिहारः। कठिनकोमलयोः स्पर्शपरत्वे विरोधः। तयोः पुनः शरीर-हृदय-गतत्वे स्थलविशेषविषयत्वे वा परिहारः। शोभितः = सुन्दरः, विग्रहः = सङ्ग्रामो यस्यास्ताम्। दृढः = स्थिरः, सन्धिबन्धः = सन्धिप्रस्तावो यस्यास्तामिति विरोधः, परिहारस्तु विग्रहशब्दस्य शरीररूपार्थाश्रयणेन, सन्धिबन्धशब्दोऽपि अवयवसन्धान-परः। कलितगौरवलाघवयोर्विरोधः स्फुट एव, गौरवमित्यस्य गाम्भीर्य-

शालिनी, साँवली होते हुए भी तीनों लोकों को अपनी कीर्ति से धवलित करने वाली, कुश के आसन पर आसीन होने पर भी सुन्दर शासन का आश्रय, पठन-पाठन के परिश्रम से अपरिचित होती हुई भी राजनीति में निष्णात, देखने में स्थूल होने पर भी सूक्ष्मदृष्टि (कर्तव्याकर्तव्यविचार) वाली, (विधर्मियों-म्लेच्छों की) हिंसा की व्यसनवाली होने पर भी धर्म का भार धारण करनेवाली, कठिन होती हुई भी कोमल, उग्र होती हुई भी शान्त, सुन्दर विग्रह (लड़ाई और शरीर) वाली होती हुई

लाघवां विशाल-ललाटां प्रचण्ड-बाहुदण्डां शोणापाङ्गां कम्बुग्री सुनद्धस्नायुं वर्तुल-श्याम-श्मश्रुं धारिताकृतिमिव वीरतां विग्रहिणी धीरतां समासादित-समर-स्फूर्तिं मूर्तिं दर्शं दर्शं परं प्रसादमासा यन्तस्तस्य वयस्याः कटानध्यवसन्। तेषु च अपजलखान-दमन-विषय वार्तामारिप्सुष्वेव कश्चिद् वेत्रहस्तः प्रतीहारः प्रविश्य, वेत्रं संस्थाप्य, शिरो नमयित्वा, अञ्जलिं बद्ध्वा न्यवीविदत्—"प्रभो श्रीमान् गौरसिंहो दिदृक्षतेऽत्र भवन्तम्"—तदाकर्ण्य "आम्! प्रवे

मित्यर्थाश्रयणे लाघवशब्दस्य चातुर्यार्थकत्वे च परिहारः। शोणापाङ्गाम्= कटाक्षाम्। सुनद्धाः=शोभनतया श्लिष्टाः, स्नायवो यस्यास्ताम्। वर्तुलं च श्मश्रु यस्यास्ताम्। उत्प्रेक्षते—धारिता=गृहीता, आकृतिर्यया ताम्। वि हिणीमिव=शरीरवतीमिव। समासादिता=लब्धा, समरे स्फूर्तिर्यया ता दर्शं दर्शम्=दृष्ट्वा दृष्ट्वा। कटान्=तृणनिर्मितोपवेशनानि। "चटाई" हिन्दी। "उपान्वध्याङ् वसः" इत्याधारस्य कर्मत्वम्। आरिप्सुषु=प्रारम्भ कीर्षुषु। न्यवीविदत्=निवेदितवान्। दिदृक्षते=द्रष्टुमिच्छति, "ज्ञाश्रुस्मृ सनः" इत्यात्मनेपदम्।

भी सुदृढ़ सन्धिबन्धोंवाली, गौरवशालिनी होते हुए भी चातुर्यसम्पन्न, विशाल और प्रबल भुजदण्डों वाली, आरक्त नेत्रों वाली, शंखसदृश कंठ वाली, सु नसोंवाली, गोल और काली दाढ़ी मूँछवाली, मूर्तिमती वीरता-सी, शरीरधा धीरता-सी, और युद्ध भूमि में असाधारण फुर्ती दिखाने वाली मूर्ति (देह) देख-देख कर, परम प्रसन्न होते हुए, शिवाजी के साथी, चटाइयों बैठे थे। वे अफ़ज़ल खाँ के दमन से सम्बन्धित बातचीत शुरू ही करने थे, कि बेंत हाथ में लिये प्रतिहारी ने प्रवेश कर, बेंत को बगल में दबा कर झुका कर, हाथ जोड़ कर निवेदन किया: 'स्वामिन्! श्रीमान् गौरसिंह

प्रवेशय" इति सानन्दं सोत्साहं च कथितवति महाराष्ट्रमण्डलाऽऽखण्डले, प्रतीहारो निवृत्य, सपद्येव तं प्रावीविशत्।

तमवलोक्यैव "इत इतो गौरसिंह! उपविश, उपविश। चिराय दृष्टोऽसि, अपि कुशलं कलयसि? अपि कुशलिनस्तव सहवासिनः? अप्यङ्गीकृत-महाव्रतं निर्वहथ यूयम्? अपि कश्चिन्नूतनो वृत्तान्तः?" इति कुसुमानीव वर्षता पीयूष-प्रवाहेणेव सिञ्चता मृदुना वचनजातेन तत्रभवता शिववीरेणाऽऽद्रियमाणः, आपृच्छ्यमानश्च, त्रिः प्रणम्य, अन्तरङ्ग-मण्डली-जुष्ट-कटे समुपविश्य, करौ सम्पुटीकृत्य "भगवन्! अखिलं कुशलं प्रभूणामनुग्रहेणाऽस्माकमखिलानाम्, अङ्गीकृत-महाव्रते च मा स्म पदं धात् कश्चनान्तराय इत्येव सदा प्रार्थ्यते भगवान् भूतनाथः। नूतनः प्रत्नश्च को नामाद्यतनसमये वक्तव्यः श्रोतव्यश्च वृत्तान्तः—

आखण्डलशब्द इन्द्रवाच्यपि प्रकृते श्रेष्ठपरः। प्रावीविशत् = अन्तर्णीतवान्। जुष्टम् = सेवितम्। अध्युषितमिति यावत्। धात् लुङो रूपं, माङो योगादडभावः। प्रत्नः = पुरातनः, "पुराणे प्रतनप्रत्नपुरातनचिरन्तनाः" इत्यमरः। अद्यतनसमये = सम्प्रति। "आजकल" इति हिन्दी। अद्यतनशब्दो

दर्शन करना चाहते हैं।' यह सुनकर, महाराष्ट्रमण्डल के इन्द्र, (श्रेष्ठ) शिवाजी के आनन्द तथा उत्साह के साथ 'अच्छा, ले आओ, ले आओ' कहने पर, प्रतीहार लौट कर तुरन्त उन्हें ले आया।

उन्हें देखते ही "इधर, इधर गौरसिंह। बैठो बैठो, काफ़ी समय बाद दिखाई पड़े, कुशल से तो हो? तुम्हारे साथी कुशल से तो हैं? तुम लोग स्वीकृत महाव्रत को निवाहते तो हो न? क्या कोई नया समाचार है?" इस प्रकार पुष्पवर्षा सी करते हुए, अमृतप्रवाह से सींचते हुए से मृदुवचनों से महाराज शिवाजी द्वारा आदर पाते हुए और पूछे जाते हुए गौरसिंह ने तीन बार प्रणाम कर, जिस पर अन्तरङ्ग मित्र बैठे थे, उसी चटाई पर बैठ कर, हाथ जोड़ कर कहा: "भगवन्! प्रभुचरणों के अनुग्रह से हम सब लोग पूर्णतया सकुशल हैं और भगवान् विश्वनाथ से सदा यही प्रार्थना किया करते हैं कि स्वीकृत महाव्रत में कोई विघ्न न उपस्थित

ऋते दुराचारात् स्वच्छन्दानामुच्छृङ्खलानामुच्छिन्नसच्छीलानां म्लेच्छ
हतकानाम्" इति कथयामास । ततश्च तेषामेवमभूदालापः—

शिववीरः—अथ कथ्यतां को वृत्तान्तः ? का च व्यवस्था अस्मन्महाव्रताश्रम-परम्परायाः ?

गौरसिंहः—भगवन् सर्वं सुसिद्धम्, प्रतिगव्यूत्यन्तरालमङ्गीकृत सनातनधर्म-रक्षा-महाव्रतानां धारित-मुनि-वेषाणां वीरवराणामाश्रमाः सन्ति । प्रत्याश्रमं च वलीकेषु गोपयित्वा स्थापिता परश्शताः खड्गाः, पटलेषु तिरोभाविताः शक्तयः, कुशपुञ्जान्तः स्थापिता भुशुण्ड्यश्च समुल्लसन्ति । उञ्छस्य, शिलस्य, समिदाहरणस्य, इङ्गुदी-पर्य्यन्वेषणस्य, भूर्जपत्र-परिमार्गणस्य, कुसुमावच

वैयाकरणैः परिभाषितो यस्मिन्नर्थे अतीतरात्र्यर्धारभ्यागामिरात्र्यर्धचरमावयव रूपेण तदभिप्रायेण प्रयोग इति वेदितव्यम् । स्वच्छन्दानामित्यारभ्य म्लेच्छानां ऽनुप्रासः । महाव्रतम्=महान् नियमः । उञ्छः=पतितकणानामेकैक ग्रहणम् । शिलम्=क्षेत्रादौ स्वामित्यक्तानां कणिशानां ग्रहणम् । "उञ्छः कण आदानं कणिशाद्यर्जन शिलम्" इत्यमरः । इङ्गुद्याः=पिण्याकस्य, पर्यन्वेषणम्

हो नया अथवा पुराना, कहने लायक और सुनने लायक समाचार आजक निरङ्कुश उद्दण्ड, शील और सदाचारविहीन दुष्ट म्लेच्छों के दुराचार के सि और क्या है ?" तदनंतर उनकी बातचीत इस प्रकार हुई :

शिवाजी—अच्छा अब यह बताइये कि हमारे महाव्रताश्रमों का क्या हाल चाल है ? उनकी व्यवस्था कैसे चल रही है ?

गौरसिंह—भगवन् ! सब ठीक हो गया है। प्रत्येक दो कोस के बी में सनातन धर्म की रक्षा का महाव्रत स्वीकार किये हुए मुनिवेषधारी वी के आश्रम हैं, और प्रत्येक आश्रम में छप्परों की ओरियों में सैकड़ों त वारें, छप्परों में शक्तियाँ (शस्त्रविशेष) और कुशों के ढेर में बन्द छिपा कर रखी हुई हैं। खेतों में गिरे अनाज के दानों और बालियों वीनने, समिधा लाने, इङ्गुद (हिंगोट या मालकाँगनी के बीज) खोजने, भूर्जप

यनस्य, तीर्थाटनस्य, सत्सङ्गस्य च व्याजेन, केचन जटिलाः, परे मुण्डिनः, इतरे काषायिणः, अन्ये मौनिनः, अपरे ब्रह्मचारिणश्च बहवः पटवो बटवश्चराः सञ्चरन्ति। विजयपुरादुड्डीयाऽत्राऽऽगच्छन्त्या मक्षिकाया अप्यन्तः स्थितं वयं विद्मः, किं नाम एषां यवनहतकानाम् ?

शिववीरः—साधु साधु, कथं न स्यादेवम् ? भारतवर्षीया यूयम्, तत्रापि महोच्चकुलजाताः, अस्ति चेदं भारतं वर्षम्, भवति च स्वाभाविक एवानुरागः सर्वस्यापि स्वदेशे, पवित्रतमश्च यौष्माकीणः सनातनो धर्मः, तमेते जाल्माः समूलमुच्छिन्दन्ति, अस्ति च "प्राणा यान्तु, न च धर्मः" इत्यार्याणां दृढः सिद्धान्तः। महान्तो हि धर्मस्य कृते लुण्ठ्यन्ते, पात्यन्ते, हन्यन्ते, न धर्मं त्यजन्ति, किन्तु धर्मस्य रक्षायै सर्वस्वान्यपि त्यक्त्वा, निशीथेष्वपि, वर्षास्वपि,

---

सर्वतो मार्गणम्, तस्य। जटिलाः=जटायुताः। "लोमादि-पामादि-पिच्छादिभ्यः शनेलचः"। काषायिणः=गैरिकवसनाः। मक्षिकाया अपि, किमुत मनुष्याणाम्, कैमुत्ययुता लोकोक्तिः। अन्तः स्थितम्=मानसे विद्यमानम्। जाल्माः=अविवेकिनः। "जाल्मोऽसमीक्ष्यकारी स्यात्" इत्यमरः। "जालिम" इति हिन्दी। लुण्ठ्यन्ते=चोर्यन्ते। निशीथेषु=अर्धरात्रेषु।

खोजने, फूल चुनने, तीर्थाटन करने तथा सत्संग करने के बहाने, कोई जटा धारण किये, दूसरे सिर मुड़ाये, कुछ गेरुआ वस्त्र पहने, कुछ मौनी बने, और अन्य ब्रह्मचारी वेष धारण किये, अनेक चतुर गुप्तचर बालक घूम रहे हैं। हम बीजापुर से उड़कर यहाँ आनेवाली मक्खी तक की भी आन्तरिक बातों को जानते हैं, इन दुष्ट यवनों की तो बात ही क्या है ?

शिवाजी—शाबाश, शाबाश, ऐसा कैसे न हो ? तुम लोग भारतीय हो, उसमें भी उच्च कुल में उत्पन्न हुए हो, यह भारतवर्ष है, अपने देश पर सभी का स्वाभाविक प्रेम होता है, आपका सनातन धर्म पवित्रतम धर्म है, उसे ये जालिम जड़ से उखाड़ रहे हैं, और आर्यों का 'प्राण भले ही चले जायँ, पर धर्म न जाय' यह दृढ़ सिद्धान्त है। महापुरुष धर्म के लिए लुट जाते हैं, गिराये जाते हैं, मारे जाते हैं, पर धर्म को नहीं छोड़ते,

ग्रीष्म-घर्मेष्वपि, महारण्येष्वपि, कन्दरिकन्दरेष्वपि, व्यालवृन्देष्वपि सिंह-सङ्घेष्वपि, वारण-वारेष्वपि, चन्द्रहास-चमत्कारेष्वपि निर्भया विचरन्ति। तद् धन्याः स्थ यूयं वस्तुत आर्यवंशीया वस्तुतश्च भारतवर्षीयाः।

अथ कथ्यतां कोऽपि विशेषोऽवगतो वा अपजलखानस्य विषये ?

गौरसिंहः—"अवगतः, तत्पत्रमेव दर्शयामि"—इति व्याहृत्य उष्णीष-सन्धौ स्थापितं कन्यापहारक–यवन–युवक–मृत–शरीर वस्त्रान्तःप्राप्तं पत्रं बहिश्चकार।

सर्वे च विजयपुराधीशमुद्रामवलोक्य "किमेतत् ? कुत एतत् कथमेतत् ? कस्मादेतत् ?" इति जिज्ञासमानाः सोत्कण्ठा वितस्थिरे

वारणवारेषु=हस्तिसमूहेषु। "समूहे निवहव्यूहसन्दोहविसरव्रजाः। स्तोमौ निकर-व्रात-वार-सङ्घात-सञ्चयाः" इत्यमरः। कन्यापहारकस्य=बालि चोरस्य, नवयुवकस्य, मृतस्य=गतासोः, मारितस्येति यावत्। शरीरस्य वस्त्रान्तः=वसनान्तराले, प्राप्तम्=लब्धम्।

विजयपुरम्='बीजापुर' इति भाषायां प्रसिद्धं नगरम्। वितस्थिरे

वरन् धर्म की रक्षा के लिए सारे सुखों को भी छोड़कर, अर्द्ध-रात्रि में भी, में भी, गर्मी की धूप में भी, घने जंगलों में भी, पर्वतों की गुफाओं में भी, के समूहों में भी, सिंहों के झुण्डों में भी, हाथियों के यूथों में भी और चमक तलवारों में भी निर्भय विचरते हैं। तुम लोग धन्य हो और वस्तुतः आर्यवं और भारतवर्षीय हो।

अच्छा, अब बताइये क्या अफ़ज़ल खाँ के विषय में कोई नई बात मा हुई ?

गौरसिंह ने 'हाँ मालूम हुई, उसका पत्र ही दिखाता हूँ।' यह कह पगड़ी के अन्दर रखे हुए कन्याहरण करनेवाले यवनयुवक के मृत शरीर वस्त्रों के अन्दर से प्राप्त पत्र को बाहर निकाला।

सभी लोग, बीजापुर के सुल्तान की मुहर देखकर 'यह क्या है ? कहाँ मिला ? कैसे मिला ? किससे मिला ?' यह जानने को अत्यधिक उत्सु

गौरसिंहस्तु शिववीरस्यापि तत्प्राप्ति-चरित-शुश्रूषामवगत्य सङ्क्षिप्य सर्वं वृत्तान्तमवोचत्। ततस्तु "दर्श्यताम्, प्रसार्यताम्, पठ्यताम्, कथ्यताम्, किमिदम्?" इति पृच्छति शिववीरे गौरसिंहो व्याजहार—

"भगवन्! सर्पाकारैरक्षरैः पारस्य-भाषायां लिखितं पत्रमेतदस्ति। एतस्य सारांशोऽयमस्ति—विजयपुराधीशः स्वप्रेषितमपजलखानं सेनापतिं सम्बोध्य लिखति यत्—"वीरवर! महाराष्ट्र-राजेन सह योद्धुं प्रस्थितोऽसीति मा स्म भूत् कश्चनान्तरायस्तव विजये। शिवं युद्धे जेष्यसि चेत्, पद्भ्यां सिंहं जितवानसीति मंस्ये, किन्तु सिंहहननापेक्षया जीवतः सिंहस्य वशीकार एवाधिकं प्रशस्यः। तद्

स्थिताः। "समवप्रविभ्यः स्थः" इत्यात्मनेपदम्। शुश्रूषाम् = श्रोतुमिच्छाम्।

सर्पाकारैः = वक्रैः। सोपहासम्। पारस्यानाम् = पारसीकानाम्, भाषायाम् = वाचि। "फारसी भाषा में" इति हिन्दी।

'शिवं युद्धे जेष्यसि चेत् पद्भ्यां सिंहं जितवानसि' इति निदर्शनालङ्कारः।

उठे। गौरसिंह ने, शिवाजीको भी उसकी प्राप्ति का वृत्तान्त जानने को उत्सुक जानकर संक्षेप में सारा वृत्तान्त कह सुनाया। तदनन्तर, वीर शिवाजी के "दिखाइये, खोलिये, पढ़िये, कहिये यह क्या है?" इस प्रकार पूछने पर गौरसिंह बोला—

"भगवन्! यह सर्पाकार अक्षरों (अरबी लिपि) से फारसी भाषा में लिखा गया पत्र है। इसका सारांश यह है—बीजापुर का सुल्तान अपने द्वारा भेजे गये सेनापति अफ़ज़ल खाँ को सम्बोधित करके लिखता है कि "वीरवर! तुमने महाराष्ट्र के अधिपति शिवाजी के साथ युद्ध करने के लिए प्रस्थान किया है, अतः तुम्हारी विजय में किसी प्रकार का विघ्न न उपस्थित हो, यदि युद्ध में तुमने शिवाजी को जीत लिया, तो मैं समझूँगा कि पैदल ही शेर जीत लिया, किन्तु शेर मारने की अपेक्षा जीवित

यदि छलेन जीवन्तं शिवमानयेः, तद् वीरपुङ्गवोपाधि–दान सहकारे तव महतीं पदवृद्धिं कुर्य्याम्। गोपीनाथपण्डितोऽपि मया तव निक प्रस्थापितोऽस्ति, स मम तात्पर्यं विशदीकृत्य तव निकटे कथयिष्यति प्रयोजनवशेन शिवमपि साक्षात्करिष्यति" इति।

इत्याकर्णयत एव शिववीरस्य अरुणकौशेय–जाल–निबद्धौ मीन विव नयने सञ्जाते, मुखं च बाल-भास्कर-बिम्ब-विडम्बना-मालल अधरं च धीरताधुरामधरीकृतवान्।

मंस्ये=ज्ञास्ये। प्रशस्यः=श्लाघ्यः। प्रस्थापितः=प्रेषितः। विशदीकृत्य स्पष्टीकृत्य।

अरुणम्=लोहितम्, यत् कौशेयस्य=पट्टवस्त्रस्य, जालम्=आना तेन निबद्धौ=गृहीतौ। मीनाविवेत्युपमा। क्रोधान्नयने लोहिते अभूता वाच्योऽर्थः। बालभास्करस्य=नवोदितसूर्यस्य, यद्, बिम्बम्=निता लोहितं मण्डलम्, तद्विडम्बनाम्=तदनुकृतिम्। आललम्बे=धृतव धीरताधुराम्=धैर्यभारम्। "ऋक्पूरब्धूः" इत्यादिना समासान्तोऽप्रत्य अधरीकृतवान्=त्यक्तवान्। अनुप्रासः। चूर्णकं गद्यम्, वैदर्भी रीतिः, प्रसा

शेर को वश में करना ही अधिक प्रशंसनीय होता है, अतः यदि तुम छल शिवाजी को जीवित ही पकड़ लाओ, तो तुम्हें वीरपुंगव की उपाधि देने के ही तुम्हारी पदवृद्धि भी कर दूंगा। मैंने गोपीनाथ पण्डित को भी तुम्हारे भेज दिया है, वे मेरे अभिप्राय को तुम्हें विस्तार से समझायेंगे और प्रयोजन शिवाजी से भी मिलेंगे।"

यह सुनते ही शिवाजी की आँखें लाल रेशमी जाल में फँसी मछली तरह हो गईं (आँखों में लाल डोरे पड़ गए), मुखमण्डल नवोदित सूर्य के समान लाल हो गया और अधर धैर्य छोड़कर फड़कने लगा।

अथ स दक्षिण-कर-पल्लवेन श्मश्रु परामृशन्नाकाशे दृष्टिं बद्ध्वा "अरे रे विजयपुर-कलङ्क! स्वयमेव जीवन् शिवः तव राजधानी-माक्रम्य, वीरपुङ्गवोपाधिसहकारेण तव महतीं पदवृद्धिमङ्गीकरिष्यति, तत् किं प्रेषयसि मृत्योः क्रीडनकानेतान् कदर्य्य-हतकान् ?"—इति साम्रेडमवोचत्। अपृच्छच्च "ज्ञायते वा कश्चिद् वृत्तान्तो गोपीनाथ-पण्डितस्य ?"

यावद् गौरसिंहः किमपि विवक्षति तावत् प्रतीहारः प्रविश्य 'विजयतां महाराजः' इति त्रिर्व्याहृत्य, करौ सम्पुटीकृत्य, शिरो नमयित्वा कथितवान्—"भगवन्! दुर्गद्वारि कश्चन गोपीनाथनामा पण्डितः श्रीमन्तं दिदृक्षुरुपतिष्ठते। नायं समयः प्रभूणां दर्शनस्य, पुनरागम्यताम्" इति बहुशः कथ्यमानोऽपि "किञ्चनाऽत्यावश्यक-

---

गुण इति तत्र तत्र न विस्मरणीयम्। शिवः = शिवाजीत्यर्थः। पदवृद्धि = स्थानोन्नतिम्, 'तरक्की' इति भाषायाम्। मृत्योः = यमस्य। क्रीडनकान् =

उसके बाद शिवाजी ने दाहिने हाथ से मूँछों पर ताव देते हुए, आकाश की ओर दृष्टि कर "अरे बीजापुर के कलङ्क! स्वयं शिवाजी ही जीवित रहकर, तुम्हारी राजधानी पर आक्रमण करके, वीरपुङ्गव उपाधि के साथ तुम्हारी दी हुई पदवृद्धि (तरक्की) स्वीकार करेगा, मृत्यु के खिलौने इन दुष्ट कायरों को क्यों भेजते हो ?" यह वाक्य कई बार दुहराया और गौरसिंह से पूछा 'क्या गोपीनाथ पण्डित का कोई समाचार मिला ?'

गौरसिंह कुछ कहना ही चाहते थे कि इतने में ही द्वारपाल ने आकर, तीन बार 'महाराज की जय हो' कह कर, हाथ जोड़कर, सिर झुका कर कहा: महाराज! किले के फाटक पर कोई गोपीनाथ नामक पण्डित आपके दर्शनों की इच्छा से खड़े हैं। मेरे 'यह समय महराज से मिलने का नहीं है, पुनः आइयेगा'

कार्यम्" इति प्रतिजानाति। तदत्र प्रभुचरणा एव प्रमाणम्"—इति

तदवगत्य "सोऽयं गोपीनाथः, सोऽयं गोपीनाथः" इति सा सतर्कं सोत्साहं च व्याहृतवत्सु निखिलेषु, शिववीरेण निजबाल्यमि माल्यश्रीकनामा सम्बोध्य कथितो यद् "गम्यतां दुर्गान्तर एव महावी मन्दिरे तस्मै वासस्थानं दीयताम्, भोज्य-पर्यङ्कादि-सुखद-साम जातेन च सत्क्रियताम्, ततोऽहमपि साक्षात्करिष्यामि"—इति।

ततो "वाढमि"त्युक्त्वा प्रयाते माल्यश्रीके; "महाराज! आ चेदहमद्यैव अपजलखानं कथमपि साक्षात्कृत्य, तस्याऽखिलं व्यव विज्ञाय प्रभुचरणेषु विनिवेदयामि; नाधुना मम क्षान्तिः शान्ति यतः संन्यासिवेषोऽहं समागच्छन् द्वयोर्यवनभटयोर्वार्तयाऽवागम

खेलासाधनानि। सन्निहितमरणानिति यावत्। साक्षात्करिष्यामि = द्रक्ष्यामि गोपीनाथमिति शेषः।

वाढम्, अङ्गीकारसूचकमव्ययम्। व्यवसितम् = उद्योगम्।

वार-वार ऐसा कहने पर भी, वे कहते हैं कि 'कुछ वहुत जरूरी काम है प्रभुचरणों की जैसी आज्ञा हो वैसा ही किया जाय।

यह जानकर, 'यह वही गोपीनाथ है, यह वही गोपीनाथ है', इस प्र सभी लोगों के अनुमानपूर्वक और उत्साहपूर्वक वार-वार कहने पर शिवाजी अपने वचपन के मित्र माल्यश्रीक को सम्वोधित कर कहाः 'जाओ, दुर्ग के अ ही महावीर-मन्दिर में उन्हें ठहराओ, और भोजन, पलंग आदि सुखद सामग्रि से उनका सत्कार करो, फिर मैं भी उनसे मिलूंगा।'

उसके वाद, माल्यश्रीक के 'अच्छी वात है' कहकर चले जाने पर, गोपी ने शिवाजी के कान में धीरे से कहा : 'महाराज! यदि आपकी आज्ञा हो, तो आज ही किसी प्रकार अफ़ज़ल खाँ से मिलकर, उसका सारा इरादा जान आकर आप से निवेदन करूँ। अव मुझमें न तो सहिष्णुता रह गई है, न शा

यत् श्व एवैते युयुत्सन्त" इति गौरसिंहो मन्दं कर्णान्तिकं व्याहार्षीत्।

ततो "वीर! कुशलोऽसि, सर्वं करिष्यसि, जाने तव चातुरीम्, तद् यथेच्छं गच्छ, नाहं व्याहन्मि तवोत्साहम्, नीतिमार्गान् वेत्सि, किन्तु परिपन्थिन एते अत्यन्तनिर्दया:, अतिकदर्या:, अतिकूटनीतयश्च सन्ति। एतैः सह परम-सावधानतया व्यवहरणीयम्"—इति कथयित्वा शिववीरस्तं विससर्ज।

गौरसिंहस्तु त्रिः प्रणम्य, उत्थाय, निवृत्य, निर्गत्य, अवतीर्य, सपदि तस्या एव निम्ब-तरु-तल-वेदिकायाः समीप आगत्य, स्वसह-

---

क्षान्तिः=क्षमा। कर्णान्तिकम्=श्रवणसमीपम्। असर्वश्रव्यमिति यावत्।

चातुरीम्=कौशलम्। "गुणवचनब्राह्मणादिभ्यः" इति ष्यञि अल्लोपयलोपयोः षित्वान्ङीपि। व्याहन्मि=नाशयामि। परिपन्थिनः=शत्रवः। अत्यन्तं निर्दयाः=दयाशून्याः। अतिकदर्याः=परमनीचाः। "कदर्ये कृपणक्षुद्र–" इत्यमरः। अतिकूटनीतयः=कपटाचारचतुराः। "माया निश्चलयन्त्रेषु कैतवानृतराशिषु। अयोघने शैलशृङ्गे सीराङ्गे कूटमस्त्रियाम्" इत्यमरः।

क्योंकि संन्यासी के वेष में आते हुए मुझे रास्ते में दो मुसलमान सिपाहियों की वातचीत से पता चला कि ये कल ही लड़ना चाहते हैं।'

तदनन्तर, शिवाजी ने "वीरवर! तुम अत्यन्त कुशल हो, मैं तुम्हारी चतुरता को जानता हूँ, तुम सब कर लोगे, अतः अपनी इच्छानुसार जाओ, मैं तुम्हारा उत्साह नहीं मारना चाहता। तुम नीतिमार्गों को तो जानते ही हो, पर ये शत्रु बड़े क्रूर, नीच और कपटपटु हैं, इनके साथ बड़ी सावधानी वरतनी चाहिये।" यह कहकर गौरसिंह को विदा दिया।

गौरसिंह ने तीन वार प्रणाम कर, उठ कर, घूम कर, वाहर निकल कर, नीचे उतर कर, झट उसी नीम के पेड़ के नीचे के चबूतरे के पास आकर

चरं कुमारमिङ्गितेनाऽऽहूय कस्मिश्चित् स्वसङ्केतित-भवने प्रविश्य आत्मनः कुमारस्यापि च केशान् प्रसाधनिकया प्रसाध्य, मुखमार्द्र-पटेन प्रोञ्छ्य, ललाटे सिन्दूर–बिन्दु–तिलकं विरचय्य, उष्णीष-मपहाय, शिरसि सूचिस्यूतां सौवर्ण-कुसुम-लतादि-चित्र-विचित्रिता-मुष्णीषिकां सन्धार्य, शरीरे हरितकौशेय-कञ्चुकिकामायोज्य, पादयोः शोण-पट्ट-निर्मितमधोवसनमाकलय्य, दिल्लीनिर्मिते महार्हे उपानहे धारयित्वा, लघीयसीं तानपूरिकामेकां सह नेतुं सहचर-हस्ते समर्प्य गुप्तच्छुरिकां दन्तावलदन्त-मुष्टिकां यष्टिकां मुष्टौ गृहीत्वा, पटवासं

इङ्गितेन = सङ्केतेन । प्रसाधनिकया = कङ्कतिकया । "प्रसाधनी कङ्कतिका" इत्यमरः । "कंघी" इति हिन्दी । सौवर्णेन = सुवर्णविरचितेन, कुसुम लतादीनां चित्रेण, विचित्रिताम् = संवलिताम् । लघूष्णीषमुष्णीषिका ताम् । "टोपी" इति हिन्दी । शोणपट्टनिर्मितम् = रक्तकौशेयरचितम् अधोवसनम् = अधोमार्गेण चरणेन धारणीयं वसनम् । "पायजामा" इति हिन्दी । दिल्लीशब्दः "दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः" इत्यादि पण्डितराजेनापि व्यवहृतः । महार्हे = इत्यत्र 'ईदूदेद्' इत्यनेन प्रगृह्यत्वा प्रकृतिभावो बोध्यः । तानपूर एव तानपूरिका । "तानपूरा" इति हिन्दी सहेत्यस्य "आत्मना" इति शेषः । तानपूरिकाशब्दस्य तु न सहशब्देन विशेष्य विशेषणभाव एवेति न तत्र तृतीयाऽऽशङ्का । दन्तावलस्य = करिणः दन्त मुष्टिका यस्यां ताम् । दन्तेन निर्मितेति मध्यमपदलोपिसमासो वा । "हाथी

अपने साथी लड़के को इशारे से बुलाकर, किसी पहले से निश्चित भवन में प्रवेश कर, अपने और उस लड़के के बालों को कंघी से सँवार कर, मुँह को गीले कपड़े से पोछ कर, मत्थे पर सिन्दूर का तिलक लगा कर, पगड़ी उतार कर, सुई से सिली सोने के काम वाली पुष्पलतादि चित्रित टोपी लगाकर, हरे रेशमी अंगरखा, लाल कपड़े का पायजामा, दिल्ली के बने बहुमूल्य जूते पहन कर, छोटे से एक तानपूरे को साथ ले चलने के लिए साथी बालक के हाथ में देकर, जिसमें छुरी गुप्त थी ऐसी हाथी के दाँत की मूठ वाली गुप्ती छड़ी हाथ

दिगन्तं दन्तुरयन्, करस्थपटखण्डेन च मुहुर्मुहुराननं प्रोञ्छन् गायक-वेषेण अपजलखान-शिबिराभिमुखं प्रतस्थे।

अथ तौ त्वरितं गच्छन्तौ, सपद्येव परशत-श्वेतपट-कुटीरैः शारद-मेघ-मण्डलायितं दीपमाला-विहित-बहुल-चाकचक्यम् अपजलखान-शिबिरं दूरत एव पश्यन्तौ. यावत् समीपमागच्छ-तस्तावत् कश्चन कोकनद-च्छवि-वस्त्र-खण्ड-वेष्टित-मूर्द्धा, कटिपर्यन्त-सुनद्ध-काकश्यामाङ्गरक्षिकः, कर्बुराधोवसनः, शोण-श्मश्रुः, विजय-पुराधीश-नामाङ्कित-वर्तुल-पित्तल-पट्टिका-परिकलित-वाम-वक्ष-

---

दाँत की मूठवाली गुप्ती छड़ी" इति भाषा। पटवासैः = सुगन्धितद्रव्यैः। "इत्र" इति हिन्दी। दन्तुरयन् = उन्नतयन्, सुगन्धयन्निति तात्पर्यम्। करस्थ-पटखण्डेन = हस्तस्थयाऽङ्गावलक्ष्या। "दस्ती रुमाल" इति हिन्दी।

शारदमेघमण्डलायितम् = शरत्समयमेघमण्डलमिवाऽऽचरितम्। शुभ्रत्वा-दुन्नतत्वाच्च सादृश्यम्। कोकनदच्छविना = रक्तकमलकान्तिना, वस्त्र-खण्डेन = वेष्टितो मूर्धा यस्य सः। कटिपर्यन्ता सुनद्धा काकश्यामा = अति-श्यामला, अङ्गरक्षिका यस्य सः। कर्बुरम् = अनेकवर्णम्, अधोवसनं यस्य सः। शोणश्मश्रुः = रक्तमुखकेशः। विजयपुराधीशनाम्नाऽङ्कितया = तन्ना-मधेयेन चिह्नितया, वर्तुलया = गोलाकारया, पित्तलपट्टिकया = धातुफलकिकया,

---

में लेकर, इत्र की सुगन्ध से दिशाओं को सुगन्धित करते हुए, हाथ में लिये रुमाल से बार-बार मूँह पोंछते हुए, गायक के वेष में, अफ़ज़ल खाँ के शिविर की ओर प्रस्थान किया।

तदनन्तर, जल्दी-जल्दी कदम बढ़ा रहे वे दोनों, सैकड़ों श्वेत खेमों से शरद ऋतु के मेघमण्डल के समान लगने वाले, दीपमालिकाओं से जगमगा रहे अफ़ज़ल खाँ के शिविर को दूर से ही देखते हुए, बात की बात में ज्योंही उसके समीप पहुँचे; लालकमल की सी कान्ति वाले कपड़े के टुकड़े को सिर पर लपेटे, कमर तक लम्बा कौए के रङ्ग के समान काला अँग-रखा पहने, चितकबरी लुङ्गी पहने, लाल मूँछ दाढ़ी वाले बीजापुर के सुल्तान

स्थलः स्कन्धे भुशुण्डीं निधाय, इतस्ततो गतागतं कुर्वन् सावष्टम्भमु
भाषया उवाच—'कोऽयं, कोऽयम् ?' इति; ततो गौरसिंहेनापि 'गा
कोऽहं श्रीमन्तं दिदृक्षे' इति समार्दवं व्याख्यायि । ततो 'गम्यतामन्
ऽपि गायका वादकाश्च सम्प्रत्येव गताः सन्ति' इति कथयति प्रहरि
'घृतेन स्नातु भवद्रसना' इति व्याहरन् शिबिर-मण्डलं प्रविवेश ।

तत्र च क्वचित् खट्वासु पर्यङ्केषु चोपविष्टान् , सगडगडाशब्
ताम्रक-धूममाकृष्य, मुखात् कालसर्पानिव श्यामल-निःश्वासा
द्गिरतः, स्वहृदय-कालिमानमिव प्रकटयतः, स्वपूर्वपुरुषोपार्जि

लोके "चपरास" इति ख्यातया परिकलितम् = भूषितम्, वामं वक्षःस्
यस्य सः । सावष्टम्भम् = सप्रतिरोधम् । समार्दवम् = सकोमलतम्
व्याख्यायि=कथितम् । घृतेन स्नातु भवद्रसनेति, "आपके मुँह में
चीनी" इत्यर्थकलोकप्रवादकथनम् । अत एव लोकोक्तिरलङ्कारः ।

तत्र चेत्यारस्य प्रधानपटकुटीरद्वारमाससादेत्येकान्वयि । ताम्रकम्
"तमाखू" इति हिन्दी ताम्रकधूमनिःश्वासस्य स्वत एव श्यामलस्य मुखादुद्गमित
कालसर्पत्वेनोत्प्रेक्षा। यथैन्द्रजालिका जनान्मोहयितुमाननात् कृष्णान् सर्पानुद्गम
तथैवैते शिववीरमोहनाय स्थिता इत्युपमालङ्कारस्य व्यङ्ग्यत्वेन वस्त्वलङ्का

के नाम से अंकित गोल पीतल की चपरास छाती की बाईं ओर डाले, कंधे
बन्दूक रखकर इधर-उधर गश्त लगा रहे किसी आदमी ने उन्हें टोक क
उर्दू भाषा में कहा : 'कौन है, यह कौन ?' गौरसिंह ने नम्रता से क
'मैं गायक हूँ, हूजूर से मिलना चाहता हूँ ।' तब प्रहरी के 'जाओ और
गाने और बजाने वाले अभी-अभी गये हैं' यह कहने पर, 'आपके मुँह में
शक्कर' कहता हुआ गौरसिंह शिविर में प्रविष्ट हो गया ।

वहाँ कहीं खाटों और पलंगों पर बैठे हुए गड़गड़ शब्द के साथ तम्बा
का धुआँ खींच कर मुँह से काले सर्पों के समान धुआँ निकाल रहे, मानो अ
हृदय की कालिमा को प्रकट कर रहे, मानो अपने पूर्वजों द्वारा उपार्जि

पुण्यलोकानिव फूत्कारैरग्निसात् कुर्वतः, मरणोत्तरमतिदुर्लभं मुखाग्निसंयोगं जीवन-दशायामेवाऽऽकलयतः, प्राप्ताधिकारकलिताखर्वगर्वान्; क्वचिद् "हरिद्रा हरिद्रा, लशुनं लशुनम्, मरिचं मरिचम्, चुक्रं चुक्रम्, वितुन्नकं वितुन्नकम्, शृङ्गवेरं शृङ्गवेरम्, रामठं रामठम्, मत्स्यण्डी मत्स्यण्डी, मत्स्या मत्स्याः कुक्कुटाण्डं कुक्कुटाण्डम्, पललं पललम्" इति कलकलैर्बालानां निद्रां विद्रावयतः,

ध्वनिः। अन्यथोत्प्रेक्षते—स्वहृदयस्य कालिमानमिव। पुनरप्युत्प्रेक्षते—स्वपूर्वपुरुषैः=अन्वयमूलभूतैः, उपार्जितान्=सञ्चितान्, पुण्यलोकान्=स्वर्गादिकान्। अग्निसात्=वह्न्यधीनीभूतान्। दहत इति भावः। ताम्रकधूमाकर्षणमग्निसंस्कारत्वेनोत्प्रेक्षते—मरणादुत्तरम्=देहत्यागानन्तरम्। प्राप्तेन=लब्धेन, अधिकारेण=स्वाम्येन, अखर्वः=बहुलीभूतः, गर्वः=अभिमानो येषां तान्। हरिद्रा=महारजनम्। "निशाह्वा काञ्चनी पीता हरिद्रा वरवर्णिनी" इत्यमरः। संभ्रमे द्विरुक्तिः। चुक्रम्=वृक्षाम्लम्। "तिन्तिडीकं च चुक्रं च वृक्षाम्लम्" इत्यमरः। "चूक" इति हिन्दी। वितुन्नकम्=छत्रा। "अथ च्छत्रा वितुन्नकम्" इत्यमरः। "सौंफ" इति हिन्दी। शृङ्गवेरम्=आर्द्रकम्। "आर्द्रकं शृङ्गवेरं स्यात्" इत्यमरः। "आदी" इति हिन्दी। रामठम्=हिङ्गु। मत्स्यण्डी=फाणितम्। "राव" इति हिन्दी। कुक्कुट्या अण्डं कुक्कुटाण्डम्। "कुक्कुट्यादीनामण्डादिषु" इति पुंवत्त्वम्, पललम्=मांसम्। विद्रावयतः=

स्वर्गादि पुण्य-लोकों को फूंक मार कर जला रहे, मरने के बाद (मुसलमानों के मुर्दों का जलाना उनके धर्म से निषिद्ध होने के कारण) न प्राप्त हो सकने वाले अग्नि-संयोग को जीवित दशा में ही प्राप्त कर ले रहे, अधिकार सम्पन्न होने से अत्यधिक घमण्ड में चूर हो रहे, यवनयुवकों; और कहीं 'हल्दी-हल्दी, लहसुन-लहसुन, मरिच-मरिच, खटाई-खटाई, सौंफ-सौंफ, अदरख-अदरख, हींग-हींग, राव-राव, मछलियाँ-मछलियाँ, मुर्गी का अण्डा-मुर्गी का अण्डा, मांस-मांस के

समीप-संस्थापित-कुतू-कुतुप-कर्करी-कण्डोल-कट-कटाह-कम्बि-कडम्बान्, उग्रगन्धीनि मांसानि शूलाकुर्वतः, नखम्पचा यवागू स्थालिकासु प्रसारयतः, हिङ्गुगन्धीनि तेमनानि तिन्तिडीरसैर्मिश्रयतः परिपिष्टेषु कलम्बेषु जम्बीर-नीरं निश्च्योतयतः, मध्ये मध्ये समागच्छतस्ताम्रचूडान् व्यजन-ताडनैः पराकुर्वतः, त्रपु-लिप्तेषु

दूरयतः। कुतूः = चर्मनिर्मितं तैलाद्याधारपात्रम्। कुतुपः = सैव लघुः। "कुतूः कृत्तेः स्नेहपात्रं सैवाल्पा कुतुपः पुमान्" इत्यमरः। कर्करी = हस्तप्रक्षालनादियोग्यं पात्रम्। "कर्कर्यालुर्गलन्तिका" इत्यमरः। "करवा"। "गडुवा" इति हिन्दी। यवनानां "बधना" इति। कण्डोलः = पिटः। वेणुदलादिरचितो भाण्डविशेषः। "बाँस की पिटारी" इति हिन्दी। कटः = किलिञ्जकः। कटाहः = शष्कुल्यादि पाकपात्रम्। "कड़ाही" इति भाषायाम्। कम्बिः = दर्विः। "कलछी" इति हिन्दी। कडम्बः = कलम्वः। शूलेन = लोहशलाकया, शूलाकुर्वतः = संस्कुर्वतः। "शूलात् पाके" इति डाच्। नखम्पचन्ति यास्ता नखम्पचाः। यवागूः = तरला। "यवागूरुष्णिका धाना विलेपी तरला च सा" इत्यमरः। हिङ्गुनो गन्धो येषु तानि हिङ्गुगन्धीनि। "अल्पाख्यायाम्" इति गन्धस्येकारः। "गन्धो गन्धक आमोदे लेशे सम्बन्धगर्वयोः" इत्यमरः। तेमनानि = व्यञ्जनानि। तिन्तिडीरसैः = चुक्ररसैः। मिश्रयतः = संयोजयतः। अत्र विशेष्यविशेषणाभ्यां "कढ़ी" इति ख्यातस्य ग्रहणम्। कलम्बेषु = वास्तुकादिशाकदण्डेषु। "अस्त्री शाकं हरितकं शिग्रुरस्य तु नाडिका। कलम्बश्च कडम्बश्च" इत्यमरः। "पिसी हुई चटनी में

कोलाहल से बच्चों की नींद हराम कर रहे, पास में ही कुप्पा, कुप्पी, करवा (गड़ुआ या बधना), टोकरी, चटाई, कड़ाही, करछुल और साग के डण्ठल रखे, दुर्गन्ध देने वाले मांस खण्डों को लोहे की सलाखों में पिरोकर पका रहे, गरम-गरम गीला भात थालियों में परोस रहे, हींग से बघारी कढ़ी में इमली का रस मिला रहे, पिसी हुई चटनी में नीबू का रस निचोड़ रहे, बीच-बीच में आने वाले मुर्गों को पंखों से मार-मार कर भगा रहे, और कलई किये हुए

ताम्र–भाजनेषु आरनालं परिवेषयतः सूदान्; क्वचिद् वक्र–प्रसाधित-काकपक्षान्, मद-व्याघूर्णित-शोण-नयनान्, सपारस्परिक-कण्ठग्रहं पर्य्यटतः, यौवन-चुम्बित-शरीरान्, स्वसौन्दर्य-गर्व-भारेणेव मन्द-गतीन्, अनवरताक्षिप्त-कुसुमेषु-बाणैरिव कुसुमैर्भूषितान्, वसना-तिरोहिताङ्गच्छटान्, विविध-पटवास-वासितानपि . चिरास्नान-

---

इति हिन्दी । निश्च्योतयूतः = क्षारयतः । ताम्रचूडान् = कुक्कुटान् । त्रपु-लिप्तेषु = "कलई किये हुए" इति हिन्दी । आरनालम् = काञ्जिकम्, "आरनालकसौवीरकुल्माषाभिषुतानि च । काञ्जिके" इत्यमरः । सूदान् = पाचकान् । वक्रम् = यथा तथा प्रसाधिताः = स्फालिताः, काकपक्षाः = कुञ्चितकचाः "काकुल" इति हिन्दी, यैस्तान् । मदेन = व्याघूर्णितानि शोणानि नयनानि येषां तान् । पारस्परिकेण = आन्योन्येन, कण्ठग्रहेण = गलधारणेन सहितं यथा स्यात् तथेति पर्यटनक्रियाविशेषणम् । यौवनेन = नववयसा, चुम्बि-तानि = सम्बद्धानि, शरीराणि येषां तान् । चुम्बितपदं लक्षणया सम्बद्धबोधकम्, वक्त्रसंयुक्तत्वरूपस्य मुख्यार्थस्य बाधात् । स्वभावतो मन्दाया गतेर्निमित्तमुत्प्रेक्षते-स्वसौन्दर्यस्य = गर्वभारेणेवेति । कुसुमभूषितेषु तेषु कुसुमानि कुसुमेषुधनुर्निपति-तानीत्युत्प्रेक्षते—अनवरतम् = सततम्, आक्षिप्ताः = पतिताः, कुसुमेषु-बाणाः = कामशराः, येषु तान् । वसनैः = वस्त्रैः, अतिरोहिता अङ्गच्छटा येषां तान् । विविधैः = पटवासैर्वासितानपि, चिरास्नानेन = अत्यधिककालतो

ताँबे के वर्तनों में कांजी परोस रहे रसोइयों को, कहीं तिरछी जुल्फें सँवारे हुए, नशे से झूमते लाल आँखों वाले, एक दूसरे के गले में हाथ डाले घूमते हुए, नई जवानी वाले, मानों अपने सौन्दर्य के घमण्ड के भार से धीरे-धीरे चल रहे, निरन्तर चलाए जा रहे मानों कामबाणरूपी पुष्पों से अलंकृत, कपड़ों से अङ्गच्छवि को तिरोहित न कर सकने वाले, नाना प्रकार के इत्रों से सुगन्धित

महा-मलिन-महोत्कट-स्वेद--पूतिगन्ध-प्रकटीकृतास्पृश्यतान् यवन-युवकान्;

क्वचिद्–"अहो ! दुर्गमता महाराष्ट्रदेशस्य ! अहो, दुराधर्षता महाराष्ट्राणाम्, अहो ! वीरता शिववीरस्य, अहो ! निर्भयता एतत्सेनानीनाम्, अहो, त्वरितगतिरेतद्घोटकानाम्, आः ! किं कथयामः ? दृष्ट्वैव चमत्कारं शिववीर-चन्द्रहासस्य न वयं पारयामो धैर्यं धत्तुम्, न च शक्नुमो युद्धस्थाने स्थातुम्, को नाम द्विशिरा यः शिवेन योद्धुं गच्छेत् ? कश्च नाम द्विपृष्ठो यस्तद्भटैरपि छलालापं विदध्यात् ? वयं बलिनः, आस्माकीना महती सेना, तथाऽपि न जानीमः, किमिति

देहानिर्णेजनेन, महामलिनस्य = अत्यन्तं मलीमसस्य, महोत्कटस्य = अत्युग्रस्य, स्वेदस्य = घर्मवारिणः, पूतिगन्धेन = दौर्गन्ध्येन, प्रकटीकृता = व्यक्तीकृता, अस्पृश्यता = स्पर्शायोग्यता, यैस्तान् ।

क्वचिद् व्याहरन्त इति द्वितीयान्तेन सम्बन्धः । व्याहरणं कथयति–अहो इति । दुराधर्षता = दुरभिभवनीयता । द्वे शिरसी यस्यासौ द्विशिराः = द्विशीर्षः, एवम्भूत एव हि परितः प्रसृतान् तदीयान् भटान् छलयन् रहस्यमाख्यातुमर्हति, य उभयतोदृष्टिर्भवेदिति तत्त्वम् । द्वे पृष्ठे यस्यासौ द्विपृष्ठः । यस्य पृष्ठद्वयं भवेत्, स एव तद्भटेन छलं कुर्यात्, न तु

होते हुए भी, बहुत दिनों से स्नान न करने के कारण कुचैले और उग्र गन्ध वाले पसीने की वदबू से अपनी अस्पृश्यता को प्रकट कर रहे यवन युवकों;

तथा कहीं 'उफ़ ! महाराष्ट्र देश बड़ा दुर्गम है, ओह ! मराठे बड़े दुर्धर्ष हैं, ओह ! शिवाजी की वीरता अद्भुत है, इसके सैनिक बड़े निडर हैं, इसके घोड़े कितने तेज हैं ? आह, क्या कहें, शिवाजी की तलवार की चमक देखकर ही हमारे छक्के छूट जाते हैं और युद्धस्थल में टिक सकना हमारे लिए कठिन हो जाता है। कौन दो सिर वाला होगा, जो शिवाजी से लड़ने जायगा और कौन दो पीठ वाला होगा, जो उसके सैनिकों से भी छल-छन्द की वात करेगा ? हम लोग वलशाली हैं, हमारी सेना भी बहुत बड़ी

कम्पत इव क्षुभ्यतीव च हृदयम् ! 'यवनानां पराजयो भविष्यति, अपजलखानो विनङ्क्ष्यति' इति न विद्मः को जपतीव कर्णे, लिखतीव सम्मुखे, क्षिपतीव चान्तःकरणे। मा स्म भोः ! मैवं स्यात्, रक्ष भो ! रक्ष जगदीश्वर ! अथवा सम्बोभवीतितमामेवमपि, योऽयमपजलखानः सेनापति-पद-विडम्बनोऽपि 'शिवेन योत्स्ये हनिष्यामि ग्रहीष्यामि वा' इति सप्रौढि विजयपुराधीशमहासभायां प्रतिज्ञाय समायातोऽपि, शिव-प्रतापं च विदन्नपि "अद्य नृत्यम्, अद्य गानम्, अद्य लास्यम्, अद्य मद्यम्, अद्य वाराङ्गना, अद्य भ्रूकुंसकः, अद्य वीणावादनम्" इति स्वच्छन्दै-रुच्छृङ्खलाऽऽचरणैर्दिनानि गमयति। न च यः कदापि विचारयति, यत्

साधारण इति भावः। जपतीव = मन्दं कथयतीव। इवेन न वास्तवो जप इति सूचितम्। पुनः पुनः सम्भवति, सम्बोभवीति, अतिशयेन सम्बोभवीति सम्बोभवीतितमाम्। "वर्त्तमानसामीप्ये वर्त्तमानवद् वा" इति लट्। भ्रूकुंसकः = स्त्रीवेषधारी नर्त्तकः। भ्रुवोः कुंसः = भाषणम्, भ्रुवा कुंसः =

है, फिर भी न जाने क्यों हृदय काँपता-सा है, क्षुब्ध-सा होता है। 'यवनों की हार होगी, और अफ़ज़लखाँ मारा जायगा' इस प्रकार न जाने कौन कान में धीरे से कह-सा रहा है, सामने लिख-सा रहा है, दिल में यही बात जम-सी रही है। नहीं-नहीं ऐसा कभी नहीं होगा, या खुदा बचाना ! अथवा ऐसा हो भी सकता है, क्योंकि सेनापति पद को विडम्बित करने वाला जो यह अफ़ज़ल खाँ, यद्यपि 'मैं शिवाजी से लड़ूँगा, उसे या तो मार डालूँगा, या कैद कर लाऊँगा' इस प्रकार बीजापुर के सुल्तान की सभा में प्रतिज्ञा करके आया है, और शिवाजी के पराक्रम से भी भली-भाँति परिचित है, फिर भी आज नाच है तो आज गाना है, आज शृङ्गारप्रधान स्त्रीनृत्य है तो आज मदिरा है, आज वेश्या है तो आज स्त्रीवेषधारी नर्तक है, आज सितारवादन है, इस प्रकार स्वच्छन्द उच्छृङ्खल असदा-चरणों से दिन बिता रहा है। जो कभी भी यह नहीं सोचता, कि कहीं

कदाचित् परिपन्थिभिः प्रेषिता काचन वारवधूरेव मामासवेन स[ह]
विषं पाययेत्, कोऽपि नट एव ताम्बूलेन सह गरलं ग्रासयेत्, कोऽ[पि]
गायक एव वा वीणया सह खड्गमानीय खण्डयेदित्यादि; ध्रुव ए[व]
तस्य विनाशः, ध्रुवमेव पतनम्, ध्रुवमेव च पशुमारं मरणम्। तन्न व[यं]
तेन सह जीवन-रत्नं हारयिष्यामः"—इति व्याहरतः; इतरांश्च—

"मैवं भोः! श्व एव आहव-क्रीडाऽस्माकं भविष्यति, तत् श्रूय[ते]
सन्धि-वार्त्ता-व्याजेन शिव एकत आकारयिष्यते, यावच्च स स्वसेना[-]
मपहाय एकाकी अस्मत्स्वामिना सहाऽऽलपितुमेकान्तस्थाने यास्यति[,]
तावद् वयं श्येना इव शकुनिमण्डले महाराष्ट्र-सेनायां, छिन्धि

शोभा वा यस्य सः। आसवेन = मद्येन। जीवनरत्नम् = श्रेष्ठं जीवनम्
रत्नशब्दः श्रेष्ठवाची। "रत्नं स्वजातिश्रेष्ठेऽपि" इत्यमरः। इतरांश्च कर्णान्ति[क]
मुख मानीयोत्तरयत इति सम्बन्धः। उत्तरं प्रदर्शयति—मैवमिति। आहवः=
सङ्ग्रामः, स एव क्रीडा। श्येना इव = बाजपक्षिण इव। शकुनिमण्डले=

दुश्मनों द्वारा भेजी गई कोई वेश्या ही मुझे मदिरा के साथ विष न पिला [दे]
कोई नट ही पान के साथ जहर न खिला दे, कोई गायक ही वीणा के सा[थ]
खड्ग लाकर मेरे टुकड़े-टुकड़े न कर दे, उसका विनाश अवश्यम्भावी है, उस[का]
पतन होने में कोई सन्देह नहीं, उसका पशुवत् मारा जाना निश्चित है[,]
इसलिए हम उसके साथ अपना बहुमूल्य जीवन नहीं गँवायेंगे।' इ[स]
प्रकार कहते हुए कुछ सिपाहियों और दूसरों को उनके कान के पा[स]
मुँह ले जाकर, 'ऐसा मत कहो, कल ही हमारी युद्ध-क्रीड़ा होगी, सुन[ते]
हैं कि सन्धि की बातचीत के बहाने शिवाजी को एक ओर बुलाया जायगा, औ[र]
ज्यों ही वह अपनी सेना को छोड़कर हमारे मालिक के साथ बात करने के लि[ए]
एकान्त स्थान में जायँगे, हम लोग पक्षियों पर बाज की तरह, मराठों की सेन[ा]

भिन्धि-इति कृत्वा युगपदेव पतिष्यामः, वसन्त-वाताहत-नीरसच्छदानिव च क्षणेन विद्रावयिष्यामः। इतस्तु छलेनाऽस्मत्स्वामिसहचराः शिवं पाशैर्बध्वा पिञ्जरे स्थापयित्वा तं जीवन्तमेव वशंवदं करिष्यन्ति। परन्तु गोप्यतमोऽयं विषयो मा स्म भूत् कस्यापि कर्णगतः"—इति कर्णान्तिकं मुखमानीयोत्तरयतः साङ्ग्रामिक-भट्टानवलोकयन्; "धन्या भवन्तो येषां गोप्यतमा अपि विषया एवं वीथिषु विकीर्यन्ते। महाराष्ट्रा धूर्ताचार्याः, नैतेषु भवतां धूर्तता सफला भवति" इत्यात्मन्येवाऽऽत्मना कथयन्, स्व-प्रभा-धर्षित-सकलरक्षकगणः स्वसौन्दर्येणाऽऽकर्षयन्निव विश्वेषां मनांसि, सपद्येव प्रधान-पट-कुटीर-द्वारमाससाद। तत्र च प्रहरिणमालोकयदुक्तवांश्च यत् पुण्यनगर-निवासी गायकोऽहमत्रभवन्तं गान-रस-रसायनैरमन्दमानन्दयितुमिच्छामीति। तदवगत्य स भ्रूसञ्चारेण कञ्चित् निवेदकं सूचितवान्। स चान्तः प्रविश्य,

---

पक्षिसमूहे। वसन्तवातेन आहतान्, अत एव नीरसान् = शुष्कान्, छदानिव = पत्राणीव। उपमा। वशं वदतीति वशंवदस्तम्। "प्रियवशे वदः खच्" इति खच्। आकर्षयन् = वशीकुर्वन्। वीणाया आवरणम् =

पर मार-काट मचाते हुए एक साथ टूट पड़ेंगे, और क्षण भर में ही उसे वसन्त (पतझड़) ऋतु की हवा से आहत सूखे पत्तों की तरह मार भगायेंगे। इधर हमारे मालिक के नौकर, शिवाजी को छल से रस्सियों में बाँधकर, पिंजड़े में बन्द करके, जीते जी ही अपने वश में कर लेंगे। लेकिन यह विषय बड़ा ही गोपनीय है, किसी के कान में न पड़ने पाये, इस प्रकार उत्तर देते हुए देखकर, मन-ही-मन 'आप लोग धन्य हैं, जिनके अति गोपनीय विषय भी रास्तों में इस प्रकार फैले रहते हैं, पर मराठे परले सिर के धूर्त हैं, आपकी धूर्तता इनके आगे सफल नहीं हो सकती' ऐसा कहते हुए, अपने तेज से सभी पहरेदारों को निष्प्रभ कर, अपनी सुन्दरता से सभी के हृदयों को अपनी बात की ओर खींचते हुए से गौरसिंह (तानरंग) बात की बात में प्रधान खेमे के दरवाजे पर पहुँच गये। वहाँ पहरेदार से मिले और कहा कि पूना नगर का निवासी एक गायक मैं हुजूर को गानरस के रसायन से अधिक आनन्दित

क्षणानन्तरं पुनर्बहिर्निर्गत्य गायकमपृच्छत्—'किं नाम भवतः पूर्वं च कदाऽपि समायातो न वा ?' अथ स आह—'तानरङ्गनामाः कदाचन युष्मत्कर्णमस्पृशम् । न पूर्वं कदाऽपि ममात्रोपस्थातुं संयो ऽभूत्, अद्य भाग्यान्यनुकूलानि चेत्, श्रीमन्तमवलोकयिष्यामि' इति स च 'आम्' इत्युदीर्य पुनः प्रविश्य क्षणानन्तरं निर्गत्य च, विचि गायकममुं सह निनाय ।

तानरङ्गस्तु तेनैव तानपूरिका-हस्तेन बालकेनाऽनुगम्यमा शनैः शनैः प्रविश्य, प्रथमं द्वितीयं तृतीयं च द्वारमतिक्रम्य, कांश्चि मृदङ्ग-स्वरान् सन्दधतः, कांश्चिद् वीणावरणमुन्मुच्य, प्रवालं प्रोञ्छ कोणं कलयतः, कांश्चिदविचलोऽयमेतेनैव सह योज्यन्तामपरवा नीति वंशीरवं साक्षीकुर्वतः; कांश्चित् कलित-नेपथ्यान्, पादयो

आच्छादनवस्त्रम् । प्रवालम्=वीणादण्डम्, "वीणादण्डः प्रव स्यात्" इत्यमरः । कोणम्=वादनोपयोगिनमुपकरणविशेषम् । "मिजरा इति हिन्दी । साक्षीकुर्वतः=साक्षाद्दर्शितां नयतः । इतरवाद्यसत्य

करना चाहता हूँ। उनका भाव समझकर उसने भौंहों के इशारे से एक सन्दे वाहक को सूचित किया। उसने अन्दर जाकर क्षण भर बाद पुनः बाहर आ गायक से पूछा 'आपका नाम क्या है ? आप पहले कभी आये हैं या नहीं गायक ने कहा 'मेरा नाम तानरङ्ग है, शायद कभी यह नाम आपके कानं पड़ा हो। मुझे पहले कभी यहाँ आने का अवसर नहीं मिला, आज यदि भा साथ दिया, तो हुजूर के दर्शन करूँगा।' वह 'अच्छा' कह कर भीतर जाकर थोड़ी ही देर में बाहर आकर उस विचित्र गायक को साथ ले गया।

तानरङ्ग—जिसके पीछे-पीछे तानपूरा हाथ में लिए वह बालक चल था—ने धीरे-धीरे प्रवेश कर, पहले, दूसरे और तीसरे दरवाजे को पार किसी को मृदङ्ग के स्वर साधते, किसी को वीणा का गिलाफ उतार कर, वी दण्ड को पोंछ कर, कोण (मिजराफ) पहनते, किसी को 'बाँसुरी का स्वर चल है, इसी के साथ अन्य बाजों को मिलाओ' यह कहते; किसी को वेष

बध्नतः; काँश्चित् स्कन्धावलम्बिगुटिकातः करतालिकामुत्तोलयतः; कांश्चिच्च कर्णे दक्षकरं निधाय, चक्षुषी सम्मील्य, नासामाकुञ्च्य, पातितोभयजानु उपविश्य, वामहस्तं प्रसार्य, तन्त्रीस्वरेण स्व-काकलीं मेलयतः; सम्मुखे च पृष्ठतः पार्श्वतश्चोपविष्टैः कैश्चित् ताम्बूल-वाहकैः, अपरैर्निष्ठ्यूतादान-भाजन-हस्तैः, अन्यैरनवरत-चालित-चामरैः, इतरैर्बद्धाञ्जलिभिर्लालाटिकैः परिवृतम्, रत्नजटितोष्णीषिकामस्तकम्, सुवर्ण-सूत्र-रचित-विविध-कुसुम-कुड्मल-लता-प्रतानाङ्कित-कञ्चुकं महोपबर्हमेकं क्रोडे संस्थाप्य, तदुपरि सन्धारितभुजद्वयम्, रजत-पर्यङ्के विविध-फेन-फेनिल-क्षीरधि-जल-तल-

प्रमाणतां प्रापयत इति यावत्। **करतालिकाम्**="करताल" इति हिन्दी। **काकलीम्**=सूक्ष्मं कलम्। 'ईषदर्थे चेति' कोः कादेशः, गौरादित्वात् ङीष्। "काकली तु कले सूक्ष्मे" इत्यमरः। **निष्ठ्यूतादानम्**=पतद्ग्रहः। "पीकदान" इति हिन्दी। **लालाटिकैः**=अधिपतिभालमात्रावलोकनक्षमैर्न तु कार्यसम्पादकैः। "लालाटिकः प्रभोर्भालदर्शी कार्याक्षमश्च यः" इत्यमरः। **सुवर्णसूत्रेण**=सूक्ष्मतमसुवर्णतन्तुना, "कलावत्तू" इति हिन्दी, रचिता या **विविधाः**=अनेकप्रकाराः, **कुसुमकुड्मललताः**=पुष्पकलिकावल्ल्यः, तासां **प्रतानैः**=वितननैः, **अङ्कितः**=अञ्चितः, **कञ्चुकः**=निचोलो यस्य तम्। **महोपबर्हम्**=महोपधानम्। "मसनद" इति हिन्दी। **विविधफेनेन**=प्रचुरडिण्डीरेण, **फेनिलस्य**=

कर पैरों में घुँघुरू बाँधते; किसी को कन्धे पर लटकती झोली से करताल निकालते; किसी को कान पर दाहिना हाथ रखकर, आँखें मूँदकर, नाक सिकोड़ कर, घुटनों के बल बैठ कर, बायाँ हाथ फैला कर, वीणा के स्वर के साथ अपनी काकली (सूक्ष्म कलगान) का मिलान करते; और सामने, पीछे तथा दायें-बायें बैठे हुए कुछ ताम्बूल-वाहकों, दूसरे हाथ में पीकदान लिए लोगों, अन्य निरन्तर चँवर डुला रहे आदमियों तथा दूसरे हाथ जोड़े खड़े चापलूस नौकरों से घिरे हुए, सिर पर रत्न जड़ी टोपी लगाये हुए, सोने के तारों से कढ़े विविध फूलों, कलियों और वेलबूटों वाली अचकन पहने, गोद में एक बड़ी-सी मसनद रखकर उस पर अपने दोनों हाथ रखे हुए, चाँदी के पलंग के ऊपर, प्रचुर

च्छविमङ्गीकुर्वत्यां तूलिकायामुपविष्टमपजलखानं च ददर्श।

ततस्तु तानरङ्ग-प्रभा-वशीभूतेषु सर्वेषु 'आगम्यतामागम्यता मास्यतामास्यताम्' इति कथयत्सु, तानरङ्गोऽपि सादरं दक्षिण-हस्ते नाऽऽदरसूचक-सङ्केत-सहकारेण यथानिर्दिष्टस्थानमलञ्चकार।

ततस्तु इतरगायकेषु सगर्वं सासूयं सक्षोभं साक्षेपं सचक्षुः स्फारणं सशिरःपरिवर्तनं च तमालोकयत्सु अपजलखानेन स तस्यैवमभूदालापः—

अपजलखानः—किन्देशवास्तव्यो भवान्?

तानरङ्गः—श्रीमन्! राजपुत्रदेशीयोऽहमस्मि।

फेनसंवलितस्य, क्षीरधेः=वारिधेः, जलतलस्य छविम्=शोभाम्, अङ्गीकु त्याम्=धारयन्त्याम्। तूलमस्ति यस्यां सा तूला=तूलवती, तूलैव तूलिका तूलमयो विष्टरः, तस्याम्। "रूई की गद्दी, तोसक" इति हिन्दी। कूर्प पर्यायत्वमनुचिन्तयत्तस्तु चिन्तनीयवुद्धय एवेति शम्।

आदरसूचकसङ्केतः="सलाम" इति हिन्दी।

वास्तव्यः=निवासी। "वसेस्तव्यत् कर्त्तरि णिच्च" इति तव्यत्

फेन से फेनिल समुद्र के जल के समान सुन्दर गद्दे पर बैठे अफ़ज़ल ख़ाँ को देखा।

उसके बाद तानरङ्ग की चमक-दमक से सबके मन्त्रमुग्ध होकर 'आइये आइये! बैठिये! बैठिये!' कहने पर, तानरङ्ग ने भी दाहिने हाथ से सलाम करते हुए निर्दिष्ट आसन अलंकृत किया।

अन्य गायकों के गर्व, ईर्ष्या, झुंझलाहट और निन्दा के साथ आँखें फाड़ फाड़ कर तथा सिर हिला-हिला कर तानरङ्ग को देखने पर, अफ़ज़ल खाँ के साथ तानरङ्ग की इस प्रकार बातचीत हुई :

अफ़ज़ल खाँ—आप किस देश के निवासी हैं?

तानरङ्ग—हुजूर! मैं राजपूताने का हूँ।

अपजल०—ओः ! राजपुत्रदेशीयः ?

तान०—आम् ! श्रीमन् !

अप०—तत् कथमत्र महाराष्ट्रदेशे ?

तान०—सेनापते ! मम देशाटन-व्यसनं मां देशाद् देशं पर्याटयति।

अप०—आः ! एवम् ! तत् किं प्रायः पर्य्यटति भवान् ?

तान०—एवं चमूपते ! नव्यान् देशानवलोकयितुम्, नवा नवा भाषा अवगन्तुम् नूतना नूतना गान-परिपाटीश्च कलयितुम् एधमान–महाभिलाष एष जनः।

अप०—अहो ! ततस्तु बहुदर्शी बहुज्ञश्च भवान्। अथ वङ्गदेशे गतो भवान् ? श्रूयतेऽतिवैलक्षण्यं तद्देशस्य।

तान०—सेनापते ! वर्षत्रयात् पूर्वमहं काश्यां गङ्गायां संस्नाय, उज्जयिनी-देशीय-क्षत्रिय-कुलालङ्कृतं भोजपुरदेशमालोक्य, गङ्गा-गण्डक-तटोपविष्टं हरिहरनाथं प्रणम्य, विलासि–कुल–विलसितं

पर्याटयति = सर्वतो भ्रामयति। एधमानः = वृद्धिं गच्छन्, महान् अभिलाषः = इच्छा, यस्य सः। उज्जयिनीदेशीय-क्षत्रियकुलालङ्कृतम्, अत एव

अफ़ज़ल खाँ—ओह ! राजपूताने के ?

तानरङ्ग—हाँ, हुजूर !

अफ़ज़ल खाँ—तो यहाँ महाराष्ट्र देश में कैसे आना हुआ ?

तानरङ्ग—सेनापति जी ! अपने घूमने के शौक के कारण मैं एक देश से दूसरे देश में घूमता रहता हूँ।

अफ़ज़ल खाँ—अच्छा, यह बात है, तो क्या आप अक्सर घूमा करते हैं ?

तानरङ्ग—हाँ सेनापति जी ! नये-नये देशों को देखने, नई-नई भाषाओं को जानने, नई-नई गान-शैलियों को सीखने का मुझे बड़ा शौक है।

अफ़ज़ल खाँ—तब तो आपने बहुत कुछ देखा-सुना है। आप क्या बंगाल गये हैं ? सुनते हैं वह देश बड़ा अद्भुत है।

तानरङ्ग—सेनापति जी ! मैंने तीन साल पहले काशी में गङ्गा में नहाकर, उज्जैन के क्षत्रिय-वंशों से अलंकृत भोजपुर देश को देखकर, गङ्गा और गण्डक नदियों के तट पर विराजमान हरिहरनाथ को प्रणाम कर, विलासी लोगों से

पाटलिपुत्र-पुरमुल्लङ्घ्य सीताकुण्ड-विक्रमचण्डिकादि-पीठ-पटल-पूजितं विक्रम-यशःसूचक-दुर्गविशेष-शोभितं देवधुनी-तरङ्गक्षालित-प्रान्तं मुद्गलपुरं निरीक्ष्य, कर्ण-दुर्ग-स्थानेन तद्यशोमहामुद्रयेवाङ्कित-मङ्गदेशं दिनत्रयमध्युष्य, अतिवर्द्धमानवैभवं वर्द्धमान-नगरं च सम्यक् समालोक्य, यथोचित-सम्भारैस्तारकेश्वरमुपस्थाय, ततोऽपि पूर्वं वङ्ग-देशे, पूर्ववङ्गेऽपि च चिरमहमटाट्यामकार्षम् ।

अप०—किं किं किं पूर्ववङ्गेऽपि ?

तान०—आम् श्रीमन् ! पूर्ववङ्गमपि सम्यगवालुलोकदेष जनः, यत्र प्रान्त-प्ररूढां पद्मावलीं परिमर्दयन्ती पद्मेव द्रवीभूता पयः—पूर-प्रवाह-परम्पराभिः पद्मा प्रवहति, यत्र ब्रह्मपुत्र इव शत्रु-सेना-नाशन-

---

भोजपुरमिति तन्नाम। भोजो हि बभूवोज्जयिन्या नातिदूरे धारानगरे । देवधुन्याः = जह्नुतनयायाः, तरङ्गैः, क्षालितः प्रान्तो यस्य तत् । मुद्गलपुरम् = 'मुङ्गेर' इति ख्यातम् । वर्द्धमाननगरम् = अद्यत्वे "वर्दवान" इति ख्यातम् ।

अटाट्याम् = पर्यटनम् ।

अवालुलोकत् = अवलोकयाञ्चकार । प्रान्तयोः = तटोपान्तयोः, प्ररूढाम् = समुद्भूताम् । पद्मावलीम् = कमलश्रेणीम् । सैरिति कमलानि विकसन्तीति कविसमयख्यातिः । पद्मेव = श्रीरिव । द्रवीभूता = प्रस्नुता । पद्मा = तन्नाम्नी नदी । ब्रह्मपुत्रः = गरलविशेषः । "ब्रह्मपुत्रः प्रदीपनः" इत्यमरः।

सुशोभित पटना नगर को पार कर, सीताकुण्ड, विक्रमचण्डिका आदि पीठों से पूजित, वीर विक्रमादित्य की कीर्ति के परिचायक खण्डहरों से सुशोभित और गङ्गा की लहरों से घुले प्रान्त मुंगेर का दर्शन कर, कर्ण-दुर्ग स्थान रूपी महाराज कर्ण की मुद्रा से अङ्कित से अङ्गदेश में तीन दिन तक निवास कर, महा समृद्धि-शाली वर्दवान नगर को भली-भाँति देखकर, समुचित सामग्री से भगवान् तारकेश्वर की पूजा करके, उससे भी पूर्व में स्थित वंगाल में और पूर्वी वंगाल में, वहुत दिनों तक भ्रमण किया है ।

अफ़ज़ल खाँ—क्या, क्या, क्या, पूर्वी वंगाल में भी ?

तानरंग—हाँ हुजूर ! मैंने पूर्वी वंगाल भी खूब अच्छी तरह देखा है जहाँ किनारे उगी हुई कमल की पंक्ति को जलप्रवाह से मसलती हुई, जलरूप में परिणत हो गई लक्ष्मी के समान, पद्मा नदी वहती है, जहाँ ब्रह्मपुत्र (एक विशेष

कुशलः ब्रह्म-देशं विभजन् ब्रह्मपुत्रो नाम नदो भूभागं क्षालयति, यत्र साम्ल-सुमधुर-रस-पूरितानि फूत्कारोद्धूत-भूति-ज्वलदङ्गार-विजित्वर-वर्णानि जगत्प्रसिद्धानि नारङ्गाण्युद्भवन्ति, यद्देशीयानां जम्बीराणां रसालानां तालानां नारिकेलानां खर्जूराणां च महिमा सर्वदेश-रसज्ञानां साम्रेडं कर्णं स्पृशति, यत्र च भयङ्कराऽऽवर्त्त-सहस्राऽऽकुलासु स्रोतस्वतीषु सहोहोकारं क्षेपणीः क्षिपन्तः, अरित्रं चालयन्तः, वडिशं योजयन्तः, कुवेणीस्थ म्रियमाणमत्स्यपरीवर्त्तनालोकमालोकमा-

ब्रह्मदेशम् = "वर्मा" इति ख्यातदेशम्। साम्ल-सुमधुरः = 'खट-मीठ' इति भाषा। फूत्कारेण = मुखवायुना, उद्धूता = उड्डायिता, भूतिः = भस्म, येषां तादृशा ये ज्वलदङ्गाराः = प्रकाशमानाङ्गाराः, तेषां विजित्वराः = जयनशीलाः, वर्णा येषां तानि। नारङ्गाणि = नागरङ्गाणि। "नारङ्ग" इति हिन्दी। भयङ्करैः = भीतिजनकैः, आवर्त्तसहस्रैः = बहुसङ्ख्याम्भसां भ्रमैः, "स्यादावर्त्तोऽम्भसां भ्रमः" इत्यमरः, आकुलासु। स्रोतस्वतीषु = नदीषु। सहोहोकारम् = नौकादण्डप्रक्षेपावसरे तद्देशीयाः "हो हो" शब्दं कुर्वन्ति। क्षेपणीः = नौकादण्डान्। "नौकादण्डः क्षेपणी स्यात्" इत्यमरः। "डाँड़ा" इति हिन्दी। अरित्रम् = "अरित्रं केनिपातकः" इत्यमरः। "पतवार" इति हिन्दी। वडिशम् = "वडिशं मत्स्यवेधनम्" इत्यमरः, कुवेण्याम् = मत्स्या-धान्यां तिष्ठन्ति ये ते कुवेणीस्थाः, म्रियमाणाः = आसन्नमरणाः, मत्स्यास्तेषां

प्रकार का विष) के समान वैरियों की सेना के नाश करने में दक्ष ब्रह्मपुत्र नाम का नद, ब्रह्मदेश को भारतवर्ष से पृथक् करता हुआ, भूमिभाग को सींचता है, जहाँ खटमिट्ठे रस से भरे धधकते हुए अंगारों—जिनकी राख फूंक मार कर उड़ा दी गई हो—के रंग को मात करनेवाले विश्वविख्यात संतरे पैदा होते हैं, जहाँ के नीबू, आम, ताल, नारियल और खजूरों का नाम सभी देशों के रसिकों के कान में बार-बार पड़ता है, और जहाँ हजारों भयंकर भँवरों से भरी नदियों में, 'हो हो' करते हुए डाँड़ डालते और पतवार चलाते हुए, बंसी डालते, जाल में फँसी मरणासन्न मछलियों का छटपटाना देखकर आनन्दित होते हुए, जिनके तट

नन्दतः, अदृष्टतटेष्वपि महाप्रवाहेषु स्वल्पया कूष्माण्ड-फक्किकाकारया नौकया भिन्नाञ्जन-लिप्ता इव मसी-स्नाता इव साकारा अन्धकारा इव काला धीवर-बाला निर्भयाः क्रीडन्ति ।

अप०—[स्वयं हसन्, सर्वांश्च हसतः पश्यन्] सत्यं सत्यम् !! धन्यो भवान्, योऽल्पेनैव वयसैव विदेश-भ्रमणैः चातुरीं कलयति ।

तान०—धन्य एव यदि युष्मादृशैरभिनन्द्ये !

अप०—(क्षणानन्तरम्) अथ भवान् मूर्छना-प्रधानं गायति, तान-प्रधानं वा ?

परीवर्त्तान् = पार्श्वपरिवर्तितानि । आलोकमालोकम् = दर्शं दर्शम्, समवलोक्येत्यर्थः, फक्किका = "फाँक, फाँकी" इति हिन्दी । धीवरबालानां कालत्वमुत्प्रेक्षते—भिन्नाञ्जनलिप्ता इव, मसीस्नाता इव, साकारा अन्धकारा इवेति।

अभिनन्द्ये, कर्मणि उत्तमपुरुषे । मूर्छनाप्रधानमिति, अविच्छेदं स्वरात् स्वरान्तरप्राप्तिर्मूर्छना, सविच्छेदं स्वरात् स्वरान्तराप्राप्तिस्तानः । "स्फुटीभवद्ग्रामविशेषमूर्छनामवेक्षमाणं महतीं मुहुर्मुहुः" इति वायुसम्पर्केण मूर्छना कथमिवोद्भाव्यत इति माघ एव जानातु, परिसमाप्नोतु वा वीणावैलक्षण्यं सर्वमिति मूलकृच्छिष्यकृतटिप्पणी । महत्यास्तत्तत्स्वरानुगासु तन्त्रीषु क्रमिकेण पवना

भी नहीं दिखाई देते, ऐसे महाप्रवाहों में भी छोटी-सी कुंमड़े की फाँक के आकार की नाव से, पिसे हुए अञ्जन से लिपे-पुते से, स्याही में डूबे-से, शरीर धारण कर आये हुए अन्धकार के समान काले धीवरों (मछुवे) के लड़के निडर होकर खेलते हैं ।

अफ़ज़ल खाँ—(स्वयं हँसते हुए और हँसते हुए सभी अन्य लोगों को देखते हुए) सच है, सच है ! आप धन्य हैं, जिसने इतनी कम उम्र में ही, इस तरह विदेशों में घूम कर चतुरता सीख ली ।

तानरङ्ग—यदि आप जैसे लोग मेरी सराहना करते हैं, तो मैं सचमुच धन्य हूँ ।

अफ़ज़ल खाँ—(क्षणभर बाद) अच्छा आप मूच्छंना-प्रधान गाते हैं, या तानप्रधान ?

तान०—ईदृक्ष तादृक्ष च ।

अप०—(क्षणानन्तरम्) अस्तु, आलप्यतां कश्चन रागः ।

तान०—(किञ्चिद् विचार्य) आज्ञा चेदेकां राग-माला-गीतिं गायामि, यत्र प्रत्याभोगं नवीन एव रागो भवेदेकेनैव च ध्रुवेण सङ्गच्छेत, तत्तद्राग-नामानि च तत्रैव प्राप्येरन् ।

अप०—आः ! किमेवम् ? ईदृशं तु गानं न प्रायः श्रूयते, तद् गीयताम् ।

घट्टनेन निर्दिष्टमूर्च्छनाया अव्याघातान्माघाक्षेपो निरर्थक इति दार्शनिकसार्वभौमा गोस्वामिदामोदरशास्त्रिचरणाः । "आरोहावरोहक्रमयुक्ताः स्वरसमुदायो मूर्छनेत्युच्यते, तानस्त्वारोहक्रमेण भवति" इति मतङ्गः ।

भवति च सङ्गीतशास्त्रपद्यम्—

"आरोहेणाऽवरोहेण क्रमेण स्वरसप्तकम् ।
मूर्छनाशव्दवाच्यं हि विज्ञेयं तद्विचक्षणैः ॥"

आलप्यताम् = आलापः क्रियताम् । विशकलय्य रागोदीरणमालापः । रागः = रञ्जकस्वरसन्दर्भः ।

"योऽसौ ध्वनिविशेषस्तु स्वरवर्णविभूषितः ।
रञ्जको जनचित्तानां स रागः कथितो बुधैः ॥"

रागमालाम् = तन्नाम्नीं गीतिम् । प्रत्यालापं विभिन्नीभवद्भी रागैर्मालारूपैः सहितत्वात् । तदाह—यत्रेति । प्रत्याभोगम् = प्रतिगेयखण्डम्, उच्चारणविषयाणां शब्दानां शरीरत्वमाश्रित्य तथोक्तम् ।

ध्रुवेण = स्थिरपदेन । सकलपादान्ते वारं वारं समुच्चार्यमाणत्वेन ध्रुवत्वम्, अत एव तथा संज्ञा । सङ्गच्छेत = सम्मेल्येत, "समो गम्यृच्छिभ्याम्"

तानरङ्ग—मूर्च्छना-प्रधान भी और तान-प्रधान भी (ऐसा और वैसा भी) ।

अफ़ज़ल खाँ—(थोड़ी देर बाद) अच्छा, कोई राग अलापिये ।

तानरङ्ग—(कुछ सोचकर) अगर हजूर का हुक्म हो तो एक 'रागमाला' गीत सुनाऊँ, जिसमें गीत के प्रत्येक गेयखण्ड में एक नया ही राग होगा, और वे सब एक ही ध्रुव से मिलेंगे, तथा उसी में उन सभी रागों के नाम भी आ जायँगे ।

अफ़ज़ल खाँ—अच्छा ! क्या ऐसा है ? ऐसा गाना तो अक्सर नहीं सुनाई पड़ता, अच्छा गाइये ।

ततस्तानपूरिकायाः स्वरान् संमेल्य पातित-वाम-जानुः तान-पूरिका-तुम्वं क्रोडे निधाय दक्षपादस्योत्थितजानुनि च दक्ष-हस्त-कूर्पर-स्थापन-पुरःसरं तेनैव हस्तेन तर्जन्यङ्गुल्या तानपूरिकां रणयन् स्वकण्ठेनापि त्रीन् ग्रामान् सप्त स्वरांश्च समधात्। तन्मात्रश्रवणेनैव मुग्धेष्विवाऽखिलेषु इमां राग-माला-गीतिमगायत्—

सखि ! हे नन्द-तनय आगच्छति । सखि० ॥
मन्दं मन्दं मुरली-रणनैः समधिक-सुखं प्रयच्छति ॥

इत्यात्मनेपदम् । स्वरान् = निषादप्रभृतीन् ।

'निषादर्षभगान्धारषड्जमध्यमधैवताः ।
पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥' इत्यमरः ।

पातितं वामजानु येन सः । गायकानामवस्थानरीतिरियम् । दक्षहस्तस्य=वामेतरकरस्य, यः कूर्परः = कफोणिः, "स्यात् कफोणिस्तु कूर्परः" इत्यमरः भुजमध्यग्रन्थिरिति यावत्, तत्स्थापनपुरस्सरम् । त्रीन् ग्रामान् = षड्ज-मध्यमगान्धारान् । तथा चोक्तम्—

"यथा कुटुम्बिनः सर्वेऽप्येकीभूता भवन्ति हि ।
तथा स्वराणां सन्दोहो ग्राम इत्यभिधीयते ॥
षड्जग्रामो भवेदादौ मध्यमग्राम एव च ।
गान्धारग्राम इत्येतद् ग्रामत्रयमुदाहृतम् ॥"

समधात् = समयोजयत् । हे सखि ! = हे आलि ! मुरलीरणनैः = वंशीस्वनैः । समधिकम् = ब्रह्मानन्दलक्षणम् । कीदृशोऽसौ नन्दसुतस्तत्राऽऽह-

---

उसके बाद तानपूरे के स्वरों को मिला कर, बायाँ घुटना टेक कर तानपूरे की तुम्वी को गोद में रख कर, दाहिने पैर के उठे घुटने पर दाहिने हाथ की कुहनी रख कर, उसी हाथ की तर्जनी उँगली से तानपूरे को वजाते हुए तानरङ्ग ने अपने कण्ठ से भी तीन ग्रामों (षड्ज, मध्यम और गान्धार) और निषादादि सात स्वरों को अलापा। इतना सुनकर ही सवके मुग्ध से हो जाने पर इस 'राजमाला' गीत को गाया—

हे सखि ! नन्दनन्दन श्रीकृष्ण आ रहे हैं। मुरली की मन्द-मन्द

भैरव-रूपः पापिजनानां सतां सुख-करो देवः।
कलित-ललित-मालती-मालिकः सुरवर-वाञ्छित-सेवः॥
सारङ्गैः सारङ्ग-सुन्दरो दृग्भिर्निपीयमानः।
चपला-चपल-चमत्कृति-वसनो विहित-मनोहर-गानः॥
श्रीवत्सेन लाञ्छितो हृदये श्रीलः श्रीदः श्रीशः।
सर्वश्रीभिर्युतः श्रीपतिः श्री-मोहनो गवीशः॥

पापिजनानाम् = अघिजराणाम्। भैरवरूपः = भयङ्करः। तमःप्रकृतीनां राक्षसायमानानामपजलखानप्रभृतीनामपि पापित्वात् तेषामपि भैरव एवेति ध्वनिः। सताम् = सत्त्ववतां सज्जनानाम्, शिवादीनाम्। कलिता ललिता मालतीमालिका येन सः। सुरवरैः = इन्द्रादिभिः, वाञ्छिता सेवा यस्य सः। सारङ्ग इव सुन्दरः। "सारङ्गो मृगपक्षिणोः"। सारङ्गैः, दृग्भिः = नयनैः, निपीयमानः = सलालसं वीक्ष्यमाणः, चपलेव = विद्युदिव, चपला चमत्कृतिर्यस्य तादृशं चञ्चलचाकचक्यं, वसनं यस्य सः। विहितं मनोहरम् = श्रोतृचित्ताकर्षकम्, गानम् = गीतिर्येन सः। श्रीवत्सेन = भृगुपदेन। लाञ्छितः = चिह्नितः। श्रीलः = श्रीमान्, "श्रीलः श्रीमान् स्निग्धस्तु वत्सलः" इत्यमरः। श्रियं = धनं ददातीति श्रीदः। श्रियाः = लक्ष्म्याः, ईशः। सर्वश्रीभिः = सर्वाभिः शोभाभिः। गवाम् =

ध्वनि से वे अति आनन्द प्रदान कर रहे हैं। ये भगवान् श्रीकृष्ण पापियों के लिये भयङ्कर और सज्जनों को सुख देने वाले हैं, उन्होंने सुन्दर मालती पुष्प की माला पहन रखी है। देवता लोग भी उनकी सेवा करने को लालायित रहते हैं। कामदेव के समान सुन्दर श्रीकृष्ण को हरिण टकटकी लगाकर देख रहे हैं। उनके वस्त्र बिजली के समान चञ्चल चमचमाहट वाले हैं और वे मनोहर गाना गा रहे हैं। उनका हृदय श्रीवत्स नाम के चिह्न से सुशोभित है, वे श्रीमान्, सम्पत्ति के देनेवाले, लक्ष्मी के स्वामी, सारी शोभाओं से युक्त, लक्ष्मी के पति,

गौरी—पतिना सदा भावितो बर्हिण-बर्ह-किरीटः।
कनककशिपु-कदनो बलि-मथनो विहत-दशानन-कीटः॥

अथ एतावदेव श्रुत्वा अतितरां प्रसन्नेषु पारिषदेषु, ससाधुवा

वाणीनाम्, ईशः=प्रादुर्भावकः, वेदाविष्कारकर्त्तेति यावत्। गवां=इन्द्रिया णाम्, ईशः, इन्द्रियजिदिति वा। गवाम्=वृन्दावनपशूनां, स्वामी वा गौर्याः=हिमतनयायाः, पतिना=भगवता शिवेन। भावितः=ध्यातः। बर्हि बर्हकिरीटः=मयूरपिच्छमुकुटः। कनककशिपुकदनः=हिरण्यकशिपुसंहारक वराहः। बलिमथनः=बलिध्वंसी, वामनः। विहतः=नाशितः, दशान एव, कीटः=क्षुद्रजन्तुः, येन सः, श्रीरामः। अत्र भैरव-ललित-सारङ्ग-श्री-गौरी नामानि रागाणाम्। तत्र भैरवः प्रथमः प्रातःकालिकश्च। अत्र सप्त स्व अपेक्ष्यन्त इत्ययं सम्पूर्ण इत्युच्यते। ऋषभ-मध्यम-धैवता निम्नका लगन्ति गान्धार-निषादौ चोच्चकौ। गान्धारमध्यमापञ्चमा अत्र प्रधानानि। ललि ऋषभधैवतौ निम्नकौ गान्धारनिषादौ चोच्चकौ। अत्र पञ्चमो नापेक्ष्यत इ वैशिष्ट्यम्। सारङ्गे मध्यमनिषादौ निम्नकौ ऋषभधैवतौ चोच्चकौ। गान्धा ऽत्र नितरां वर्जितः, धैवतोऽपि केवलमवरोहेऽपेक्षितः। श्रीरागोऽपि सम्पूर्णः ऋषभधैवतौ निम्नकौ, गान्धारनिषादावुच्चकौ, मध्यमश्चोभयथा लगति। निम्न मध्यमयोजनं चातुर्यकृत्यम्। यद्यप्यत्राऽऽरोहे गान्धारधैवतौ वर्जितौ, तथा विज्ञाः संलगयन्त्येव क्वचित्। गौरी सम्पूर्णा रागिणी, ऋषभधैवतौ निम्न गान्धारमध्यमनिषादाश्चोच्चकाः। आरोहेऽत्र नियमेन चर्षभं त्यजन्ति, कदाचि पञ्चमं धैवतं चेत्यादिकं बहुतरमूहनीयम्। सङ्गीतशास्त्रविदां मोदाय कियन्मात्रमत्र सङ्गृहीतम्।

श्री को मोहित करनेवाले और वेदवाणी के आविष्कारक हैं। श्री शङ्कर उनका सदा ध्यान किया करते हैं, वे मोर-मुकुट धारण करने वाले, हिरण्यक का नाश करने वाले, बलि का विध्वंस करने वाले और रावण रूपी कीड़े मारनेवाले हैं।'

इतना ही सुनकर सब सभासदों के अत्यधिक प्रसन्न हो जाने

वितीर्णकङ्कणे च अपजलखाने, तानरङ्गोऽपि सप्रसादं तानपूरिकां भूमौ संस्थाप्य अपजलखानस्य गुणग्राहितां प्रशशंस।

अथ अपजलखानः क्रमशो मैरेय-मद-परवशतां वहन् उवाच—यत् कथ्यतामस्मिन् प्रान्ते भवादृशानां गुण-ग्राहकाः के सन्ति ? के वा कवितायाः सङ्गीतस्य च मर्माऽवगच्छन्ति ?

ततस्तानरङ्गोऽचकथत्—को नामाऽपरः शिववीरात् ? स एव राजनीतौ निष्णातः, स एव सैन्धवाऽऽरोह-विद्या-सिन्धुः, स एव चन्द्रहास-चालने चतुरः, स एव मल्ल-विद्या-मर्मज्ञः, स एव बाणविद्या-वारिधिः, स एव पण्डित-मण्डल-मण्डनः, स एव धैर्य-धारि-धौरेयः, स एव वीर-

---

पारिषदेषु, परिषदि=सभायां साधवः पारिषदास्तेषु। "परिषदोण्यः" इत्यत्र योगाविभागात् णोऽपि। गुणग्राहिताम्=गुणज्ञताम्।

मैरेयम्=मद्यम्, तस्य यो मदः, तत्परवशताम्=तदधीनताम्। शिववीरादित्यत्रापरशब्दयोगे "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" इति पञ्चमी। सैन्धवारोहविद्यायाः=अश्वारोहणकलायाः, सिन्धुः=सागर इति रूपणम्। वीरवारवरः, वीराणां वारः=समूहः, तत्र वरः=श्रेष्ठः।

अफ़ज़ल खाँ के शाबाशी तथा प्रशंसापूर्वक सोने का कड़ा पुरस्कार देने पर, तानरङ्ग ने भी प्रसन्न होकर तानपूरे को जमीन पर रख कर अफ़ज़ल खाँ की गुणग्राहकता की प्रशंसा की।

उसके बाद क्रमशः शराब के नशे में चूर होता हुआ अफ़ज़ल खाँ बोला : 'कहिये, इस प्रान्त में आप जैसे लोगों के गुणग्राहक कौन हैं ? अथवा कविता और संगीत का मर्म जानने वाले कौन हैं ?'

तानरङ्ग ने कहा : 'शिवाजी को छोड़ ऐसा और कौन है ? वे ही राजनीति में कुशल हैं, वे ही घुड़सवारी की विद्या के समुद्र हैं, वे ही तलवार चलाने में चतुर हैं, वे ही मल्लविद्या के मर्मज्ञ हैं, वे ही बाण-विद्या के सागर हैं, वे ही पण्डितमण्डली के भूषण हैं, वे ही धीर-धुरीण हैं, वे ही वीरों में श्रेष्ठ हैं,

वार-वरः, स एव पुरुष-पौरुष-परीक्षकः, स एव दीन-दुःख-दाव-दह स एव स्वधर्मरक्षण-सक्षणः, स एव विलक्षण-विचक्षणः, स एव मादृश-गुणि-गण-गुण-ग्रहणाऽऽग्रही वर्तते ।

अथ अपजलखाने—"तत् किं शिव एष एवंगुण-गण-विशि ऽस्ति ? एवं वा वीर-वरोऽस्ति ?" इति सचकितं सभयं सतर्कं स मोद्गमं च कथयति, किञ्चिद् विचार्येव नीति-कौशल-पुरःसरं गौ पुनरवादीत् ।

"भगवन् ! सामान्य-राजभृत्यस्य पुत्रः शिववीरो यदि न नाऽभविष्यत् स्वयमीदृश ऊर्जस्वलः, तत् कथं स्वर्णदेव-सदृशं सह प्राप्स्यत् ? तद्द्वारा समस्तं कल्याण-प्रदेशं कल्याण-दुर्गं च स्वह गतमकरिष्यत् ? कथं तोरण-दुर्ग-भोग-भाजनतामकलयिष्यत् कथं तोरण-दुर्गाद् दक्षिण-पूर्वस्यां पर्वतस्य शिखरे महे

दीनानाम् =अनाथानाम्, दुःखदावस्य=क्लेशविपिनस्य, दहनः= अ तुल्यः। स्वधर्मरक्षणे सक्षणः=सोत्साहः। हर्षवाची क्षणशब्दः । विलक्ष विचक्षणः=विशिष्टविद्वान्। गुणिनां गणस्य गुणग्रहणे, आग्रही। अनुप्रास ए

वे ही पुरुषों के पौरुष के सच्चे पारखी हैं, वे ही दीनों के दुःख रूप वन लिए दावाग्नि के समान हैं, वे ही अपने धर्म की रक्षा में उत्साह रखते वे ही अद्‌भुत विद्वान् हैं, और वे ही हम जैसे गुणियों के गुणों के कद्रदां है

इसके बाद अफ़ज़ल खाँ के 'तो क्या यह शिव इस प्रकार के गुणों से और इतना वीर है' इस प्रकार आश्चर्य, भय, अनुमान और रोमाञ्च के कहने पर मानो कुछ सोचकर, नीतिकौशल-पूर्वक गौरसिंह ने पुनः कहा :

"हुजूर, राजा के एक साधारण कर्मचारी के लड़के शिवाजी यदि स्वयं प्रकार के तेजस्वी न होते, तो स्वर्णदेव के समान साथी कैसे पाते, और उसके द्वा सारे कल्याण प्रदेश और कल्याण दुर्ग को हस्तगत कैसे कर लेते ? तोरणदुर्ग अपना भोग्य कैसे बनाते, और तोरण दुर्ग से दक्षिणपूर्व की ओर पहाड़ की च

मन्दिर-खण्डमिव धर्षितारि-वर्गं डमरु-हुडुक्कार-तोषित-भर्गं राय-गढनामकं महादुर्गं व्यरचयिष्यत् ? कथं वा तपनीय-भित्तिका-जटित - महारत्न - किरणावली - वितन्यमान - महावितान - वितति-विरोचित - प्रताप - तापित - परिपन्थि-निवहं चन्द्रचुम्बन-चतुर-चारु-शिखर - निकरं भुशुण्डिका - किणाङ्कित - प्रचण्ड-भुजदण्ड-रक्षक-कुल-

ऊर्जस्वलः = बलशाली । दक्षिणपूर्वस्याम् = दक्षिणस्याः पूर्वस्याश्च दिशोर्यदन्तरालं सा दक्षिणपूर्वा, तस्याम् । महेन्द्रमन्दिरस्य = देवेन्द्रसदनस्य, खण्डमिव = अंशमिव । धर्षितः = भयं प्रापितः, अरिवर्गो येन तम् । उपमया-ऽरिवर्गजियत्वं व्यनक्ति । डमरुहुडुक्कारेण, तोषितः, भर्गः = शिवो यस्मिन्स्तम् । कथं वा प्रतापदुर्गं निरमापयिष्यदिति सम्बन्धः । प्रतापदुर्गं विशिनष्टि—तपनीयस्य = हिरण्यस्य, भित्तिकासु = कुड्येषु, जटितानाम् = खचितानाम्, महारत्नानाम् = हीरकादीनाम्, किरणावलीभिः = मयूखसमूहैः, वितन्यमानस्य = विस्तार्यमाणस्य, महावितानस्य = महोल्लोचस्य, वितत्या = विस्तारेण, विरोचितेन = शोभितेन, प्रतापेन = तेजसा, तापितः = ज्वलितः, परिपन्थिनिवहः = शत्रुसमूहो येन तम् । शिवराजविभूतिवर्णनादुदात्तालङ्कारः । चन्द्रचुम्बने = इन्दुस्पर्शे, चतुरः = समर्थः, चारुः = शोभनः, शिखरनिकरः = ऊर्ध्वभागसमूहो यस्य तम् । उच्छ्रायवर्णनपरमिदम्; चन्द्रस्पर्शासम्बन्धेऽपि सम्बन्धाभिधानादतिशयोक्तिः, अनुप्रासश्च स्पष्ट एव । भुशुण्डिकानां किणैः = आघातैः, अङ्किताः = चिह्निताः, भुजा दण्डा इव येषां तेषाम्, रक्षकाणाम् =

पर, इन्द्र के महल के एक भाग के समान, दुश्मनों को डराने वाले, डमरू की हुडुक्-हुडुक् ध्वनि से शङ्कर को प्रसन्न करने वाले रायगढ़ नामक महादुर्ग का निर्माण कैसे कर लेते ? अथवा सोने की दीवारों पर जड़े हुए हीरे आदि महारत्नों की किरणावलियों से तारे गये विशाल मण्डप से सुशोभित तेज से दुश्मनों को जलाने वाले, अनेक चन्द्रचुम्बी शिखरों वाले, बन्दूक लिये रहने से पड़ गये

विधीयमान - परस्सहस्र - परिक्रमं धमद्धमद्दोधूयमानाऽनेक-ध्वज-पट
निर्मथित-महाकाशं प्रताप-दुर्गं निरमापयिष्यत् ? कथं वा 'आ
एष शिववीरः'—इति भ्रमेणापि सम्भाव्य अस्य विरोधिषु केचन मूर्च्छि
निपतन्ति, अन्ये विस्मृत-शस्त्रा स्त्राः पलायन्ते, इतरे महात्रासाऽऽकुञ्चि
तोदरा विशिथिल-वाससो नग्ना भवन्ति, अपरे च शुष्कमुखा दश
तृणं सन्धाय साम्रेडं प्रणिपात-परम्परा रचयन्तो जीवनं याचन्ते।

ततस्तस्य महाप्रतापमवगत्य किञ्चिद् भीते इव तच्छत्रूणां चावहेल
माकलय्य किञ्चिदरुण-नयने इव, दक्षिण-हस्ताङ्गुष्ठ-तर्जनीभ्
श्मश्र्वग्रं परिमृजति यवन-सेनापतौ; तानरङ्गः पुनर्न्यवेदयत्—

रक्षानिरतानाम्, कुलेन=समूहेन, विधीयमानाः परस्सहस्राः परिक्रमाः=म
लानि यस्य तम्। धमद्धमदिति शब्देन दोधूयमानानाम्=भृशं सञ्चल
अनेकेषां ध्वजानां पटलेन निर्मथितः=विलोडितः, महाकाशो येन तम्। मह
त्रासेन=महाभयेन, आकुञ्चितानि=कृशिमानमायान्ति, उदराणि येषां ते,
अत एव विशेषतः शिथिलानि वासांसि येषां ते। याचन्ते=प्रार्थयन्ते।

घट्ठों से युक्त प्रबल हाथों वाले रक्षकों से हजारों गश्त लगा-लगा कर रक्षा किये
वाले, फहराती हुई ध्वजाओं के समूह से महाकाश को मथने वाले प्रतापगढ़ को
कैसे बनवा लेते ? अथवा 'ये वीर शिवाजी आ गये' यह भ्रमवश समझकर
इनके विरोधियों में कुछ मूर्च्छित होकर क्यों गिर पड़ते हैं ? कुछ शस्त्रास्त्र
कर भाग क्यों खड़े होते हैं ? कुछ डर के मारे पेट के कृश हो जाने अत
वस्त्रों के ढीले हो जाने से नंगे क्यों हो जाते हैं ? और दूसरे सूखे मुँह वाले दाँ
में तृण दबा कर वार-बार प्रणाम करते हुए गिड़गिड़ा कर जीवन भिक्षा
माँगने लगते हैं ?

तब शिवाजी के महाप्रताप को जानकर, यवन सेनापति के कुछ डर से
पर और शिवाजी के दुश्मनों की अवहेलना सुनकर कुछ क्रुद्ध से हो जाने
तथा दाहिने हाथ के अँगूठे और तर्जनी से मूँछ के अग्र भाग पर हाथ फेरते
तानरङ्ग ने पुनः निवेदन किया—

परन्त्वद्य सिंहेन सह शिवस्य साम्मुख्यमस्ति, तन्मन्ये इयमस्त-मनवेला तत्प्रतापसूर्यस्य ।

तत् कर्णे कृत्वा सन्तुष्ट इव सकन्धराकम्पं सेनापतिरुवाच—'अथाऽत्र सङ्ग्रामे कस्य विजयः सम्भाव्यते ?

स उवाच—'श्रीमन् ! यदि शिवस्य साहाय्यं साक्षाच्छिव एव न कुर्यात्; तद् विजयपुरस्यैव विजयः ।'

अथ सहासं सोऽब्रवीत्–'को नाम खपुष्पायितः शशशृङ्गायितः कमठी-स्तन्यायितः सरीसृप-श्रवणायितः भेक-रसनायितः वन्ध्यापुत्रा-यितश्च शिवोऽस्ति ? य एनं रक्षिष्यति, दृश्यतां श्व एवैषोऽस्माभिः पाशैर्बद्ध्वा चपेटैस्ताड्यमानो विजयपुरं नीयते ।'

—इति सकष्टमाकर्ण्य, "स्यादेवं भगवन् !" इति कथयति तान-रङ्गे अभिमान-परवशः स स्वसहचरान् सम्बोध्य पुनरादिशत्–'भो-भो योद्धारः ! सूर्योदयात् प्रागेव भवन्तः पञ्चाऽपि सहस्राणि सादिनां

अस्तमनवेला, तत्प्रतापरूपसूर्य्यस्य समाप्तिवेलेत्यर्थः । सूर्यास्तोदयौ तु न भवतः, केवलं तत्खण्डवसिभिस्तदनवलोकनेन तादृशशब्दव्यवहार एवाऽऽस्थीयते । तदुक्तम् "नैवास्तमनमर्कस्य नोदयः सर्वदा सतः" इति ।

खपुष्पमिवाऽऽचरितः खपुष्पायितः । खपुष्पम्, शशशृङ्गम्, कमठी (कच्छपी)-दुग्धम्, सरीसृपश्रवणम्, भेकरसना, वन्ध्यापुत्रश्चेत्यसम्भवालीकवस्तूनि । यथैतानि न सन्त्येवं भूतनाथः सदाशिवोऽपि नास्तीत्यर्थः । सादिनाम्=अश्वारोहिणाम् ।

'लेकिन आज सिंह के साथ शिवाजी का सामना हुआ है, इसलिये मेरी समझ से यह उनके प्रताप-सूर्य के अस्त होने का समय है ।'

यह सुन कर सन्तुष्ट-सा यवन सेनापति कन्धों को हिलाता हुआ बोला—'अच्छा, इस युद्ध में किसकी जीत की सम्भावना है ?'

तानरङ्ग ने कहा—'हुजूर ! अगर शिवाजी की सहायता स्वयं शङ्कर जी ही न करें तो बीजापुर की ही जीत होगी ।'

तब हँसते हुए अफ़ज़ल खाँ ने कहा—'भला गगनकुसुम-सा, खरगोश के सींग-सा, कछुई के दूध-सा, साँप के कान-सा, मेढक की जीभ-सा, और बाँझ के लड़के-सा, शङ्कर भी कोई चीज है जो उसकी रक्षा करेगा ? देखना कल ही रस्सियों से बाँध कर हम लोग उसे थप्पड़ मारते हुए बीजापुर ले जायँगे ।'

तानरङ्ग के कष्टपूर्वक यह बात सुनकर 'हुजूर ! ऐसा हो सकता है' (या ऐसा ही हो) कहने पर, अभिमान के मारे आत्म-संयम खोकर अफ़ज़ल खाँ ने

दशाऽपि च सहस्राणि पत्तीनां सज्जीकृत्य युद्धाय तिष्ठत । गोपीनाथ
पण्डित-द्वाराऽऽहूतोऽस्ति मया शिव-वराकः। तद् यदि विश्वस्य
समागच्छेत्, ततस्तु बद्ध्वा जीवन्तं नेष्यामः, अन्यथा तु सदुर्गं
धूलीकरिष्यामः। यद्यप्येवं स्पष्टमुदीरणं राजनीति-विरुद्धम्, तथाऽपि
मदावेशस्तु न प्रतीक्षते विवेकम्।

तदवधार्य समस्तकू-कूर्चान्दोलनम्–'यदाज्ञाप्यते यदाज्ञाप्यते'
इति वाचां धारासम्पातैरिव स्नापयत्सु पारिषदेषु, 'गोपनीयोऽयं
वृत्तान्तः कथं स्पष्टं कथ्यते ?' इति दुर्मनायमानेष्विव च अकस्मा-
देव प्रविश्य सूदेनोक्तम्–'श्रीमन्! व्यत्येति भोजनसमयः'। तत्
श्रुत्वा 'आ! एवं किलैतत्' इति सोत्प्रासं सविस्मयं सकूर्चोद्धूननं
सोपबर्हताडनमुच्चार्य सपद्युत्थाय, 'पुनरागम्यताम्' इति तानरङ्ग-

"अश्वारोहास्तु सादिनः" इत्यमरः। पत्तीनाम्=पदातीनाम्। "पदातिपत्ति-
पतगपादातिकपदाजयः" इत्यमरः। विश्वस्य=विश्वासं कृत्वा। समस्तक-
कूर्चान्दोलनम्=सशिरोदाढिकासञ्चालनम्। क्रियाविशेषणम्। अदुर्मनसो
दुर्मनसो भवन्तीति दुर्मनायमानास्तेषु। 'भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः'
इति सूत्रेणाऽभूततद्भावविषये क्यङि शानच्, भावसप्तमी। सूदेन=पाककर्त्रा।
सोत्प्रासम्=ईषद्धास्येन सह, क्रियाविशेषणम्। "सोत्प्रासः समनाक्स्मितम्"
इत्यमरः। सकूर्चोद्धूननम्=श्मश्रूल्लासनेन सह। सोपबर्हताडनम्=उप-

अपने साथियों को सम्बोधित कर आज्ञा दी : 'हे योद्धाओ! आप लोग कल
सूर्योदय से पहले ही पाँचों हजार घुड़सवारों और दसों हजार पैदल सैनिकों को
सुसज्जित कर युद्ध करने के लिए तैयार रहना। गोपीनाथ पण्डित द्वारा मैंने
बेचारे शिवाजी को बुलाया है। तो अगर वह विश्वास करके आ जाय, तब तो
बाँधकर जीवित ही ले चलेंगे। अन्यथा दुर्ग-सहित उसे धूल में मिला देंगे। यद्यपि
इस प्रकार खुल्लम-खुल्ला कहना राजनीति के विरुद्ध है, फिर भी मेरा आवेश
(जोश) विवेक की परवाह नहीं करता।'

यह सुनकर, सभासदों की सिर और दाढी हिला-हिला कर 'जो आज्ञा
जो आज्ञा' यों मानो वाणियों की मूसलाधार वृष्टि से स्नान-सा कराने पर
तथा 'यह गोपनीय बात खुले आम कैसे कही जा रही है' यह सोच कर
कुछ नाराज सा होने पर, एकाएक रसोइये ने प्रवेश करके कहा, 'हुजूर, खाने का
वक्त बीत रहा है' यह सुनकर थोड़ा मुस्कराकर, विस्मयपूर्वक, दाढ़ी हिला कर
मसनद पर हाथ पटक कर 'ओह! क्या ऐसा है' कहकर तानरङ्ग को

विसृज्य सेनापतिरन्तः प्रविवेश। तानरङ्गश्च यथागतं निववृते।

इतस्तु प्रतापदुर्गे विहिताहार-व्यापारे रजत-पर्य्यङ्किकामेका-मधिष्ठिते किञ्चित् तन्द्रा-परवशे इव गोपीनाथे, शिववीरः शनैरुपसृत्य प्रणम्य, उपाविशदवोचच्च—'अहो! भाग्यमस्माकं यदालयं युष्मादृशा भूदेवाः स्वचरणरजोभिः पावयन्ति'—इति।

अथ तयोरेवमभूवन्नालापाः—

गोपीनाथः—'राजन्! कोऽत्र सन्देहः? सर्वथा भाग्यवानसि, परं साम्प्रतं नाऽहं पण्डितत्वेन कवित्वेन वा समायातोऽस्मि, किन्तु यवनराजदूतत्वेन। तत् श्रूयतां यदहं निवेदयामि।'

शिववीरः—'शिव! शिव! खलु खल खल्विदमुक्त्वा, येषां श्रीमतां चरणेनाऽङ्कितं विष्णोरपि वक्षःस्थलमैश्वर्य-मुद्रयेव मुद्रितं विभाति; न तेषां ब्राह्मण—कुल—कमल—दिवाकराणां यवन-कैङ्कर्य-कलङ्क-पङ्को युज्यते, यं शृण्वतोऽपि मम स्फुटत इव कर्णौ। तथाऽपि

धानप्रहारेण साकम्। गर्वहर्षाभ्यामिदं ताण्डवं सर्वम्।

रजतेन=दुर्वर्णेन, खचिताम्, पर्यङ्किकाम्=लघुपर्यङ्कम्। मञ्चिका-मिति यावत्। तन्द्रा-परवशे=निद्रापूर्वालस्याधीने।

खल्विदमुक्त्वा, निषेधार्थकः खलुशब्दः। "अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा"। यवनानां कैङ्कर्यम्=किङ्करस्य भावः, दासता, तदेव

'फिर आइयेगा' कहकर बिदा कर सेनापति ने अन्दर प्रवेश किया, और तानरङ्ग जिस मार्ग से आया था, उसी से वापस लौट गया।

इधर प्रतापदुर्ग में जब गोपीनाथ पण्डित भोजन करके, एक चाँदी की पलंग पर लेटे ऊँघ रहे थे, शिवाजी धीरे से जाकर, उन्हें प्रणाम कर बैठ गये और बोले—'अहो! हमारा सौभाग्य है कि आपके-से ब्राह्मण ने अपनी चरणरज से हमारे घर को पवित्र किया।' फिर उन दोनों में इस प्रकार बातचीत हुई:

गोपीनाथ—'इसमें क्या सन्देह? आप सचमुच भाग्यवान् हैं, लेकिन इस समय मैं पण्डित या कवि के रूप में नहीं, वरन् यवनराज के दूत के रूप में आया हूँ, अतः मैं जो निवेदन करता हूँ उसे सुनिये।'

शिवाजी—शिव! शिव! ऐसा मत कहिये, जिन आप लोगों के चरण से अङ्कित होने से विष्णु भगवान् का वक्षःस्थल भी ऐश्वर्य की मुद्रा से मुद्रित सा शोभित होता है, उन ब्राह्मण—कुल—कमल—दिवाकरों को यवनों की चाकरी रूप कलङ्क-कीचड़ शोभा नहीं देता, जिसे सुनकर भी मेरे कान फट से रहे हैं। यह

कुलीना निरभिमाना भवन्ति–इति आनीतश्चेत् कश्चित् सन्देशः, तदेष आज्ञाप्यतां श्रीमच्चरण–कमल–चञ्चरीकः।'

गोपीनाथः—'वीर ! कलिरेष कालः, यवनाऽऽक्रान्तोऽयं भारत-भूभागः, तन्नाऽस्माकं तथा तानि तेजांसि, यथा वर्णयसि। साम्प्रतं तु विजयपुराधीश-वितीर्णां भृतिं भुञ्जे इति तदाज्ञामेव परिपालयामि। तत् श्रूयतां तदादेशः।'

शिववीरः—'आर्य ! अवदधामि।'

गोपीनाथः—'कथयति विजयपुरेश्वरो यद्–'वीर ! परित्यज नवामिमां चञ्चलतामस्माभिः सह युद्धस्य, त्वदपेक्षयाऽत्यन्तमधिकं बलिनो वयम्, प्रवृद्धोऽत्र कोषः, महती सेना, बहूनि दुर्गाणि, बहवश्च वीराः सन्ति। तच्छुभमात्मन इच्छसि चेत्, त्यक्त्वा निखिलां चञ्चलताम्, शस्त्रं दूरतः परित्यज्य, करप्रदतामङ्गीकृत्य, समागच्छ मत्सभायाम्। मत्तः प्राप्त-पदश्चिरं जीविष्यसि, अन्यथा तु सदुर्दशं निहतः कथावशेषः संवर्त्स्यसि। तत् केवल त्वयि दययैव सन्देशं

कलङ्कपङ्कः। स्फुटत इव=दीर्यते इव। कुलीनाः=सद्वंशजाः। भृतिम्=जीविकाम्। अवदधामि=सावधानोऽस्मि। संवर्त्स्यसि=वर्तिष्यसे।

दूसरी बात है कि कुलीन अभिमान रहित होते हैं। इसलिये आप कोई सन्देश लाये हों, यदि ऐसा हो तो अपने चरणकमलों के भ्रमर इस जन को आज्ञा दीजिये।'

गोपीनाथ—'वीरवर ! कलिकाल है, यह भारत-भूमि यवनों से आक्रान्त है, इसलिये हम लोगों में जैसा आप वर्णन कर रहे हैं, वैसा तेज नहीं रहा, इस समय वीजापुर के सुल्तान द्वारा दी गई जीविका (वेतन) से अपना निर्वाह कर रहा हूँ, अतः उन्हीं की आज्ञा का पालन करता हूँ। अतः उनका आदेश सुनिये।'

शिवाजी—'आर्य ! मैं सावधान हूँ।'

गोपीनाथ—''वीजापुर के सुल्तान कहते हैं कि—

'वीर ! हमारे साथ लड़ाई ठानने की इस नई चपलता का परित्याग कर दो, हम तुम्हारी अपेक्षा बहुत अधिक बली हैं, हमारा कोष बहुत समृद्ध है, हमारी सेना बहुत बड़ी है, हमारे पास बहुत-से किले हैं, और बहुत-से योद्धा हैं। अतः यदि अपना कल्याण चाहते हो, तो सारी चपलता छोड़ कर, शस्त्र का सर्वथा परित्याग कर, मुझे कर देना स्वीकार करके मेरी सभा में आ जाओ। मुझ से कोई बड़ा-सा पद पाकर बहुत दिनों तक जीवित रहोगे। अन्यथा दुर्दशा करके मारे

प्रेषयामि, अङ्गीकुरु। मा स्म वृद्धायाः प्रसविन्या रजतश्वेतां पक्ष्म-पङ्क्तिमश्रु–प्रवाह–दुर्दिने पातय'–इति'।

शिववीरः—'भगवन्! कथयेदेवं कश्चिद् यवनराजः, परं किं भवानपि मामनुमन्यते—यद् ये अस्मदिष्टदेवमूर्तीर्भङ्क्त्वा, मन्दिराणि समुन्मूल्य, तीर्थस्थानानि पक्कणीकृत्य, पुराणानि पिष्ट्वा वेदपुस्तकानि विदार्य च, आर्यवंशीयान् बलाद् यवनीकुर्वन्ति; तेषामेव चरणयोरञ्जलिं बद्ध्वा लालाटिकतामङ्गीकुर्याम्? एवं चेद् धिङ् मां कुल-कलङ्कं क्लीबम्; यः प्राणभयेन सनातनधर्म-द्वेषिणां दासेरकतां वहेत्। यदि चाऽहमाहवे म्रियेय, वध्येय, ताड्येय वा, तदैव धन्योऽहम्, धन्यौ च मम पितरौ। कथ्यतां भवादृशां विदुषामत्र का सम्मतिः?'

प्रसविन्याः = जनन्याः। रजतश्वेताम्=रूप्यधवलाम्। पक्ष्मपङ्क्तिम् = नेत्रलोमश्रेणीम्। अश्रुप्रवाहेण = अश्रुधारया, दुर्दिने = भरिते। मेघाच्छन्नाहस्य वाचकमत्र लक्षणया प्रयुक्तम्। अस्माभिर्हतस्य तव विरहेण त्वन्माता शोकाकुला मा भूदिति भावः।

पक्कणीकृत्य = शवरसदनीकृत्य। "पक्कणः शवरालयः" इत्यमरः। दासेरकताम् = भृत्यताम्। "भृत्ये दासेरदासेयदासगोप्यकचेटकाः" इत्यमरः। म्रियेय, वध्येय ताड्येय वा, क्रियादीपकम्। अत्र अहमिति कर्म।

जाओगे, और तुम्हारी सिर्फ कहानी ही शेष रह जायगी। अतः सिर्फ तुम्हारे ऊपर दया कर के ही सन्देश भेज रहा हूँ, उसे स्वीकार करो। बूढ़ी माँ की चाँदी के समान सफेद बरौनियों को आँसुओं की झड़ी में मत डुबाओ।'

शिवाजी—'महाराज! कोई यवनराज ऐसा भले ही कहे, पर क्या आप भी मुझे यह अनुमति देते हैं, कि जो हमारे इष्टदेव की मूर्तियों को तोड़कर, मन्दिरों को मटियामेट कर, तीर्थस्थानों को भीलों की बस्ती बनाकर, पुराणों को पीस कर, वेद की पुस्तकों को फाड़कर, आर्यवंशजों (हिन्दुओं) को जबर्दस्ती मुसलमान बनाते हैं, हम उन्हीं के चरणों में अञ्जली बाँधकर उनकी चाकरी मञ्जूर करें? यदि मैं ऐसा करूँ तो मुझ कुलकलङ्क कायर को धिक्कार है, जो अपने प्राणों के मोह से सनातन धर्म के दुश्मनों की चाकरी करे। यदि मैं युद्ध में मर जाऊँ, मार डाला जाऊँ, या घायल किया जाऊँ, तो मेरा अहोभाग्य है, और मेरे माता-पिता धन्य हैं। कहिये, आप के से विद्वानों की इस विषय में क्या सम्मति है?'

गोपीनाथः—(विचार्य) 'राजन् ! धर्मस्य तत्त्वं जानासि, तन्नाहं स्वसम्मतिं कामपि दिदर्शयिषामि । महती ते प्रतिज्ञा, महत्तवोद्देश्यमिति प्रसीदामितमाम् । नारायणस्तव साहाय्यं विदधातु ।'

शिववीरः—'करुणानिधान ! नारायणः स्वयं प्रकटीभूय न प्रायेण साहाय्यं विदधाति, किन्तु भवादृश-महाशय-द्वारैव । तत् प्रतिज्ञायतां काऽपि सहायता ।'

गोपीनाथः—'राजन् ! कथ्यतां किमहं कुर्याम्, परं यथा न मामधर्मः स्पृशेत्; तथैव विधास्यामि ।'

शिववीरः—'शान्तं पापम् ! कोऽत्राधर्मः ? केवलं श्वोऽस्मिन्नुद्यान-प्रान्तस्थ-पट-कुटीरे यवन-सेनापतिरपजलखान आनेयः; यथा तेनैकाकिनाऽहमेकाकी मिलित्वा किमप्यालपामि ।'

गोपीनाथः—'तत् सम्भवति ।'

ततः परं गोपीनाथेन सह शिववीरस्य बहुविधा आलापा अभू-

'दिदर्शयिषामि = दर्शयितुमिच्छामि । प्रसीदामितमाम्=अत्यन्तं प्रसीदामि।

गोपीनाथ—(विचार कर) 'राजन् ! आप स्वयं धर्म का तत्त्व जानते हैं, इसलिए मैं अपनी कोई भी राय नहीं देना चाहता। आपकी प्रतिज्ञा और आपका उद्देश्य महान् है, इससे मुझे अत्यधिक प्रसन्नता है। भगवान् तुम्हारी सहायता करें।'

शिवाजी—'कृपानिधान ! भगवान् प्रायः स्वयं प्रकट होकर नहीं, वरन् आप के समान महाशयों के द्वारा ही सहायता करते हैं। अतः आप कुछ सहायता करने की प्रतिज्ञा कीजिये।'

गोपीनाथ—'राजन् ! कहिये मैं क्या करूँ ? लेकिन जिससे मुझे पाप न लगे वही करूँगा।'

शिवाजी—'शिव ! शिव !! शिव !!! इसमें अधर्म या पाप की क्या बात है ! बस, कल इसी उद्यान के किनारे लगे खेमे में यवन सेनापति अफ़ज़ल खाँ को ले आइये, जिससे मैं अकेले अफ़ज़ल खाँ से मिल कर कुछ बातचीत कर सकूँ।'

गोपीनाथ—'यह हो सकता है।'

उसके बाद गोपीनाथ के साथ शिवाजी की अनेक प्रकार की बातें हुईं

वन्; यैः शिववीरस्य उदारहृदयतां धार्मिकतां शूरतां चाऽत्रगत्य गोपीनाथोऽतितरां पर्य्यतुष्यत् ।

अथ स तमाशीर्भिरनुयोज्य यावत् प्रतिष्ठते, तावदुपातिष्ठत् ससहचरस्तानरङ्गः। गोपीनाथस्तु तमनवलोकयन्निव तस्मिन्नेव निशीथे दुर्गादवातरत् । कपट-गायको गौरसिंहस्तु शिववीरेण सह बहुश आलप्य, सेनाऽभिनिवेश-विषये च सम्मन्त्र्य, तदाज्ञातः स्ववासस्थानं जगाम ।

शिववीरोऽप्यन्य-सेनापतीन् यथोचितमादिश्य, स्वशयनागारं प्रविश्य होरात्रयं यावत् किञ्चन निद्रा-सुखमनुभूय, अल्पशेषायामेव रजन्यामुदतिष्ठत् ।

शिववीर-सेनास्तु यथासङ्केतं प्रथममेव इतस्ततो दुर्ग-प्राचीरान्तरालेषु गहन-लता-जालेषु उच्चावच-भूभाग-व्यवधानेषु सज्जाः

निशीथे = अर्धरात्रे । सेनाभिनिवेशविषये = सेनासंस्थानसम्बन्धे, सम्मन्त्र्य = परामृश्य । अल्पशेषायाम् = किञ्चित् अवशिष्टायाम् ।

"प्राचीरं प्रान्ततोवृतिः" इत्यमरः । उदक् चावक् च उच्चावचम्, "मयूरव्यंसकादयश्च" इति समासः । होरात्रयम् = घण्टात्रिकम् । अहोरात्र-

---

जिनसे गोपीनाथ शिवाजी की उदारहृदयता, धार्मिकता और वीरता जानकर बहुत ही प्रसन्न हुआ ।

इसके बाद शिवाजी को आशीर्वाद देकर गोपीनाथ ने प्रस्थान किया ही था, कि अपने साथी बालक के साथ तानरङ्ग आ पहुँचा । गोपीनाथ उन्हें अनदेखा-सा कर उसी अर्धरात्रि में दुर्ग से नीचे उतर गए। गायक वेषधारी गौरसिंह शिवाजी के साथ बहुत-सी बात-चीत कर, सेना की व्यूहरचना के सम्बन्ध में सलाह कर, उनकी आज्ञा ले, अपने निवास-स्थान को गये ।

वीर शिवाजी भी, अन्य सेनापतियों को यथायोग्य आदेश देकर, अपने शयनागार में प्रवेश कर, तीन घण्टे तक कुछ नींद का सुख लेकर, थोड़ी रात रहते ही जग गये।

वीर शिवाजी की सेनाएँ संकेत के अनुसार पहले से ही, इधर-उधर किले की चहारदीवारी के अन्दर, घनी झाड़ियों में और ऊँची-नीची उबड़-खाबड़ जमीन

पर्यवातिष्ठन्त। बहवोऽश्वारोहा यवन-पट-कुटीर-कदम्बकं परिक्रम्य ततः पश्चादागत्य, अवसरं प्रतिपालयन्ति स्म।

इतश्च सूर्यप्रभाभिररुणीक्रियमाणे भूभागे अरुण-श्मश्रवोऽपि सेनाः सज्जीकृतवन्तः।

बहवो-"वयमद्य शिवमवश्यमेव विजेष्यामहे; परं तथाऽपि न जानीमहे किमिति कम्पत इव हृदयम्, अहो! विलक्षणः प्रताप एतस्य, पवनेऽपि प्रवहति, पतत्रेऽपि पतति, पत्रेऽपि मर्मरीभवति, स एवाऽऽगत इत्यभिशङ्क्यतेऽस्माभिः। अहह!! विचित्रोऽयं वीरो, यो दुर्ग-प्राचीरमुल्लङ्घ्य, प्रहरि-परीवारमविगणय्य, लोहार्गल-शृङ्खला-सहस्र-नद्धानि करि-कुम्भाघात-सहानि द्वाराणि प्रविश्य, विकोशचन्द्र-

---

शब्दस्याऽऽद्यन्तयोर्विलोपे 'होरा' इति दिनरात्रिवाचकम्, तदादायैव होराशास्त्र-मित्युच्यते ज्यौतिषम्। सम्प्रति घटिकायां घण्टायां च प्रयुज्यत इति वेदितव्यम्।

अरुणश्मश्रवः=यवनाः। विजेष्यामहे, "विपराभ्यां जेः" इत्यात्मने-पदम्। प्रवहति-पतति-मर्मरीभवतीति त्रयमपि शत्रन्तं सप्तम्येकवचनम्। प्रहरि-परीवारम्=दौवारिकसङ्घम्। विकोशः=कोशान्निःसारितः, नग्न इति

के बीच में, शस्त्रास्त्र से सज्जित खड़ी थीं। बहुत-से घुड़सवार, यवनों के खेमों का चक्कर लगाकर, लौट आकर, समय की प्रतीक्षा कर रहे थे।

इधर सूर्य के तेज से भूमण्डल के लाल हो जाने पर लाल दाढ़ी-मूँछ वाले (यवनों) ने भी अपनी सेना सुसज्जित की।

'हम आज शिवाजी को अवश्य जीतेंगे, लेकिन फिर भी न जाने क्यों हृदय काँपता सा है। ओह, शिवाजी का प्रताप विलक्षण है, वायु चलने पर भी, पक्षी के उड़ने पर भी, पत्ते के खड़खड़ाने पर भी, हम लोगों को 'शिवाजी आ गया' यही शङ्का होती है। अहा! यह वीर विचित्र है, जो किले की चहारदीवारी लाँघ कर, पहरेदारों को कुछ न समझ, हजारों लोहे की जञ्जीरों से बँधे हाथी के मस्तक के आघात को भी सह सकने वाले दरवाजों में घुसकर, नंगी तलवार

हासाऽसिधेनुका-परिघ-तोमर-शक्ति-त्रिशूल-मुद्गर-भुशुण्डी-कराणां रक्षकाणां मण्डलमवहेल्य, प्रियाभिः सह पर्य्यङ्केषु सुप्तानामपि प्रत्यर्थिनां वक्षःस्थलमारोहति, निद्रास्वपि तान् न जहाति, स्वप्नेष्वपि च विदारयति। कथमेतस्य चञ्चच्चन्द्रहास-चमत्कार-चाकचक्य-चिल्लीभूत-चक्षुष्काः समराङ्गणे स्थास्यामः ?" इति चिन्ताचक्रमारूढा अपि कथं कथमपि, कैश्चित् वीरवरैर्वर्धितोत्साहाः समर-भूमिमवातरन्।

अथ कथञ्चित् प्रकाश-बहुले संवृत्ते नभःस्थले, परस्परं परिचीयमानासु आकृतिषु, कमलेष्विव विकचतामासादयत्सु वीरवदनेषु, भ्रमरालिष्विव परितः प्रस्फुरन्तीषु असि-पङ्क्तिषु, चाटकैर-चकचकायितेषु कवच-चकत्कारेषु, गोपीनाथ-पण्डितो वारमेकं शिववीर-

यावत्। "नंगी तलवार" इति हिन्दी। अवहेल्य = उपेक्ष्य। प्रत्यर्थिनाम् = शत्रूणाम्। निद्रा = सुषुप्तिः, जहाति = त्यजति। स्वप्नः = तत्पूर्वावस्था। चञ्चतश्चन्द्रहासस्य चमत्कारेण यच्चाकचक्यं तेन चिल्लीभूतानि = क्लिन्नीभूतानि, मुकुलप्रायाणि इति यावत्, चक्षूंषि = नेत्राणि येषां ते। भयादिति भावः। विकचताम् = विकासभावम्। उपमालङ्कारः। एवं परत्र। चटकाया अपत्यानि पुमांसः चाटकैराः, तेषां चकचकायितेषु = चकचकमिवाचरितेषु, चकचक

छुरी, बर्छी, शक्ति, त्रिशूल, मुग्दर और बन्दूक हाथ में लिये पहरेदारों की उपेक्षा कर अपनी प्रियाओं के साथ पलंगों पर सोये हुए दुश्मनों की छाती पर चढ़ जाता है, गाढ़ी नींद में भी उन्हें नहीं छोड़ता, और स्वप्नावस्था में चीर डालता है। इसकी चल रही तलवार की चमत्कार की चमचमाहट से चकाचौंध पड़े नेत्रोंवाले हम लोग युद्धभूमि में कैसे टिक सकेंगे ?" इस प्रकार की चिन्ताओं से आक्रान्त होते हुए भी अनेक यवन सैनिक, किसी प्रकार कुछ वीरों के द्वारा प्रोत्साहित किये जाने पर युद्धभूमि में उतरे।

उसके बाद आकाश में पर्याप्त प्रकाश फैल जाने पर, जब परस्पर आकृतियाँ पहचान में आने लगीं, वीरों के मुखों के कमलों की तरह प्रफुल्लित हो जाने पर, भ्रमरावलियों की तरह तलवारों के चारों ओर दिखाई पड़ने लगने पर, कवचों के गौरैयों के चहचहाने की-सी आवाज करने लगने पर, गोपीनाथ पण्डित ने एक

दिशि परतश्च यवन-सेनापति-दिशि गतागतं विधाय, सेनाद्वयस्य मध्य एव कस्मिश्चित् पट-कुटीरे अपजलखानमानेतुं प्रबबन्ध ।

शिववीरोऽपि कौशेय-कञ्चुकस्याऽन्तर्लौह-वर्म्म परिधाय, सुवर्ण-सूत्र-ग्रथितोष्णीषस्याऽप्यधस्तादायसं शिरस्त्राणं संस्थाप्य, सिंह-नख-नामकं शस्त्रविशेषं करयोरारोप्य, दृढबद्ध-कटिरपजलखान-साक्षात्काराय सज्जस्तिष्ठति स्म ।

अपजलखानोऽपि च—"यदाऽहमेनं साक्षात्कृत्य, करताडनमेकं कुर्य्याम्; तदैव तालिकाध्वनि-सम्मकालमेव अमुकामुकैः श्येनै-रिवाऽभिपत्य पाशैरेष बन्धनीयः, सेनया च क्षणात् तत्सेना झञ्झया घनघटेवाऽपनेया"—इति सङ्केत्य, सूक्ष्म-वसन-परिधानः, वज्रक-जटितोष्णीषिकः, गल-विलुलित-पद्मराग-मालः, मुक्ता-गुच्छ-चोच-

इत्यनुकरणशब्दः । कवचानाम्=उरश्छदानाम् "उरश्छदः कङ्कटकोऽजगरः कवचोऽस्त्रियाम्" इत्यमरः । चकत्कारेषु=तादृशशब्देषु । गतागतम्=याता-यातम् । प्रबबन्ध=व्यवस्थापितवान् ।

अमुकामुकैः="फलाना फलाना" इति हिन्दी । झञ्झया=झञ्झावा-तेन, "झञ्झावातः सवृष्टिकः" इत्यमरः । घनघटेव=मेघसमूह इव । वज्र-केण=हीरकेण, जटिता=खचिता, उष्णीषिका=शिरोवेष्टनं यस्य सः ।

वार शिवाजी की ओर दूसरी वार यवन सेनापति की ओर चक्कर लगा कर, दोनों सेनाओं के बीच में ही, किसी खेमे में अफ़ज़ल खाँ को लाने का प्रबन्ध किया ।

शिवाजी भी रेशमी कुर्ते के अन्दर लोहे का कवच पहन कर, सोने के तारों से गुँथी पगड़ी के नीचे लोहे का शिरस्त्राण रख कर, हाथों में वघनखा पहन कर, दृढ़ता से कमर कस कर अफ़ज़ल खाँ से मिलने के लिए तैय्यार बैठे थे ।

अफ़ज़ल खाँ भी 'ज्यों ही मैं उससे मिल कर एक ताली वजाऊँ, त्यों ही ताली की आवाज के साथ ही, अमुक-अमुक लोग वाज़ की तरह उस पर टूट कर उसे रस्सियों से वाँध लें, और हमारी सेना क्षण भर में उसकी सेना को, वादलों को झञ्झावात की तरह भगा दे ।' यह संकेत देकर, महीन कपड़े पहने, हीरा

म्ब्यमान-भाल:, निश्वास–प्रश्वास–परिमथित–मद्य–गन्ध–परिपूरित–पार्श्व–देशान्तराल:, शोण-श्मश्रु-कूर्च-विजित-नूतन-प्रवाल:, कञ्चुक–स्यूत–काञ्चन–कुसुम–जाल:, विविध-वर्ण–वर्णनीय–शिबिकामारुह्य निर्दिष्ट–पटकुटीराभिमुखं प्रतस्थे।

इतस्तु कुरङ्गमिव तुरङ्गं नर्त्तयन् रश्मिग्राह–वेषेण गौरसिंहेनाऽनुगम्यमान: माल्यश्रीक-प्रभृतिभिर्वीर-वरैर्युद्ध-सज्जै: सतर्कं निरीक्ष्यमाण: शिववीरोऽपि तस्यैव सङ्केतितस्य समागमस्थानस्य निकटे एव सव्यकरेण वल्गामाकृष्याऽश्वमवारुधत्।

निश्वासप्रश्वासाभ्यां परिमथितो यो मद्यगन्ध:=मैरेयामोद:, तेन, परिपूरितम्=भरितम्, पार्श्वदेशान्तरालं येन स:। शोणाभ्याम्=लोहिताभ्याम् श्मश्रुकूर्चाभ्यां विजितो नूतन: प्रवाल:=नवपल्लवं येन स:। कञ्चुके स्यूतानि=खचितानि, काञ्चनानि=हैरण्यानि, कुसुमजालानि यस्य स:। विविधै:=नानाप्रकारै:, वर्णै:=रङ्गै: अक्षरैर्वा, वर्णनीयाम्=प्रशंसनीयाम्। कुरङ्गमिवेति=तुरङ्गस्य शीघ्रगामिताध्वननाय। रश्मिग्राह:=प्रग्रहधारी। "सईस" इति हिन्दी। वल्गाम्=कविकाम्, "लगाम" इति हिन्दी। आकृष्य=आकुञ्च्य। अवारुधत्=निरुद्धवान्।

जड़ी टोपी लगाये, गले में पद्मराग मणियों की माला पहने, मस्तक पर मोतियों का गुच्छा लगाये, आसपास के वातावरण को श्वासोच्छ्वास से निकली शराब की दुर्गन्ध से दूषित करता हुआ, विविध रंगों की सुन्दर पालकी में बैठ कर, मिलने के लिए पहले से निश्चित खेमे की ओर रवाना हुआ। उसकी लाल मूंछ और दाढ़ी नये पल्लवों को भी मात कर रही थी, और उसकी शेरवानी सोने के तारों से कढ़े फूलों से भरी थी।

इधर हरिण की तरह घोड़े को नचाते हुए वीर शिवाजी—जिनके पीछे सईस के वेष में गौरसिंह चल रहा था, और जिन्हें युद्ध के लिए सन्नद्ध माल्यश्रीक आदि वीर सतर्कतापूर्वक देख रहे थे, वे भी उसी पहले से निश्चित सम्मिलन-स्थान के निकट ही, बायें हाथ से लगाम खींचकर घोड़े को रोका।

ततस्तु, इतोऽश्वात्, शिववीरः, ततस्तु शिबिकातोऽपजलखानः अपि युगपदेवाऽवातरताम्, परस्परं साक्षात्कृत्य च, उभावप्युत्सुकाभ्यां नयनाभ्याम्, सत्वराभ्यां पादाभ्याम्, स्वागताऽऽम्रेडनतत्परेण वदनेन, आश्लेषाय प्रसारिताभ्यां च हस्ताभ्यां, कौशेयास्तरण-विरोचितायां वहिर्वेदिकायां धावमानौ परस्परमालिलिङ्गतुः।

शिववीरस्तु आलिङ्गन-च्छलेनैव स्वहस्ताभ्यां तस्य स्कन्धौ दृढं गृहीत्वा सिंहनखैर्जत्रुणी कन्धरां च व्यपाटयत्। रुधिरदिग्धं च तच्छरीरं कटि-प्रदेशे समुत्तोल्य भूपृष्ठेऽपोथयत्।

तत्क्षणादेव च शिववीर-ध्वजिन्यां महाध्वज एकः समुच्छ्रितः। तत्समकालमेव यवन-शिबिरस्य पृष्ठस्थिता शिववीर-सेना शिबिर-

---

स्वागताम्रेडनम्=वारं वारं स्वागतनिवेदनम्। आश्लेषाय=आलिङ्गनाय। धावमानौ=शीघ्रं गच्छन्तौ। अन्योन्यं हर्षप्रदर्शनायेदम्। जत्रुणी=स्कन्धस्य सन्धी, "स्कन्धो भुजशिरोंऽसोऽस्त्री सन्धी तस्यैव जत्रुणी" इत्यमरः। व्यपाटयत्=व्यदारयत्। अपोथयत्=न्यपातयत्। "पटका" इति हिन्दी।

ध्वजिन्याम्=सेनायाम्।

इधर घोड़े से वीर शिवाजी और उधर पालकी से अफ़ज़ल खाँ, दोनों साथ ही उतरे और एक-दूसरे को देख कर, उत्सुक नेत्रों, जल्दी-जल्दी बढ़ रहे पैरों, 'स्वागत, स्वागत' कहने में तत्पर मुख और आलिंगन करने के लिए फैलाये गये हाथों वाले उन दोनों ने रेशमी चादर बिछे हुए बाहर के चबूतरे पर, दौड़ते हुए एक दूसरे का आलिंगन किया।

शिवाजी ने आलिंगन के ही बहाने, अपने हाथों से उसके कन्धों को मजबूती से पकड़ कर वघनखों से, कन्धों के जोड़ों और गले को चीर डाला, और उसके खून से लथपथ शरीर को कमर तक उठाकर, जमीन पर पटक दिया।

उसी क्षण वीर शिवाजी की सेना में एक बड़ी भारी पताका फहरा उठी। उसके फहराते ही यवन-शिविर के पीछे तैनात शिवाजी की सेना ने शिविर में

मग्निसात्कृतवतो, पुरःस्थित-सेनासु च अकस्मादेव महाराष्ट्र-केसरिणः समपतन्। तेषां 'हरहर-महादेव' गर्जनपुरस्सरं 'छिन्धि-भिन्धि-मारय-विपोथय'-इति कोलाहलः, प्रत्यर्थिनां च 'खुदा-तोबा-अल्लादि' पारस्य-पदमयः कलकलो रोदसी समपूरयत्।

ततो यवन-सेनासु शतशः सादिनः, गगनं चोचुम्ब्यमानाः, कृत-दिगन्त-प्रकाशाः, कडकडा-ध्वनि-धर्षित-प्रान्त-प्रजाः उड्डीयमान-दन्दह्यमान-परस्सहस्र-पटखण्ड-विहित-हैम-विहङ्गम-विभ्रमाः, ज्योतिरिङ्गणायित-परस्कोटि-स्फुलिङ्ग-रिङ्गित-पिङ्गीकृत-प्रान्ताः,

---

रोदसी = द्यावापृथिव्यौ।

शतशः सादिनो ज्वालमाला अवलोक्य तदभिमुखं प्रयाता इति सम्बन्धः। ज्वालमाला विशिनष्टि—गगनं चोचुम्ब्यमाना इत्यादिभिः। कृतो दिगन्तस्य = दिक्प्रान्तभागस्य, प्रकाशो याभिस्ताः। कडकडाध्वनिभिः धर्षिताः = त्रासिताः, प्रान्तप्रजा याभिस्ताः। उड्डीयमानैः, दन्दह्यमानैः = नितरां ज्वलद्भिः, परस्सहस्रैः पटखण्डैर्विहितो हैमानाम् = सौवर्णानाम्, विहङ्गमानाम् = पतत्रिणाम्, विभ्रमो याभिस्ताः। ज्योतिरिङ्गणायितानाम् = खद्योतायितानाम्, परस्कोटीनाम् = असङ्ख्यानाम्, पारस्करादित्वात् सुट्, टित्वेन पराद्यवयवत्वात् न विसर्गः। एवमेव परस्सहस्र-परश्शतादावपि। स्फुलिङ्गानाम् = अग्निकणानाम्, रिङ्गितैः = उड्डयनैः, पिङ्गीकृताः = पिञ्जरीकृताः, प्रान्ताः = परिसरभूमयो याभिस्ताः।

आग लगा दी, और आगे खड़ी यवन सेनाओं पर वीर मराठे एकाएक सिंह के भाँति टूट पड़े। उनके 'हर हर महादेव' गर्जनपूर्वक, 'मारो, काटो, पटको' के कोलाहल और शत्रुओं की 'खुदा, तोवा, अल्ला' आदि फारसी शब्दमय हलचल से पृथ्वी और आकाश गूँज उठे।

तब यवनसेना के सैकड़ों घुड़सवार, आकाश को छूने वाली, दिशाओं को प्रकाशित कर देने वाली, कड़कड़ा ध्वनि से समीप के लोगों को भयभीत कर देनेवाली, हजारों अधजले कपड़ों के टुकड़ों से स्वर्णपक्षियों का भ्रम उत्पन्न कर देनेवाली, जगुनू के समान करोड़ों चिनगारियों के उड़ने से पास-पड़ोस को पीला

दोधूयमान-धूम-घटा-पटल–परिपात्यमान–भसित–सितीकृतानोकहाः, सकलकलध्वनि पलायमानैः पतत्रि–पटलैरिव सोसूच्यमानाः शिविर-घस्मरा ज्वालमाला अवलोक्य, स-हाहा-कारं तदभिमुखं प्रयाताः । अपरे च महाराष्ट्राऽसि-भुजङ्गिनीभिर्दन्दश्यमाना, केचन "त्रायस्व-त्रायस्व" इति साम्रेडं व्याहरमाणाः पलायमानाः, अन्ये धीरा वीराश्च—

दोधूयमानानाम् = नितान्तं (कम्पन्तीनाम्) वृद्धिं गच्छन्तीनाम्, धूमघटानाम् = धूमलेखानाम्, पटलेन = समूहेन, परिपात्यमानैः = समन्ततो विकीर्यमाणैः, भसितैः = भस्मभिः, सितीकृताः = शुभ्रीकृताः, अनोकहाः = वृक्षाः, याभिस्ताः । सकलकलध्वनि = कलकलशब्देन सह, पलायमानैः, पतत्रिपटलैः = पक्षिसमूहैः । सोसूच्यमानाः = बोबुध्यमानाः । उड्डीना भयात् कलकलं कुर्वन्ति विहगाः, इह च स एव सूचनमुखेनोत्प्रेक्षितः । शिबिरघस्मराः = पटगृहभक्षिकाः । दन्दश्यमानाः = भृशं दश्यमानाः, खण्ड्यमाना इत्यर्थः । साम्रेडम् = वारं वारम् ।

बना देनेवाली, लगातार बढ़ रही (कम्पायमान) धूम घटाओं से चारों ओर बिखेरी जा रही भस्म से वृक्षों को सफेद बना देने वाली, शिविर को भस्मसात् कर देनेवाली अग्नि की ज्वालाओं को—कलकल ध्वनि करके उड़ रहे पक्षी मानो जिसकी सूचना दे रह थे—उन्हें देखकर हाहाकार करते हुए उसी ओर दौड़े । अन्य यवन, मराठों की तलवार रूपी नागिन से डँसे जा रहे थे; कुछ 'बचाओ, बचाओ' कहते हुए भाग रहे थे, और कुछ वीर और धीर यवन सैनिक 'अरे धूर्तराजो ! अरे दुष्ट मराठो ! खड़े रहो, खड़े रहो, चोरों लुटेरों और डाकुओं की तरह यवन सेनापतियों पर आक्रमण क्यों करते हो ? सामने आओ, जिससे हमारी तलवारों की बहुत दिनों से बढ़ी मराठों की खून पीने की प्यास शान्त हो सके ।' यह कह कर, सिंहनाद-पूर्वक गरज कर, युद्ध के लिए तैय्यार हो, खड़े हो गये ।

"तिष्ठत रे तिष्ठत धूर्त-धुरीणाः! महाराष्ट्र-हतकाः! किमिति चौरा इव लुण्ठका इव दस्यव इव च यवन-सेनापतीनाक्रम्यैथ? समागच्छत सम्मुखम्, यथा शाम्यैदस्मच्चन्द्रहासानां चिरप्रवृद्धा महाराष्ट्र-रुधिराऽऽस्वाद-तृषा"

—इति सक्ष्वेडं सङ्कर्ज्य, युद्धाय सज्जाः समतिष्ठन्त।

तेषां चाऽश्वानां सव्यापसव्यमार्गैः खुरक्षुण्णा व्यदीर्यत वसुधा। खड्ग-खटखटाशब्दैः सह च प्रादुरभूवन् स्फुलिङ्गाः। रुधिरधाराभिः जपा-सुमनस्समाच्छन्नमिवाऽभूद् रणाङ्गणम्।

तदवलोक्य गौरसिंहो मृतस्याऽपजलखानस्य शोणित-शोणं शोणं शरीरं प्रलम्ब-वेणु-दण्डाग्रेषु बद्ध्वा समुत्तोल्य सर्वान् सन्दर्श्य सभेरीनादं घोषितवान् यद्—"दृश्यतां दृश्यतामितो हतोऽयं यवन-सेनापतिः, ततश्चाऽग्निसात् कृतानि ससकल—सामग्री—जातानि-शिविराणि, परितश्च बहूनि विनाशितानि यवन-वीर-कदम्बकानि,

---

दस्यवः=चोराः। सक्ष्वेडम्=ससिंहनादम् 'क्ष्वेडा तु सिंहनादः' इत्यमरः।

सुमनसः=पुष्पाणि। "स्त्रियः सुमनसः पुष्पम्" इत्यमरः।

शोणितशोणम्, शोणम्=रुधिरार्द्रत्वात् प्रकृत्या च रक्तवर्णमित्यर्थः। प्रलम्बानाम्=दीर्घाणाम्, वेणुदण्डानाम्=वंशानाम्, अग्रेषु, समुत्तोल्य=

उनके घोड़ों के दाँये-वायें पैतरा वदलने से खुरों से खुद कर पृथ्वी फट-सी गयी और तलवार के खटखट शब्दों के साथ ही चिनगारियाँ निकलने लगीं। रक्त की धारा से रणभूमि जपापुष्पों से आच्छन्न-सी हो गयी।

यह देख कर गौरसिंह ने मरे अफ़ज़ल खाँ के खून से लथपथ लाल शरीर को लम्बे बाँसों की नोंक में बाँध कर खड़ा कर, सबको दिखा कर, डुग्गी पिटा कर यह घोषणा कर दी—"देखो, देखो इधर यह यवन सेनापति मार डाला गया है, और उधर सारी सामग्री सहित सारे सिविर जला दिये गये हैं और चारों ओर अनेक

तत् किमिति अवशिष्टा यूयं मुधा वक-गृध्र-शृगालानां भोज्याः संवर्तध्वे ? शस्त्राणि त्यक्त्वा पलायध्वं पलायध्वम्, यथा नेयं भूः कदुष्णैर्भवतां, सद्यश्छिन्न-कन्धरा-गलद्रुधिरप्रवाहैर्भवद्रमणीनां च कज्जल-मलिनैर्बाष्प-पूरैरार्द्रा भवेद्"–इति। तदवधार्य, दृष्ट्वा च रुधिर-दिग्धं क्रीडापुत्तलायितं स्वस्वामिशरीरम्, सर्वे ते हतोत्साहा विसृज्य शस्त्राणि, कान्दिशीका दिशो भेजुः।

ससेनः शिववीरश्च विजय-शङ्खनादै रोदसी सम्पूर्य, रणाङ्गण-शोधनाधिकारं माल्यश्रीकाय समर्प्य, प्रताप-दुर्गं प्रविश्य मातुश्चरणौ प्रणनाम।

इति द्वितीयो निश्वासः।

उत्थाप्य। कदम्बकानि = समूहाः। कदुष्णैः = ईषदुष्णैः। संवर्तध्वे = भवथ। रुधिरदिग्धम् = रक्तविलिप्तम्। क्रीडापुत्तलायितम् = खेलार्थं निर्मितपटादि-मूर्तिवदाचरितम्।

कान्दिशीकाः = भीताः। "कान्दिशीको भयद्रुतः" इत्यमरः।

रोदसी = द्यावाभूमी। मातुः = जनन्याः। प्रणनाम = नमस्कृतवान्।

इति शिवराजविजयवजयन्त्यां द्वितीयनिश्वासविवरणम्।

यवन-वीरों के समूह नष्ट कर दिये गये हैं, तो बचे हुए तुम लोग व्यर्थ में बगुलों, गीधों और सियारों का भोजन क्यों बनते हो ? शस्त्र छोड़कर भागो, भागो, जिससे यह भूमि तुम्हारी तुरंत कटी गर्दन से बह रही गरम-गरम खून की धाराओं और तुम्हारी स्त्रियों के काजल से मैले आँसुओं के प्रवाहों से गीली न हो।" यह सुनकर और अपने सेनापति के खिलौने बनाये गये खून से लथपथ शरीर को देखकर वे सभी हतोत्साहित हो, शस्त्र छोड़कर, डरकर चारों ओर भाग खड़े हुए।

वीर शिवाजी ने सेना के साथ विजय-शङ्ख के घोष से अन्तरिक्ष और पृथ्वी के अन्तराल को पूर्ण कर, रणभूमि की सफाई का काम माल्यश्रीक को सौंप कर, प्रतापगढ़ में प्रवेश कर, माता के चरणों में प्रणाम किया।

शिवराजविजय का द्वितीय निश्वास समाप्त।

॥ श्रीः ॥

अथ तृतीयो निश्वासः

"जीवन् नरो भद्रशतानि पश्येत्"

—स्फुटकम्

"संसारेऽपि सतीन्द्रजालमपरं यद्यस्ति तेनापि किम्"

—भर्तृहरिः

तत्र पर्ण-कुटीरे तु कथं कथमपि दाडिमाद्यास्वादन-तत्परां कुसुम-गुच्छैर्मनो विनोदयन्तीं बालिकां गुरोः समीपे परित्यज्य तदाज्ञया तत्पितरौ समन्वेष्टुम्, अन्तर्गोपित-क्षुर-प्रच्छुरिकां यष्टिकामेकां हस्तेन धृत्वा, तैरेव श्याम-श्यामैः गुच्छ-गुच्छैः लोल-लोलैः कुञ्चित-

---

गौरवटुश्यामवटुनाम्नोः प्रसिद्धयोरुदयपुरराज्यैकभूभागस्वामिश्रीखङ्गसिंह-तनययोः समागमश्चिराद् विमुक्तया सौवर्णीनामिकया भगिन्या पुरोहितेन च काक-तालीयन्यायेन जात इति तृतीयपरिच्छेदकथामुपक्षिपति "जीवन् नरो भद्र-शतानि पश्येत्" इति।

अघटितघटनापटीयस्या मायया प्रपञ्चजातमेवेन्द्रजालं न तु ततोऽन्यत् किञ्चि-दित्यपि स्मारयति भर्तृहरिपद्यखण्डेन—"संसारेऽपि" इति।

कुसुमगुच्छैः = पुष्पस्तवकैः। श्यामश्यामैः = अतिश्यामैः। एवमग्रेऽपि।

'जीवित रहने पर मनुष्य सैकड़ों सुख देख सकता है।'

'संसार के होते हुए भी, यदि कोई दूसरा इन्द्रजाल हो तो उससे क्या, अर्थात् सृष्टि का सबसे बड़ा इन्द्रजाल स्वयं संसार ही है' (भर्तृहरि)।

उस पर्णकुटी में किसी प्रकार अनार आदि खाने में लगी हुई और फूलों के गुच्छों से मन बहला रही बालिका को गुरु के समीप छोड़ कर, उनकी आज्ञा से, उसके माता-पिता को खोजने के लिए, एक लकड़ी की गुप्ती—जिसमें

कुञ्चितैः कचैः ब्रह्मचारि-बटु-वेष एव श्यामवटु-रासन्न-ग्रामटिका-दिशि-समगात्।

ततो "हन्त! कथमद्यापि शूली त्रिशूलेन नैतान् शूलाकरोति? कथं खड्गिनी खड्गेन न खण्डयति? कथं चक्री चक्रेण न चूर्णयति? कथं पाशी पाशैर्न पाशयति? कथं हली हलेन नाऽवहेलयति? कथं वा जम्भारातिर्दम्भोलिघातैर्दम्भिन एतानम्भोधि-जल-स्तम्भाऽऽरम्भेषु न पातयति? अहह! क इतोऽप्यधिकोऽनर्थो भविता यद् भगवान-वतरिष्यति। शिव! शिव!! न शक्यते द्रष्टुमपि यदेतैर्निर्दय-हृदयैः

"नित्यवीप्सयोः" इत्याभीक्ष्ण्ये द्वित्वम्। आसन्ना=समीपवर्त्तिनी, ग्रामटिका=लघुग्रामः। "स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः" इत्यादिषु महाकविभिः प्रयुक्तोऽयं शब्दः, तद्धित इति महासंज्ञास्वारस्य-कल्प्यमान-"ग्रामाट्टिकन्" इति टिकन्प्रत्यय-निष्पन्नः। "गंवई" इति हिन्दी।

शूली=शिवः, शूलाकरोति=शूलेन पचति। "शूलात् पाके" इति डाच्। खड्गिनी=दुर्गा। चक्री=विष्णुः। पाशी=वरुणः। "प्रचेता वरुणः पाशी" इत्यमरः। पाशैः=बन्धनसाधनैर्वरुणास्त्रैः, हली=बलः, अवहेलयति=तिरस्करोति। जम्भस्य=तन्नाम्नोऽसुरस्य, अरातिः=रिपुः, इन्द्रः, दम्भोलीनाम्=वज्राणाम्, "दम्भोलिरशनिर्द्वयोः" इत्यमरः, घातैः=ताडनैः। अम्भोधेः=क्षीरनिधेः जलस्तम्भानाम्, आरम्भेषु=उपक्रमेषु। क्वचिज्जलविमारभ्य मेघ-

तीक्ष्ण छुरी छिपी थी—हाथ में लेकर, काले, सुन्दर घने और घुँघराले बालों वाला साँवला बालक, ब्रह्मचारी के वेष में ही गाँव की ओर चल दिया।

"हा! इतना अनर्थ और अधर्म होने पर भी भगवान् रुद्र त्रिशूल से इन अधर्मियों को क्यों नहीं वेध देते? खड्गधारिणी दुर्गा अपने खड्ग से इनके टुकड़े-टुकड़े क्यों नहीं कर देती? चक्रधारी विष्णु इन्हें चक्र से क्यों नहीं पीस डालते? वरुण इन्हें पाश से बाँध क्यों नहीं देते? हलधर बलराम हल से इनकी अवहेलना क्यों नहीं करते? जम्भ के शत्रु इन्द्र इन अभिमानियों को वज्र मारकर समुद्र के जलस्तम्भों (एक विशेष तूफान के कारण समुद्र के जल का खड़े होकर खम्भों का रूप ले लेना) में क्यों नहीं फेंक देते? उफ! क्या इससे भी बढ़कर अनर्थ हो सकता है, जब भगवान् अवतार लें। शिव!

परमपूजनीयानां ब्राह्मणानामपि अत्यल्पवयस्का अपि बालिका अपह्रियन्ते। धिगेतान् धर्मादपि निर्भीकान् अभीकान्"–इति चिन्ता-सन्तान-वितानैकताने एव ब्रह्मचारि-गुरौ, सपद्येव न्यविशत श्यामवटुः सह देवशर्म्मणा वर्षीयसा ब्राह्मणेन। स तु बाष्प-क्षालितोपनयनः शोकाधिक-कम्पित-गात्रयष्टिः प्रविश्यैव, दृष्ट्वैव तां बालिकां "कुतः कुतः कोशले!" इत्युदीर्य तामङ्के जग्राह।

साऽपि प्रक्षिप्य दाडिम-खण्डम्, निरस्य च कोरक-स्तबक-क्रीडनकम्, तं कराभ्यां कण्ठे गृहीत्वा मुक्तकण्ठं रुरोद।

वृद्धोऽपि च एकं करं तत्पृष्ठे विन्यस्य अन्येन च तस्याः शिरः परिमृशन् "कोशले! कानि पातकानि पूर्वजन्मनि कृतवत्यसि? यद् बाल्य

पर्यन्तं जलस्तम्भा आविर्भवन्तीति पदार्थ-विद्या-वेदिनां नाऽविदितचरम्। अनुप्रासः। धर्मादपि निर्भीकान् = धार्मिकभयशून्यान्। अभीकान् = कामुकान्। "कम्रः कामयिताऽभीकः" इत्यमरः। चिन्तायाः सन्तानस्य = समूहस्य, वितान = विस्तारीकरणे, एकतानः = स्थिरचित्तः न्यविशत = प्रविष्टः। वर्षीयसा = वृद्धेन। बाष्पेण = रोदनजलेन, क्षालितम् = धौतम्, उपनयनम् = उपनेत्रम्, 'चश्मा' इति हिन्दी, यस्य सः। शोकेन, अधिकम्, कम्पिता = वेपमाना, गात्रयष्टिः = शरीरं यस्य सः।

· मुक्तः = अप्रतिहतः कण्ठो यस्यां क्रियायां तदिति क्रियाविशेषणमिदम्। क्रियाविशेषणानामेकत्वं कर्मत्वं च स्वाभाविकप्रायम्।

शिव!! देखा भी नहीं जाता। ये निर्दयहृदय वाले यवन परम पूजनीय ब्राह्मणों की भी कम उम्र की भी बच्चियों का अपहरण करते हैं। "धिक्कार है, धर्म से भी न डरने वाले इन कामुक लोगों को।" ब्रह्मचारी गुरु इन्हीं चिन्ताओं से चिन्तित हो रहे थे कि वृद्ध ब्राह्मण देवशर्मा के साथ साँवले ब्रह्मचारी ने प्रवेश किया। उस वृद्ध ब्राह्मण का चश्मा आँसुओं से धुल रहा था। प्रवेश करके और बालिका को देखकर ही उसने "कोशला! कोशला!! तुम यहाँ कैसे?" कहकर उसे गोद में उठा लिया।

वह भी अनार के टुकड़े और कलियों के गुच्छे—जिससे वह खेल रही थी—को फेंक कर, उस वृद्ध के गले में बाँहें डाल कर, फूट-फूट कर रोने लगी।

वृद्ध भी एक हाथ उसकी पीठ पर रखकर दूसरे हाथ से उसका सिर सहलाता हुआ इस प्रकार करुण विलाप करने लगा—

एव त्वत्पिता सङ्ग्रामे म्लेच्छ-हतकैर्धर्मराजनगराध्वन्यध्वन्यः कृतः। माता च तव ततोऽपि पूर्वमेव कथावशेषा संवृत्ता, यमलौ भ्रातरौ च तव द्वादशवर्षदेश्यावेव आखेट-व्यसनिनौ महार्ह-भूषण-भूषितौ तुरगावारुह्य वनं गतौ दस्युभिरपहृताविति न श्रूयते तयोर्वार्ताऽपि, त्वं तु मम यजमानस्य पुत्रीति स्वपुत्रीव मयैव सह नीता, वर्द्धसे च। अहह ! कथं वारं वारं बालैव सुन्दरकन्या-विक्रय-व्यसनिभिर्यवन-वराकैरपह्रियसे ? भगवदनुग्रहेण च कथं कथमपि सत्कर-मुक्ता पुनः प्राप्यसे। परमात्मन् ! त्वमेव रक्षैनामनाथां दीनां क्षत्रिय-कुमारीम्"- इति सकरुणं विललाप।

तदाकर्ण्य सर्वेऽपि चकिताः स्तब्धाः अश्रुमुखाश्च संवृत्ताः। कुटीराध्यक्षो ब्रह्मचारी च निजमपि किञ्चिद् बन्धु-वियोग-दुःखं

धर्मराजस्य = वैवस्वतस्य, नगरस्य, अध्वनि = मार्गे। अध्वन्यः = पान्थः। मरणं न वाच्यमितीत्थं कथयति। यमलौ = सहजातौ, द्वादशवर्ष-देश्यौ = आसन्नद्वादशवर्षौ। आखेटे = मृगयायाम्, व्यसनं ययोस्तौ। महार्हैः = बहुमूल्यैः, भूषणैः = अलङ्करणैः, भूषितौ।

"कोशला, तूने पूर्व जन्म में कौन-से ऐसे पाप किये थे कि तेरे पिता तेरे बचपन में ही युद्धस्थल में म्लेच्छों द्वारा मार डाले गये, तेरी माँ उससे भी पहले कथाशेष हो गई (मर गई), और तेरे दोनों जुड़वाँ भाई—जो शिकार के शौकीन थे—बहुमूल्य आभूषण पहन कर घोड़ों पर सवार होकर वन में गये, और दस्युओं द्वारा हर लिये गये, तथा फिर उनकी चर्चा भी नहीं सुनाई दी। तू मेरे यजमान की पुत्री थी, इसलिए अपनी पुत्री के ही समान समझकर मैंने तुझे अपने साथ रखा और पाला पोसा। आह ! सुन्दर कन्याओं के व्यापारी यवन दुष्टों के द्वारा कई वार तेरा अपहरण किया गया, पर भगवान् के अनुग्रह से किसी न किसी प्रकार उनसे छूटकर मुझे प्राप्त होती रही। भगवन् ! तुम्हीं इस अनाथ और दीन क्षत्रिय कुमारी की रक्षा करना।"

यह सुनकर सभी लोग चकित और स्तब्ध रह गए, तथा उन्हें आँसू आ गए। कुटी के अध्यक्ष ब्रह्मचारी को भी मानो अपने किसी बन्धु के वियोग के

स्मारित इव बाष्प-व्रजोद्गम-दुर्दिन-ग्लपित-मुखः कथं कथमपि धैर्य-माधाय वदनं पटेन परिमृज्य पुनरवदधे।

तावत् कुटीराद् बहिः कस्मिंश्चित् कार्ये व्यासक्तो गौरबटुर्विलापैतैतेन कर्णयोराकृष्यमाण इव त्वरितमन्तः प्रविवेश। पौनःपुन्येन दृष्ट्वा च तां कन्यां देवशर्म्माणं वृद्धं ब्राह्मणं च, परिपक्व-तालीदलीभूत-कपोल-पालीकः, उदञ्चित-रोममाली, त्वरित-कोष्ण-श्वास-प्रश्वास-शाली, शारदशर्वरी-शर्वरी-सार्वभौम-किरण-किरणोद्भूतोद्भूत-कीलालाली-व्यालीढ-चन्द्रकान्त-जालीभूत-लोचनः, बाष्पावरुद्धकण्ठः कमपि

बन्धुवियोगदुःखं स्मारितः=इष्टविरहक्लेशमनुभावितः, बाष्पाणाम्=अश्रूणाम्, व्रजस्य=समूहस्य, उद्गमेन=प्रादुर्भावेण, यद् दुर्दिनम्, तत्तुल्यम्, "मेघच्छन्नेऽह्नि दुर्दिनम्" इत्यमरः, तेन ग्लपितम्=ग्लानम्, मुखम्=आननम् यस्य सः। अविच्छिन्नाश्रुधाराम्लानमुख इत्यर्थः। अवदधे=सावधानोऽभूत्।

परिपक्वं यत्तालोदलं तत् समतामापन्ना, अभूततद्भावे च्व्यन्तम्, तालीदलीभूता या कपोलपाली=गण्डप्रान्तो यस्य सः शोकेनेषत्पीतगण्डस्थल इति भावः। उदञ्चिता=प्रोद्गता, रोममाला=लोमावली यस्य स। इनिः। त्वरिताभ्याम्=शैघ्र्ययुताभ्याम्, कोष्णाभ्याम्=ईषदुष्णाभ्यां श्वासप्रश्वासाभ्यां शालते=शोभते। इनिरत्रापि। शरदि भवा शारदी, सा चाऽसौ शर्वरी=निशीथिनी, तस्याः शर्वरीसार्वभौमस्य=शशाङ्कस्य, किरणा-

दुःख का स्मरण हो आया और उनका मुख निरन्तर बहने वाली अश्रुधारा से म्लान हो गया। किसी प्रकार धैर्य धारण कर मुँह को उत्तरीय वस्त्र से पोंछकर वह पुनः सावधान हुए।

उस कुटी के बाहर किसी काम में लगा हुआ गौर ब्रह्मचारी इस विलाप के कान में पड़ते ही अन्दर आ गया।

उस कन्या और देवशर्मा ब्राह्मण को बार-बार देखकर उसके गाल पके हुए तालपत्र के समान पीले हो गये, देह रोमाञ्चित हो गयी, वह जल्दी-जल्दी साँसें लेने लगा, उसकी आँखें शरत्काल की चन्द्रकिरणों के संस्पर्श से उत्पन्न जलकणों से व्याप्त चन्द्रकान्त मणि जैसी अर्थात् अश्रुपूर्ण हो गयीं, और गला

वृत्तान्तं स्मारित इव, कमपि चिरविनष्टं प्रेयांसं प्रापित इव, किमपि चिरानुभूतं दुःखं पुनरनुभावित इव च स्मारं स्मारमिव किमपि स्वसमानदशं श्यामबटुं सम्बोध्य कातरेण भज्यमानेन कम्पमानेन च स्वरेणाऽचकथत्—

"श्याम ! श्याम ! शृणोषि शृणोषि ?" इति ।

अथ श्यामबटुरपि अश्रुभिः स्नातो गौरस्य करं गृहीत्वा "तात ! शृणोमि, सेयं सौवर्णी अस्मद्भगिनी, स चाऽयं पूज्यपादः पुरोहितः" इति कथयन् गौरमपि प्रकटं रोदयन् रुरोद ।

तदाकर्ण्य क्षणं सर्वेऽपि कुटीरस्थाः काष्ठविग्रहा इव चित्रलिखिता इव च संवृत्ताः ।

नाम् = दीधितीनाम् किरणेन = क्षेपणेन, उद्भूतोद्भूतम् = अत्यन्तं निर्यातम्, यत् कीलालम् = पानीयम्, "पयः कीलालममृतम्" इत्यमरः, तस्य आली = पङ्क्तिः, तया व्यालीढः = ग्रस्तः, यः चन्द्रकान्तः = तन्नामा मणिविशेषः तस्य जालीभूते = समुदायभूते लोचने यस्य सः । स्रवद्बाष्प इत्यर्थः । शर्वरी शर्वरी, किरण-किरणेत्यत्र यमकम्, अनुप्रासस्तु सर्वत्र । प्रसादो गुणः । गौडी रीतिः । प्रेयांसम् = अतिशयप्रियम् । प्रापितः = लम्भितः । स्वेन समाना दशा = अवस्था यस्य तम् । भज्यमानेन = त्रुटचता । कम्पमानेन = सवेपथुना । तात ! =

रुँध गया, जैसे उसे कोई वात याद आ गयी हो, जैसे उसे किसी चिर अनुभूत दुःख की पुनः अनुभूति होने लगी हो, इस प्रकार कुछ स्मरण करता हुआ सा वह अपनी ही मनःस्थिति वाले साँवले ब्रह्मचारी को सम्बोधित कर, कातर, लड़खड़ाते और काँपते स्वर में बोला—

"श्याम ! श्याम ! सुनते हो ? सुनते हो ?" तदनन्तर आँसुओं से नहाया साँवला ब्रह्मचारी गौर ब्रह्मचारी का हाथ पकड़ कर, "हाँ भाई ! सुन रहा हूँ, यही हमारी वहिन सौवर्णी है, और यही हमारे पूज्यपाद पुरोहित हैं" यह कहता हुआ गौर ब्रह्मचारी को भी प्रकट रूप में रुलाता हुआ रोने लगा ।

उस रोदन को सुनकर कुटी के सभी लोग थोड़ी देर के लिए कठपुतली के समान अथवा चित्रलिखित से (जडवत्) हो गये ।

देवशर्माऽपि च स्तब्धीभूतामिव कन्यकां तस्मिन्नेव कुशविष्टरे उपवेश्य चक्षुषी स्थिरीकृत्य "वत्सौ! किं वीरस्य खड्गसिंहस्य तनयौ युवाम् ?" इति कथयन् वली-पलितौ वार्द्धक्यवेपमानौ बाहू प्रससार। तौ चाऽऽत्मनः पित्रोरपि पूजनीयं पुरोहितं साष्टाङ्गं प्रणेमतुः। स च कथमप्युत्थाय, उत्थाप्य च तौ, समाश्लिष्य स्वनयन-वारिधाराभिस्तावभ्यषिञ्चत्।

ततो मुहूर्त्तं यावत्तु परितः प्रसर्पिभिः करुणोद्गार-प्रवाहैरेव पर्यपूर्यत सा कुटी।

अथ कथमपि रिङ्गत्तुङ्ग-तिमिङ्गिल-गिल-परिवर्त्त-प्रसङ्ग-सङ्ग-

भ्रातः, वलीपलितौ = जरसा शौक्लचयुतकेशौ। अभ्यषिञ्चत् = आर्द्रीकृतवान्, "प्राक्सितादड्व्यवायेऽपि" इति षत्वम्।

प्रसर्पिभिः=विसारिभिः, करुणोद्गारस्य = करुणरसोद्गमस्य, प्रवाहैः= धाराभिः। उत्प्रेक्षा। पर्यपूर्यत=पूरिताऽभूत्।

अथ कुटीराध्यक्षो गौरश्यामौ समुवाचेति सम्बन्धः। रिङ्गन्=सञ्चलन्, यः तुङ्गः = सुमहान्, तिमिङ्गिलगिलः=तन्नामा मत्स्यविशेषः। "अस्ति मत्स्यस्तिमिर्नाम शतयोजनविस्तरः। तिमिङ्गिलगिलोऽप्यस्ति तद्गिलोऽप्यस्ति राघव!" इति हनुमद्वचनम्, तस्य परिवर्त्तः=पार्श्वपरिवर्तनम्, तस्य प्रसङ्गस्य=

देवशर्मा ने भी निश्चल सी हुई उस कन्या को उसी कुशासन पर बिठा कर आँखें स्थिर करके "पुत्रो! क्या तुम दोनों वीर खड्गसिंह के आत्मज हो ?" यह कहते हुए श्वेत रोमों से भरी और बुढ़ापे के कारण काँपती हुई बाँहें फैला दीं, और उन दोनों ने अपने पिता के भी पूज्य पुरोहित को साष्टांग प्रणाम किया। देवशर्मा ने किसी तरह उठकर और उन दोनों को उठा कर उनका आलिंगन कर उन्हें अपनी अश्रुधारा से नहला दिया।

उसके बाद थोड़ी देर के लिए वह कुटी चारों ओर फैल रही करुणा की धारा से आप्लावित हो गई।

तदनन्तर तिमिंगिल—गिल के चतुर्दिक घूमने से छिन्न हो जाने वाली

सभङ्ग-तरङ्ग-रङ्गप्राङ्गण-सोदरीभूत हृदयं वशीकृत्य, अनुजां सुवर्णवर्णां सौवर्णीनाम्ना बाल्य एव प्रसिद्धां कोशलामङ्के संस्थाप्य, समुपविष्टे गौरे; श्यामेऽपि च तस्या एव समीपे समुपविश्य तस्या एव पृष्ठं परिमृजति; पूज्यपादे पुरोहिते च क्रियासमभिहारेणोद्गच्छतो बाष्पान् पटान्तेन परिहरति; कुटीराध्यक्षः कुतुक-परवशः सम्बोध्य गौर-श्यामौ समुवाच—

'वत्सौ गौर-श्यामौ ! जानेऽहं वां क्षत्रियोचिताचारेषु चातन्द्रितौ सनातनधर्म-विप्लवासहनौ नीतिकुशलौ परोपकार-व्यसनिनौ दुर्बलात्कार-परायण-तुच्छ-यवन-च्छेदेच्छोच्छल-च्छटाच्छन्नौ, बाला-

---

अवसरस्य, सङ्गेन=संसर्गेण, सभङ्गानाम्=समुच्छलितानाम्, तरङ्गाणाम्=वीचीनाम्, रङ्गप्राङ्गणस्य=नर्त्तनचत्वरस्य, सोदरीभूतम्=सादृशम् । भृशं व्याकुलं क्षुभितमिति यावत् । हृदयम्="हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः। अनुप्रासः । प्रौढिरर्थगुणः । परिमृजति=हस्तस्पर्शं कुर्वति, सत्रन्तम् । क्रियासमभिहारेण=भृशं पौनःपुन्येन च । कुतुकपरवशः=सकौतूहलः । सनातनधर्मस्य विप्लवासहनौ=विनाशं प्रलयं वा असहमानौ । दुर्बलात्कारे=दुष्टसाहसे, परायणानाम्=निरतानाम्, तुच्छानाम्=नीचानाम्, छेदस्य=खण्डनस्य, इच्छया=अभिलाषेण, उच्छलन्त्या=उद्गच्छन्त्या, छटया=हार्दा-

---

तरंगों के नर्तन स्थल के समान अपने हृदय को किसी प्रकार सँभालकर अपनी सोने के से रंग वाली बचपन से ही सौवर्णी नाम से प्रसिद्ध कोशला नाम की बहिन को गोद में बिठाकर गौर ब्रह्मचारी के बैठ जाने पर, श्याम ब्रह्मचारी के भी उस कन्या के ही समीप बैठकर उसकी पीठ सहलाने लगने पर, तथा पूज्यपाद पुरोहित के बार-बार निकलने वाले आँसुओं को उत्तरीय के छोर से पोछने लगने पर कुतूहलाक्रान्त कुटीराध्यक्ष ने गोरे और साँवले दोनों ब्रह्मचारियों को सम्बोधित कर कहा "वत्स गौर और श्याम ! मैं जानता हूँ कि तुम दोनों आलस्यरहित होकर क्षत्रियों का-सा आचरण करने वाले, सनातनधर्म के ह्रास या विनाश को न सहन कर सकने वाले, नीतिकुशल, परोपकारी, अत्याचारी दुष्ट यवनों के काटने की अभिलाषा से उत्पन्न

ष्वप्यबालपराक्रमौ, सकल-कला-कलाप-कोविदौ गुणि-गण-गणनीयौ च, किन्तु नाऽद्यावधि कदाऽपि भवतोर्जन्मस्थानादि-प्रश्न-प्रसङ्गोऽभूत्, आकर्ण्य च भवतोर्दुःखमयमपि विलापमयमपि चाऽऽलापं महत् कुतूहलमस्माकं वर्वर्ति। तत् समाश्वस्य धैर्यमाधाय सङ्क्षेपेण कथ्यतां का भवतोर्जन्मभूः? कथमत्राऽऽगतौ? किमेषा सहोदरा स्वसा? सत्यमेव किं भुवं विरहय्य लोकान्तरं सनाथितवन्तौ युष्मत्पितरौ? क्व यौष्माकीण-पैतृपितामहिक-सम्पत्तिः? किं भवतोरुद्देश्यम्?" इत्यादि।

तदाकर्ण्य चक्षुषी विमृज्य मुखं प्रोञ्छ्य कण्ठं रुन्धतो बाष्पान् कथमपि संरुध्य इन्दीवरयोरुपरि भ्रमतो भ्रमरानिव लोचनयो-

---

ऽवस्थाविशेषेण, आच्छन्नौ=व्याप्तौ। अनुप्रासः। अबालपराक्रमौ=महाबलौ। बालौ कथमबालपराक्रमाविति षष्ठीतत्पुरुषसमासे विरोधाभासः। सकलस्य=भेदोपभेदसहितस्य, कलाकलापस्य=कलासमूहस्य, कोविदौ=विज्ञातारौ। गुणिनाम्=कलाविदाम्, गणे=समुदाये, गणनीयौ=गण्यौ। समाश्वस्य=समाधाय। धैर्यमाधाय=धीरतामानीय। यौष्माकीणा=युष्मत्स्वामिका। पैतृपितामहिकी=वंशपरम्पराप्राप्ता, सम्पत्तिः।

लोचनयोरञ्चितान् केशानपसार्येति सम्बन्धः। उपमिनोति—इन्दीवरयोः=कमलयोः, उपरि भ्रमतः=ऊर्ध्वं चलतः। भ्रमरानिवेति कचोपमानम्।

कान्ति से व्याप्त बालक होते हुए भी महापराक्रमी सभी कलाओं में निष्णात और गुणियों में गिने जाने योग्य हो, लेकिन आज तक कभी भी तुम दोनों का जन्म स्थान आदि पूछने का प्रसंग नहीं आया, आज तुम्हारे दुःखपूर्ण और विलापपूर्ण वार्तालाप को सुनकर मुझे वहुत कौतूहल हो रहा है। इसलिये आश्वस्त होकर, धैर्य धारण कर संक्षेप में बताओ कि तुम्हारा जन्म-स्थान कहाँ है? तुम यहाँ कैसे आये? क्या यह तुम्हारी सगी वहिन है? क्या तुम्हारे माता-पिता सचमुच ही पृथ्वी को छोड़कर दूसरे लोक को सुशोभित कर चुके हैं? तुम्हारे पिता, पितामह आदि पूर्वपुरुषों की सम्पत्ति कहाँ है? तुम्हारा उद्देश्य क्या है?" इत्यादि।

यह सुनकर आँखों और मुँह को पोंछकर गला रूँधने वाले आँसुओं को किसी तरह रोककर, नील कमलों पर मँडराते भौंरों के समान आँखों पर

रञ्चितान् कुञ्चित-कुञ्चितान् मेचकान् कचानपसार्य निस्तन्द्रेण मन्द्रेण स्वरेण गौरसिंहो वक्तुमारभत—

"अस्ति कश्चन धैर्य-धारि-धुरन्धरैः, धर्मोद्धार-धौरेयैः, सोत्साह-साहस-चञ्चच्चन्द्रहासैः, सुशक्ति-सुशक्तिभिः, सद्यश्छिन्न-परिपन्थि-गल-गलच्छोणित-च्छुरित-च्छन्न-च्छुरिकैः, भयोद्भेदनभिन्दिपालैः, स्व-प्रतिकूल - कुलोन्मूलनानुकूल - व्यापार - व्यासक्त - शूलैः, घन-विघ्न-विघट्टक-घर्घराघोष-घोर-शतघ्नीकैः, प्रत्यर्थि-शुण्डि-शुण्डा खण्डनो-

---

अपसार्य=अपवार्य । निस्तन्द्रेण=तन्द्राशून्येन, मन्द्रेण=गम्भीरेण ।

अस्ति कश्चन राजपुत्रदेश इति सम्बन्धः । देशं विशिनष्टि—धैर्यधारि-धुरन्धरैः=विशालधीरताशालिभिः । धर्मोद्धारे धौरेयैः=अग्रेसरैः । सोत्साहेन= साध्यवसायेन, साहसेन चञ्चन्तः=चलन्तः, चन्द्रहासाः=असयो येषां तैः । सु शोभनायाः, अकुण्ठितायाः, शक्तेः=कृपाण्याः, सुशक्ति=शोभनसामर्थ्यं येषां तैः । सद्यश्छिन्नेभ्यः=तत्कालकृत्तेभ्यः, परिपन्थिनाम्=शत्रूणाम्, गलेभ्यः= कण्ठेभ्यः, गलताम्=स्रवताम्, शोणितानाम्, छुरितैः=बिन्दुभिः, छन्नाः= लिप्ताः, छुरिकाः=असिधेनवो येषां तैः । भयोद्भेदना भिन्दिपाला येषां तैः । भिन्दिपालाः=नालिकास्त्राणि, "पिस्तौल" इति हिन्दी । स्वप्रतिकूला-नाम्=शत्रूणाम्, कुलानाम्=अन्वयानाम्, उन्मूलनानुकूलव्यापारेषु= विध्वंसनोचितकर्त्तव्येषु, व्यासक्तानि=संलग्नानि, शूलानि=कुन्ता येषां तैः । घनानाम्=विपुलानाम्, विघ्नानाम्=प्रत्यूहानाम्, शत्रुकृतोपद्रवाणां, विघ-ट्टिकाः=विमर्दिकाः । सामानाधिकरण्यात् पुंवत्त्वम्, घर्घराघोषेण=घर्घर-

---

आ रहे घुंघराले काले वालों को हटा कर आलस्यहीन गम्भीर स्वर से गौरसिंह ने कहना प्रारम्भ किया ।

"धैर्य धारण करने वालों में अग्रगण्य, धर्म के उद्धार में अग्रसर, उत्साह-पूर्ण साहस से चमकती तलवारों वाले, सामर्थ्यशाली शक्तियों (अस्त्रविशेष) वाले, शत्रुओं के ताजे कटे गले से बहने वाली रुधिर विन्दुओं से लिप्त छुरों वाले, भय दूर करने वाली पिस्तौलों वाले, विपक्षियों के संहार में लगे शूलों वाले, भयंकर घर्घर ध्वनि से विघ्न समूह को दूर करने वाली तोपों वाले,

द्दण्ड-भुशुण्डीकैः प्रचण्ड-दोर्दण्ड-वैदग्ध्य-भाण्ड-काण्ड-प्रकाण्डैः, क्षत्रिय-वर्यैरार्यवर्यैरर्यवर्यैश्च व्याप्तो राजपुत्र-देशः।

यत्र कोष-पूरिताः काञ्चनमया इव सानुमन्तः, महार्हे-मणिगण-जटिल-जाम्बूनद-भूषणभूषिता गन्धर्वा इव जनाः, विचित्र-गवाक्ष-

---

ध्वनिना, अथवा घर्घर इति आघोषो यासां ताः, घोराः=भयावहाः, शतघ्न्यः= शतमारिकाः, येषां तैः, शतघ्नी लोके "तोप" इति कथ्यते। णभतुभ-हिंसायामित्य-स्मान्निष्पन्न—"तोभ" शब्दापभ्रंशोऽसौ "तोप" शब्द इति "सप्तद्वीपा वसुमती" इत्यादिभाष्यतत्त्ववेदिनः। प्रत्यर्थि-शुण्डिनाम्=शत्रुकरिणाम्, शुण्डानाम्= कराणाम्, खण्डने=कर्तने, उद्दण्डा भुशुण्ड्यो येषां तैः। प्रचण्डदोर्दण्डवैदग्ध्य-भाण्डानि=प्रवलबाहुदण्डपाण्डित्यसदनानि, यानि काण्डप्रकाण्डानि=प्रशस्त-बाणा येषां तैः। "प्रशंसावचनैश्च" इति प्रकाण्डपदस्य परनिपातः। प्रकाण्डं पुन्नपुंसकम्। आर्येषु वर्यैः=ब्राह्मणैः। क्षत्रियाणां प्रथमोच्चारणं तु तेषामेव तत्राऽधिक्यप्रदर्शनार्थम्, सङ्ग्रामे तेषामेव प्रावल्यबोधनार्थं च। ब्राह्मणा अपि देश-रक्षणार्थं सन्नद्धा एवाऽऽसन्निति तत्त्वम्। अर्याः=वैश्याः। "अर्यः स्वामिवैश्ययोः" इति विश्वः। कोषपूरिताः=निधानपूर्णाः। काञ्चनमया इव=हिरण्मया इव। सानुमन्तः=शिखरिणः। महार्हाणाम्=बहुमूल्यानाम्, मणीनाम्= हीरकादीनाम्, गणेन=समूहेन, जटिलैः=मिलितैः, जाम्बूनदभूषणैः=सुवर्णा-लङ्करणैः, भूषिताः=शोभिताः। गन्धर्वा इव=देवयोनिविशेषा इव। विचित्राः=

शत्रुओं के हाथियों की सूंड काटने में दक्ष बन्दूकों वाले, तथा प्रवल भुजदण्डों की कुशलता के पात्र और प्रशस्त बाणों वाले क्षत्रियवीरों, ब्राह्मणश्रेष्ठों और वैश्यवरों से व्याप्त, एक राजपूताना नाम का देश है।

जहाँ के सोने की खानों से पूर्ण पर्वत सुमेरु के समान और बहुमूल्य मणि-माणिक्य जटित स्वर्णभूषण पहनने वाले मनुष्य गन्धर्वों के समान हैं।

जालाऽट्टालिकाऽङ्गण-कपोतपालिका-चत्वर-गोष्ठ-भित्तिकाः विश्वकर्म-रचिता इव गृहाः, सादि-करस्थ-कशाग्र-चालन-सङ्केत-सञ्चलित-सप्ति-समूह-शफ-सम्मर्द-समुद्धूत-धूलि-धूसरिताश्च मार्गाः। अस्ति तस्मिन्नेव राजपुत्रदेशे उदयपुरनाम्नी काचन राजधानी, यत्रत्याः क्षत्रियकुलतिलका यवनराज-वशंवदता-कर्दम सम्मर्देन कदाऽप्या-

विविधाः=गवाक्षाद्या येषु तादृशाः। गवाक्षः=वातायनम्, "खिड़की" "झरोखा" इति वा हिन्दी। जालम्=वायुप्रवेशार्थमार्गः, "जाली" इति हिन्दी। अट्टालिका=प्रस्तरादिनिर्मितं महासदनम्। अङ्गणम्=अजिरम्। कपोतपालिका=काष्ठ-रचितं पक्षिवासस्थानं विटङ्कम्। चत्वरम्=लक्षणया चतुष्पथबोधकम्। अङ्गणस्य पृथगुच्चारणेन नात्र तद्वाचकतेति वेदितव्यम्। गोष्ठम्=गोशाला। भित्तिः=कुड्यं येषां ते। विश्वकर्मणा=देवशिल्पिना, रचिता इव=निर्मिता इव। सादिकरस्थानाम्=अश्ववारहस्तस्थितानाम्, कशानाम्=अश्वताडनी-नाम्, अग्रस्य=प्रान्तस्य, चालनसङ्केतेन=धावनप्रेरणेन, सञ्चलितस्य=गच्छतः, सप्तिसमूहस्य=वाजिनिवहस्य, शफसम्मर्दैः=खुरकुट्टनैः, समुद्धूताभिः=उच्छलिताभिः, धूलिभिः=रजोभिः, धूसरिताः=ईषच्छुभ्राः। 'ईषत्पाण्डुस्तु

जहाँ के, नाना प्रकार की खिड़कियों, झरोखों, रोशनदानों, अटारियों, आँगनों, कबूतर पालने के दरबों, चबूतरों, गोशालाओं और दीवारों वाले महल, विश्वकर्मा द्वारा बनाये गये से लगते हैं, और जहाँ की सड़कें घुड़सवारों के हाथ की चाबुक के अग्रभाग के हिलने से चलने का संकेत पाकर द्रुतगति से दौड़ने वाले घोड़ों के खुरों से खुद कर उड़ने वाली धूल से व्याप्त हैं। उसी राजपूताना देश में उदयपुर नाम की एक राजधानी है, जहाँ के क्षत्रियकुलतिलक राजाओं ने, मुसलमान राजाओं की अधीनता रूप कीचड़ से

ऽत्मानं कलङ्कयामासुः" इति कथयत्येव गौरसिंहे, ब्रह्मचारिगुरुरपि कोष्णं निःश्वस्य—

"को न जानीते उदयपुर-राज्यम् ? यदीय-चित्रपूर-दुर्गे परस्स-हस्राः क्षत्रिय-कुलाङ्गनाः, कमला इव विमलाः, शारदा इव विशा-रदाः, अनसूया इवाऽनसूयाः, यशोदा इव यशोदाः, सत्या इव सत्याः,

---

धूसरः' इत्यमरः । यवनराजवशंवदतैव कर्दमः, तत्सम्मर्दैः=तल्लेपैः । न कलङ्कयामासुः=न सदूषणं चक्रुः ।

चित्रपूरदुर्गे="चित्तौड़ गढ़" इति नितरां प्रसिद्धे। केचित् 'चित्रकूट' शब्दापभ्रंशं मन्यन्ते "चित्तौड़" शब्दम् । भगवद्रामभद्रतनयलववंशीया हि भूमि-पाला उदयपुरीया इति रामविपिनचित्रकूटनाम्ना तत्प्रसिद्धतायामनुकूलस्तर्कः । अमरमङ्गले तर्करत्नभट्टाचार्यास्तु 'चितम् व्यूढम्, उरो यस्ये'ति व्याख्याय "चितोरः" इति शब्दमवागृह्लन्निति वेदितव्यम् । कमला इव=श्रिय इव । "कमला श्रीर्हरि-प्रिया" इत्यमरः । शारदा=सरस्वती । विशारदाः=पण्डिताः । शारदा कथं विगतशारदेति विरोधाभासः । अनसूया = अत्रिपत्नी । अनसूया=असूयारहिताः । असूया=गुणेषु दोषाविष्करणम् । यशोदा=कृष्णमाता । यशोदाः=यशोदायिन्यः । न केवलं पतिव्रताभिस्तासामेव कीर्तिरेधते अपि तु तत्पतीनामपि । "व्यालग्राही यथा व्यालं बिलादुद्धरते बलात्" इति मानवं च शासनमत्र भवति । सत्याः= सत्यभामाभिधाना श्रीकृष्णपत्नी, नामैकदेशग्रहणन्यायात् । सत्याः=सत्यभाषिण्यः।

अपने को कभी भी कलंकित नहीं होने दिया ।" गौरसिंह ने इतना ही कहा था कि ब्रह्मचारी गुरु उष्ण निःश्वास लेकर, धीरे से बोले—

"उदयपुर राज्य को कौन नहीं जानता ? जिसके चित्तौड़दुर्ग में हजारों क्षत्राणियाँ जो लक्ष्मी के समान विमल, सरस्वती के समान बुद्धिमती, अनसूया के समान असूयारहित, यशोदा के समान यश देने वाली, सत्यभामा के समान

रुक्मिण्य इव रुक्मिण्यः सुवर्णा इव च सुवर्णाः, सत्य इव सत्यः, सम्भाव्यमान-यवन-वलात्कार-धिक्कारोर्जस्वल-तेजस्काः, योगाग्निनेव पतिविरहाग्निनेव स्वक्रोधाग्निनेव च सन्दीपितासु ज्वालाजालाञ्चितासु चितासु, स्मारं स्मारं स्वपतीन्, पश्यतामेव स्वकीयानां परकीयाणां च क्षणात् पतङ्गतामङ्गीकृत्य, गङ्गाधरस्याऽङ्गभूषणतामगमन्"—इति मन्दं व्याजहार।

तदाकर्ण्य करुणया दुःखेन कोपेन आश्चर्येण वैमनस्येन ग्लान्या च

अर्शआद्यजन्तम्। रुक्मिणी=कृष्णपत्नी। रुक्मिण्यः=सुवर्णवत्यः। सुवर्णा इव=कनकपदार्था इव। सुवर्णाः=शोभनवर्णवत्यः। सुन्दर्य इति यावत्। सती=शङ्करगेहनी। सत्यः=पतिव्रताः "सती साध्वी पतिव्रता" इत्यमरः। यशोदादिषु व्यक्तिमात्रवाचकेषु वहुत्वं गौरवप्रदर्शनाय, तन्मुखेनोपमानोपमेयभावनिर्वाहाय च। सम्भाव्यमानस्य=अनुमीयमानस्य, यवनवलात्कारस्य, धिक्कारे=तिरस्करणे, ऊर्जस्वलम्=वेलवत्, तेजो यासां ताः। सन्दीपितासु=सुप्रज्वलितासु। कीदृशाग्निहेतुकं प्रज्वलनमित्युत्प्रेक्षते—योगाग्निनेव=योगसामर्थ्यात् समुत्पन्नेनाऽग्निनेव। पत्युर्विरहाज्जायमानेन वह्निनेव। स्वक्रोधादुद्भूतदहनेनेव। ज्वालाजालाञ्चितासु=कीलसमूहसमवेतासु। "वह्नेर्द्वयोर्ज्वालकीलौ" इत्यमरः। पतङ्गताम्=शलभताम्। गङ्गाधरस्याऽङ्ग-भूषणम्=भस्म, तद्भावम्, भस्मताम्।

"पतिलोकमभीप्सन्ती" इत्यादिभिः पतिलोकप्राप्तेः फलस्य प्रदर्शितत्वेऽपि शिवधामप्राप्त्याद्यर्थोऽपि उपलक्षविधया घटत एवेति मन्तव्यम्।

सत्य बोलने वाली, रुक्मिणी के समान स्वर्णभूषणों से अलंकृत सोने के समान रंगवाली और पार्वती के समान पतिव्रता थीं, तथा जिनका तेज यवनों के सम्भावित बलात्कार को धिक्कारने में समर्थ था, मानो योगाग्नि, पतिविरहाग्नि या क्रोधाग्नि से प्रदीप्त की गई ज्वालाओं वाली चिताओं में अपने और परायों के देखते ही देखते, अपने पतियों का वार-वार स्मरण करती हुई, पतंग की तरह जलकर शंकर के शरीर का भूषण वन गई (अर्थात् भस्म हो गई)।"

यह सुनकर करुणा, दुःख, क्रोध, आश्चर्य, वैमनस्य (अनमनेपन) और

क्षालित-हृदयेषु निखिलेषु गौरसिंहः पुनः स्व-वृत्तान्तं वक्तुमुपचक्रमे यत्—

"तद्राज्यस्यैवऽान्यतमो भू-स्वामी खड्गसिंहो नामाऽस्मत्तात-चरण आसीत्।"

खड्गसिंहनाम्ना परिचित इव ब्रह्मचारी समधिकमबाधित। स च पूर्ववदेव वक्तुं प्रावृतत्—

"अस्मज्जननी तु बालावेवाऽऽवां स्तनन्धयामेव चास्मत्सहोदरीं सौवर्णीं परित्यज्य, भुवं विरहयाम्बभूव। अस्मत्तातचरणश्च कैश्चित् तुरुष्कैर्लुण्ठकप्रायैर्युद्ध-क्रीडां कुर्वन् पृष्ठतः केनाऽपि विशाल-भल्लेनाऽऽहतो वीरगतिमगमत्। ततः पुरोहितेनैव पाल्यमानावावा-

---

करुणया=क्षालितहृदयेष्वित्यादिरूपेण तृतीयान्तषट्कस्य क्षालनेऽन्वयः, क्षालनं चाऽत्रोपचारेण व्यापनार्थकम्, करुणाद्यतिशयव्यञ्जनाय च तदाश्रयणम्, दीपकालङ्कारः।

समधिकम्=अत्यन्तम्, अबाधित=पीडामन्वभूत्। प्रावृतत्=प्रवृत्तः। स्तनन्धयाम्=पयःपानरताम्। शिशुमित्यर्थः। विरहयाम्बभूव=परितत्याज। तुरुष्कैः="तुर्क" इति हिन्दी। वीराणां गतिम्=उत्तमं लोकम्।

"द्वाविमौ पुरुषौ लोके सूर्यमण्डलभेदिनौ।
परिव्राड् योगयुक्तश्च रणे चाऽभिमुखो हतः॥" इति स्मृतिः।

ग्लानि से सभी लोगों के हृदयों के घुल (व्याप्त हो) जाने पर, गौरसिंह ने पुनः अपना वृत्तान्त कहना प्रारम्भ किया कि, 'उसी राज्य के अन्यतम जमींदार खड्गसिंह हमारे पिता थे'।

खड्गसिंह के नाम से परिचित से ब्रह्मचारी ने अत्यधिक पीड़ा का अनुभव किया। वह पहले की ही भाँति कहता गया—

हम दोनों अँभी बालक ही थे, और हमारी बहन सौवर्णी अभी दूध पीती बच्ची ही थी, कि हमारी माँ ने हमें छोड़कर, भूलोक को विरहित कर दिया (मर गई)। हमारे पिता जी ने, कुछ लुटेरे तुर्कों से लड़ते हुए, पीछे से, किसी के द्वारा भीषण भाले का आघात कर देने के कारण, वीरगति प्राप्त की। तदनन्तर

मपि यमलौ भ्रातरौ गौर-श्यामौ एकदा मित्रैः सहाऽऽखेटार्थं निःसृतौ तुरगौ चालयन्तौ मार्ग-भ्रष्टौ अकस्मात् काम्बोजीय-दस्यु-वारेणाऽऽवृतौ तेनैवाऽपहृत-महार्ह-भूषणौ गृहीताश्वौ बद्धौ च सहैव वनाद् वनमनायिष्वहि। "यद्यपि शत्रुसन्ताना निर्दयं हन्तव्या एव; तथाऽपि नासा-भूषण-मौक्तिके इव वीणा-तुम्बाविव श्यामकर्ण-हयाविव च मनोहर-रूपौ समानाकारौ समानवयस्कौ समान-परिणाहौ समान-स्वभावौ समान-स्वरौ समान-गुणौ केवलं वर्णमात्रतो भिन्नौ रामकृष्णाविवामू गौर-श्यामौ बालकौ। तदवश्यं बहुमूल्याविति कुत्रापि

यमलौ=सहजौ। "जुड़वाँ" इति हिन्दी। मार्गभ्रष्टौ=विस्मृतमार्गौ। काम्बोजीयदस्युवारेण=कम्बोजदेशीयतस्करसमूहेन। अपहृतमहार्हभूषणौ=लुण्ठितबहुमूल्यालङ्करणौ। बहुव्रीहिः। अनायिष्वहि=नीतौ। अत्राऽऽवामिति कर्म। शत्रुसन्तानाः=रिपुवंशाः "वंशोऽन्ववायः सन्तानः" इत्यमरः। समानपरिणाहौ=समविशालतौ। वर्णमात्रतो भिन्नौ, ज्येष्ठस्य शुभ्रत्वात् कनिष्ठस्य च श्यामलत्वात्।

पुरोहित के ही द्वारा पाले जाते हुए हम दोनों जुड़वाँ भाई गौर और श्याम, एक दिन मित्रों के साथ शिकार खेलने निकले, और घोड़े पर चलते-चलते रास्ता भूल गए। अकस्मात् कम्बोज देश के लुटेरों ने हमें घेर लिया, हमारे बहुमूल्य आभूषण और घोड़े छीन लिये, और हमें बाँध कर अपने साथ वे एक जंगल से दूसरे जंगल ले गए। वे आपस में बातचीत करते थे कि 'यद्यपि शत्रुओं की सन्तान की निर्दयतापूर्वक हत्या कर देनी चाहिये, तथापि ये दोनों बालक नथ के मोतियों की भाँति, वीणा की दो तुम्बियों की भाँति और दो श्यामकर्ण घोड़ों की भाँति सुन्दर रूप वाले हैं। समान आकार, वय, विशालता, स्वभाव, स्वर और गुणवाले केवल वर्ण मात्र से भिन्न ये दोनों गौर और श्याम बालक बलराम

कस्यचिदपि महाधनस्य हस्ते विक्रयणीयौ" इति तेषां घोरतरान् संल्लापान् शृण्वन्तौ 'कथं पलायावहे ? कथं वा मुच्यावहे ?' इत्यनवरतं चिन्तयन्तौ कथं कथञ्चित् कञ्चित् समयमयापयाव।

अथैकदा कञ्चित् पान्थ-सार्थमवलोक्य तल्लुलुण्ठयिषया सर्वेष्वपि तस्य पन्थानमेवानुसृतेषु आवाभ्यामपि पलायनावसरो लब्धः। यावच्चाऽऽवां वस्त्राणि परिधाय, परिकरे असिधेनुकां बद्ध्वा, बाहुमूले निस्त्रिंशं चर्म्म च लम्बयित्वा, तद्भुशुण्डिकानामेवैकामेकामल्पीयसीमात्मोत्तोलन-योग्यां सज्जां करे धृत्वा, उपकारिकाया बहिर्निर्गतौ; तावद् दृष्टम्—यदेको रक्षकः खड्गहस्तो नौ बहिर्गमनाद् वारयतीति।

पान्थसार्थम्=पथिकव्रजम्। तल्लुलुण्ठयिषया=तस्य पान्थसार्थस्य धनापजिहीर्षया, परिकरे=गात्रबन्धे। "भवेत् परिकरो व्राते पर्यङ्कपरिवारयोः। प्रगाढगात्रिकाबन्धे विवेकारम्भयोरपि" इति विश्वः। असिधेनुकाम्=छुरिकाम्, "छुरिका चासिधेनुका" इत्यमरः। बाहुमूले=कक्षे, निस्त्रिंशम्=खड्गम्। आत्मोत्तोलनयोग्याम्=स्वोत्थापनार्हाम्। सज्जाम्=गोलिकापूर्णाम्। सिद्धामिति यावत्। उपकारिकायाः=पटभवनात्। "उपकार्योपकारिका" इत्यमरः। "तम्बू" इति हिन्दी।

और कृष्ण के समान हैं। ये अवश्य ही बहुमूल्य हैं, अतः किसी के साथ इन्हें बेंच देना चाहिए'। उनकी इस भीषण बातचीत को सुनते हुए, तथा 'किस प्रकार भगें ? किस प्रकार छूटें ? इसी की निरन्तर चिन्ता करते हुए, हमने जैसे-तैसे कुछ समय बिताया।

एक दिन किसी पथिक समूह को आता देख, उसे लूटने की इच्छा से सभी के उसी ओर चले जाने पर हम लोगों को भागने का मौका मिल गया। कपड़े पहन कर, कमर में छुरा बाँधकर, बगल में ढाल तलवार लटका कर, उन्हीं की बन्दूकों में से अपने से उठने योग्य एक-एक छोटी, सज्जित (भरी) बन्दूक हाथ में लेकर, हम दोनों ज्यों ही खेमे के बाहर आये कि हमने देखा कि एक पहरेदार जिसके हाथ में तलवार है, हमें बाहर निकलने से रोक रहा है।

अथाऽऽवाभ्यां भुशुण्डिकां सन्धायोक्तम्---"अलमलं कदर्य ! किमप्यधिकं वक्ष्यसि तत्स्थानात् पादमेकामपि च प्रचलिष्यसि चेत्; क्षणेन परेतपति-पालित-पुरी-पान्थं विधास्यावः" इत्याकलय्य भयेन काष्ठभूते तस्मिन् मूढ-रक्षके; मयि च तथैव बद्ध-लक्ष्ये स्थिते; मदिङ्गितानुसारेण श्यामसिंहस्तस्या एवोपकार्य्याया:प्रान्ते बद्धानां फेनवर्षिणीमश्वानां कौचिच्चण्डवेगौ श्यामकर्णावाजानेयौ उन्मुच्य, वल्गामायोज्य सर्वतः सज्जीकृत्य चैकमारुह्य रक्षकोपरि भुशुण्डिकां तथैव सज्जीकृतवान्। ततश्चाऽहमप्यपरं हयमारुह्य तस्य ग्रीवामास्फोटय नर्तयन् रक्षकं साम्रेडं तर्ज्जनैर्हतोत्साहं मृतप्रायं च विधाय, श्यामसिंहमिङ्गितवान्।

परेतपतिना=यमेन, पालितायाः=रक्षितायाः, पुर्याः पान्थम्, त्वमिति शेषः। मूढश्चासौ रक्षकः, तस्मिन्। भयेन काष्ठभूते "डर से काठ हुए" इति भाषायाम्। किञ्चिदकुर्वाणः कोलाहलमपि नाकार्षीदिति मूढत्वम्। फेनवर्षिणाम्, भोजनकालोपरिष्टात् सुखोपविष्टाः फेनं वमन्त्यश्वा इति स्वभावः। आजानेयौ = कुलीनौ। "शक्तिर्भिभिन्नहृदयाः स्खलन्तश्च पदे पदे। आजानन्ति यतः संस्थामाजानेयास्ततः स्मृताः" इत्यश्वशास्त्रम्। तर्जनैः=भर्त्सनैः। इङ्गितवान् = चेष्टया बोधितवान्, गन्तुमिति शेषः।

हम दोनों ने बन्दूक तान कर कहा, 'बस, बस, नीच ! यदि कुछ भी अधिक बोलोगे, या उस जगह से एक कदम भी चलोगे तो यमपुरी का अतिथि बना देंगे।' यह सुनकर वह पहरेदार डर से काठ हो गया, मैं वैसे ही निशाना साधे खड़ा रहा, मेरे इशारे के अनुसार श्यामसिंह ने उसी खेमे के पास बँधे, फेन उगल रहे घोड़ों में से दो शीघ्रगामी, अच्छी जाति के श्यामकर्ण घोड़ों को खोलकर, लगाम लगाकर, उन्हें सब तरह से सुसज्जित कर, एक पर चढ़कर, उस पहरेदार पर उसी तरह बन्दूक तान ली। उसके बाद मैंने भी दूसरे घोड़े पर बैठकर उसकी गर्दन थपथपा कर, उसे नचाते हुए, धमकियों से पहरेदार को निरुत्साहित और अधमरा सा करके, श्यामसिंह को चलने का इशारा किया।

अथाऽऽवां द्वावपि वायुवेगाभ्यामश्वाभ्यामज्ञातेनैवाऽपथा, उपत्यकात् उपत्यकाम्, वनाद् वनम्, प्रान्तराच्च प्रान्तरमुल्लङ्घमानौ तेनैव दिनेन गव्यूति-पञ्चकं प्रयातौ। सायं समये च कामपि ग्रामेटिकामासाद्य अन्यतमस्य गृहस्य द्वारं गतौ। तच्च हनुमन्मन्दिरमवगत्य तस्मिन् प्रविष्टौ तदध्यक्षेण केनचित् साधुना च सस्वागतमाग्रहेण वासितौ, तत्रैव निवासमकुर्वहि।

अथ तत्प्रदत्तमेव हनूमत्प्रसादीभूतं मोदकादि समास्वाद्य, तस्यैव भृत्येनाऽऽनीतं यवस-भारं वाजिनोरग्रे पातयित्वा, मन्दिरस्यैव वहिर्वेदिकायामितस्ततः पर्यटन्तौ मुहूर्त्तमावामवास्थिष्वहि।

ततश्च दुग्धधाराभिरिव प्रथमं प्राचीं सङ्क्षाल्य, भसितच्छुरिता-

---

अपथा=कुमार्गेण, "नञस्तत्पुरुषात्" इति समासान्ताभावः। प्रान्तरम्=दूरशून्यो मार्गः। "प्रान्तरं दूरशून्योऽध्वा" इत्यमरः। "पांतर" इति हिन्दी। वासितौ=स्थापितौ।

यवसभारम्=घासभारम्। अवास्थिष्वहि=स्थितौ, 'समवप्रविभ्यः स्थः' इत्यात्मनेपदम्।

ततश्च समुदिते चैत्रचन्द्रखण्डे परितो दृक्पातमकार्षमिति सम्बन्धः।

हम दोनों हवा के समान तेज उन घोड़ों से, अनजाने और दुर्गम रास्ते से ही, उपत्यका से उपत्यका, एक जंगल से दूसरे जंगल और एक उजाड़ मार्ग से दूसरे उजाड़ मार्ग होते हुए, उसी दिन दस कोस निकल गए। शाम को एक छोटे-से गाँव में पहुँचकर वहाँ के एक अच्छे घर के दरवाजे पर गये। उसे हनुमान का मन्दिर जानकर, उसमें घुस गए। उसके अध्यक्ष साधु ने स्वागतपूर्वक साग्रह हमें वहाँ रखा और हम वहीं रह गए।

मन्दिराध्यक्ष के द्वारा दिये गये हनुमानजी के प्रसाद के लड्डू आदि खाकर, और उन्हीं के नौकर द्वारा लाई गई घास को घोड़ों के आगे डाल कर, मन्दिर के वाहर के चबूतरे पर इधर-उधर घूमते हुए, हम कुछ क्षण रुके।

तदनन्तर, पहले प्राची दिशा को मानो दुग्धधाराओं से धोकर, भस्म से

मिव विधाय, चन्दनैरिव सञ्चर्च्य, कुन्द-कुसुमैरिवाऽऽकीर्य, गगन-सागर-मीने इव, मनोज-मनोज्ञ-हंसे इव, विरहि-निकृन्तन-रौप्य-कुन्त-प्रान्ते इव, पुण्डरीकाक्ष-पत्नी-कर-पुण्डरीकपत्रे इव, शारदाभ्र-सारे इव, सप्तसप्ति-सप्ति-पाद-च्युते राजत-खुरत्रे इव, मनोहरता-महिला-ललाटे इव, कन्दर्प-कीर्तिलताङ्कुरे इव, प्रजा-जन-नयन-कर्पूरखण्डे

सुधादीधितिदीधितिभिर्भासितत्वमुत्प्रेक्षते—दुग्धधारासिरिवेति । भसितम्= भस्म; "भूतिर्भसितभस्मनी" इत्यमरः । तच्छुरितामिव=तद्भूषितामिवे-त्युत्प्रेक्षा, सञ्चर्च्य=अनुलिप्य, देवीं विधिवत् सम्पूज्य जना उदयं प्राप्नुवन्ति यथा तथा सुधादीधितिः प्राचीं सम्पूज्योदयं लेभ इति ध्वनयति । चन्द्रखण्डं विशिनष्टि—गगनम्=नभः तदेव सागरः=समुद्रः तस्य मीने=मत्स्य इवेति रूपकानुविद्धो-त्प्रेक्षा । मनोजस्य=मनसिजस्य, मनोज्ञे=चेतोहरे, हंस इव । विरहिणाम्= वियोगिनाम्, निकृन्तनाय=कर्त्तनाय, रौप्यस्य= रजतवदवभासमानस्य, कुन्तस्य=भल्लस्य, प्रान्त इव पुण्डरीकाक्षपत्न्याः= विष्णुस्त्रियाः लक्ष्म्याः, करपुण्डरीकपत्रे=हस्तस्थकमलदले । शरदि भवं शारदम्, अभ्रम्, मेघः, तत्सारे=तत्तत्त्वांशे । सप्तसप्तिः=सूर्यः, तस्य सप्तिः=अश्वः । तत्पाद-च्युते=तत्पादपतिते । राजते=रौप्ये च तस्मिन्, खुरत्रे="नाल" इति लोके ख्याते । मनोहरस्य भावो मनोहरता=सुन्दरता, सैव महिला=वनितेति रूप-कम्, तल्ललाटे । सुन्दर्याः स्त्रिया ललाटं चन्द्रार्धखण्डसदृशमिति सुप्रसिद्धमुपमानो-पमेयविदाम् । कन्दर्पकीर्त्तिरेव लता=व्रततिः, तदङ्कुरतुल्ये । शशाङ्केन हि कन्दर्पकीर्तिर्वर्ध्यते प्रजाजननयनानाम्, कर्पूरखण्डे=हिमवालुकाखण्डे ।

लिप्त कर, चन्दन-चर्चित-सा कर, कुन्दकुसुमों से व्याप्त-सा कर, आकाश-समुद्र के मत्स्य के समान, कामदेव के सुन्दर हंस के समान, विरहियों को वेधने वाले चाँदी के भाले के अग्रभाग के समान, लक्ष्मी के हाथ के कमल की पँखुरी के समान, शरत्कालीन मेघों के सारभूत तत्त्व के समान, सूर्य के घोड़े के पैर से गिरी चाँदी की नाल के समान, सुन्दरता रूपी महिला के ललाट के समान, कामदेव की कीर्तिलता के अंकुर के समान, लोगों की आँखों के लिए कपूर के

इव, तमी-तिमिर-कर्त्तन-शाणोल्लीढ-निस्त्रिंशे इव च समुदिते चैत्र-चन्द्र-खण्डे; तत्प्रकाशेन स्फुटं प्रतीयमानासु सर्वासु दिक्षु, अहं परितो दृक्पातमकार्षम्, अद्राक्षं च यदुत्तराभिमुखम्, यद् विशालं मन्दिरमस्ति, तद्द्वारस्योभयतः सुधालिप्त-भित्तिकायां विशालैः सिन्दूराक्षरैः 'जयति हनुमान्' 'रामदूतो विजयतेतराम्' 'विजयतामक्षक्षयकारी'-इति बहूनि वाक्यानि गदादि-चिह्नानि च लिखितानि सन्ति। तत उत्तरस्यामेकः स्वल्पः शैलखण्डः, पूर्वस्यां गहनं वनम्, पश्चिमायां च स्वल्पमेकं पल्वलमासीत्। यद्यप्यसौ पर्वत-खण्डो नात्यन्तं भयानक इव, तथाऽपि विविधगण्डशैलावृतः, झर-झर्झर-ध्वनि-पूरित-दिगन्त-

---

तमीतिमिरकर्त्तनाय=रात्र्यन्धकारनाशाय। शाणेन=कषेण, उल्लीढे=तेजिते, निस्त्रिंशे=खड्गे। यद्यपि खड्गधाराश्यामतावर्णनमेव कविसमयख्यात्यनुकूलम्,तथापि शाणोल्लीढत्वस्य चमत्कृतिविशेषाधायकत्वेनेह इत्थमभिहितमिति वेदितव्यम्। प्रतीयमानासु=दृश्यमानासु। सुधया=चूर्णेन, "चूना" इति हिन्दी, लिप्तायां भित्तिकायाम्। अतिशयेन विजयते विजयतेतराम्, "तिङश्च" इति तरपि "किमेत्तिङव्यय" इत्यादिनाम्। पल्वलम्=अल्पोदकं सरः। झरस्य=वारिप्रवाहस्य, "वारिप्रवाहो निर्झरो झरः" इत्यमरः, झर्झरध्वनिना

समान और रात्रि के अन्धकार के काटने (अर्थात् नाश करने) के लिए सान पर तेज किये गये खड्ग के समान, चैत्रमास के बालचन्द्र के उदित हो जाने तथा उसके प्रकाश में सभी दिग्भागों के स्पष्ट दृष्टिगोचर होने पर मैंने चारों ओर दृष्टिपात किया और देखा कि जो उत्तराभिमुख है वह विशाल मन्दिर है, उसके मुख द्वार के दोनों ओर चूने से पुती हुई दीवारों पर, बड़े-बड़े अक्षरों में, सिन्दूर से 'जयति हनुमान्' 'रामदूतो विजयतेतराम्' 'विजयतामक्षक्षयकारी' इत्यादि अनेक वाक्य और गदा आदि चिह्न अंकित हैं। उस मन्दिर के उत्तर एक छोटी-सी पहाड़ी, पूर्व में घना जंगल और पश्चिम की ओर एक छोटा-सा तालाब था। वह पहाड़ी यद्यपि बहुत भयानक-सी नहीं थी, फिर भी चट्टानों से घिरी, झरनों की झर-झर ध्वनि से दिशाओं को पूरित करने

रालः, महीरुह-समूह-समावृतः, उच्चावच-सानु-प्रचय-सूचित-विविध-कन्दरश्चाऽऽसीत्। चन्द्र-चन्द्रिका-चाकचक्यात् स्फुटमवालोक्यन्तै-तस्योपत्यकाः। पर्वताधोभागः

ततश्च झिल्ली-झङ्कारेणेव केनचित् विलक्षणेन अनाहतध्वनिनेव पर्य्यपूर्यत वसुधा। विचित्र एष कश्चन परस्सहस्र-तानपूर-षड्जस्वर-सोदरो वन-रात्रि-ध्वनिः, तमेव स्वरं गम्भीरं विशकलय्य आकर्णयता समश्रावि कीचकध्वनिरपि, तत्राऽप्यवदधता साक्षादकारि मधुकर-

---

पूरितानि दिगन्तरालानि यस्य सः। महीरुहाणाम्=वृक्षाणाम्, समूहेन समावृतः=आच्छन्नः, अतिघनीभूतवृक्षक इति भावः। उच्चावचानाम्=निम्नोन्नतानाम्, सानूनाम्=अद्रिनितम्बानाम्, प्रचयेन=समूहेन, सूचिताः=प्रकटीकृताः, विविधाः=अनेकाः, कन्दरा यस्य सः। चन्द्रचन्द्रिकाचाकचक्यात्=ज्योत्स्नादीप्तेः। अवालोक्यन्त=दृष्टाः।

झिल्ली=भृङ्गारी, तस्या झङ्कारेण। रात्रावदृश्या स्वनति झिल्ली प्रावृट्काले। विलक्षणेन=विजातीयेन। अनाहतध्वनिना=अव्यक्तशब्देन, इवेन तुल्यत्वम्। वास्तविकोऽनाहतध्वनिस्तु योगिगम्य एव। परस्सहस्राणाम्, तानपूराणां यः षड्जस्वरः तत्सोदरः=तत्तुल्यः। विशकलय्य=विविच्य। कीचकध्वनिः=वेणुविशेषशब्दः। "वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरः। समश्रावि=श्रुतः। अवदधता=ध्यानं ददता साक्षादकारि=

वाली और वृक्षों के समूहों से व्याप्त थी तथा उसकी ऊँची-नीची चोटियाँ उसमें अनेक कन्दराओं के होने की सूचना देती थीं। चाँदनी की चमक में इसकी तलहटियाँ स्पष्ट दिखायी पड़ रही थीं।

उसके बाद, झिल्लियों की झंकार के समान किसी अनाहत नाद सी विलक्षण ध्वनि से पृथ्वी पूर्ण हो उठी। हजारों तानपूरों के षड्जस्वर के समान, वनरात्रि की वह ध्वनि विचित्र थी। उसी स्वर की गम्भीरतापूर्वक विवेचना करके सुनने पर कीचक (आवाज करने वाले बाँस) की ध्वनि भी सुनायी दी। उस पर भी

निकर-झङ्कारः, पुनरेकाग्रतामङ्गीकुर्वता समाकर्णि स्रोतस्संसरण-सरत्कारः, तस्मिन्नपि च लयमिवाऽऽकलयता समन्वभावि समीरण-समीरित-किशलय-परिप्लवता-प्रभूत-स्वनः, तत्रापि च स्थिरतां बिभ्रता प्रत्यक्षीकृतं सुधा-धारामप्यधरीकुर्वत्, वीणा-रणनमपि विगणयत्, मधु विधुरयत्, मरन्दं मन्दयत्, कल-काकली-कलन-पूजितं कोकिल-कुल-कूजितम्। ततश्च बहूनामेव मधुर-कण्ठानां वन्य-पतत्रिणां स्थगित-

---

प्रत्यक्षीकृतः। मधुकरनिकरझङ्कारः=द्विरेफव्रातगुञ्जनम्, एकाग्रताम्=एकचित्तताम्। अङ्गीकुर्वता=स्वीकुर्वाणेन। स्रोतसाम्, संसरणस्य=वहनस्य। सवेगचलनस्येति भावः। सरत्कारः=सरदित्यनुक्रियमाणः शब्दः। आकलयता =सम्मेलयता। समीरणेन=पवनेन, समीरितानाम्=सञ्चालितानाम्, किशलयानाम्=पल्लवानाम्, पारिप्लवतया=स्फुरमाणतया, प्रभूतः=प्रचुरः, स्वनः। तत्रापि स्थिरतां विभ्रता प्रत्यक्षीकृतं कोकिलकुल-कूजितमिति सम्बन्धः। कूजितं विशिनष्टि— सुधाधारामिति। अधरीकुर्वत्=निम्नांशे स्थापयत्, ततोऽपि मधुरतरमिति भावः। विगणयत्=अभिभवत्। मधु=क्षौद्रम्। विधुरयत्=तिरस्कुर्वत्। कला=मधुरा, या काकली=सूक्ष्मोऽव्यक्तध्वनिः, "काकली तु कले सूक्ष्मे ध्वनौ तु मधुरास्फुटे" इत्यमरः, तस्याः

ध्यान देने पर भौरों की झंकार सुन पड़ी, पुनः एकाग्र होकर सुनने पर पानी के सोते के बहने की 'सर-सर' आवाज, और उसमें भी लीन से हो जाने पर हवा से हिलने वाले कोमल पत्तों की मर्मर-ध्वनि सुनाई पड़ी। और अधिक स्थिर होकर ध्यान देने पर अमृत की धारा को भी नीचा दिखाने वाली वीणा की ध्वनि का भी तिरस्कार करने वाली, मधु की मिठास को लज्जित करने वाली, पुष्परस को भी अपमानित करने वाली, सुन्दर काकली से पूजित, कोयलों की कूक सुन पड़ी। उसके बाद मधुर कण्ठ वाले अनेक जंगली पक्षियों के जोर-जोर से और जल्दी-जल्दी होने वाले स्वर

मन्थराऽऽरावाः समाकर्णिषत। अथाऽनुभवन् धीर-समीर-स्पर्श-सुखम्, साश्चर्यमवलोकयंश्च तारकितं नभः, स्मारं स्मारं स्वगृहस्य, महा-चिन्ता-पारावारे इवाऽहं न्यमाङ्क्षम्। ततः पृष्ठतो भित्तिकामाश्रित्य, करौ कटि-प्रदेशे संस्थाप्य, साम्मुखीन-शिखरि-शिखरे चक्षुषी स्थिर-यित्वा, आत्मानमपि विस्मृत्य व्यचारयं यत्—

"अहह! दुरदृष्टोऽस्मि!! धन्यावावयोः पितरौ यौ सुखिना-वेवाऽऽवां परित्यज्य दिवं सनाथितवन्तौ, न तयोरदृष्टे पुत्र-विश्लेष-दुःखं व्यलेखि धात्रा। नितान्तं पापिनौ चाऽऽवाम् यौ बाल्य एवेदृशीषु दुरवस्थासु पतितौ। का दशा भवेत् साम्प्रतमावयोरनुजायाः सौवर्ण्याः?

कलनेन=अनुरणनेन, पूजितम्=सत्कृतम्। स्थगितमन्थराः=मान्थर्यशून्याः। ताराः शीघ्राश्चेत्यर्थः। आरावाः=शब्दाः। समाकर्णिषत=श्रुताः। कर्मणि लुङ्। तारकाः सञ्जाता अस्मिन्निति तारकितम्=उडुगणसमेतम्। "तदस्य सञ्जातं तारकादिभ्य इतच्"। स्वगृहस्य, "अधीगर्थदयेशां कर्मणि" इति षष्ठी। महतीनां चिन्तानां पारावारे=समुद्रे। न्यमाङ्क्षम्=निमग्नोऽभवम्। करयोः कटि-प्रदेशे संस्थापनं चिन्तामुद्रा। साम्मुखीनशिखरिशिखरे=पुरोवर्तिपर्वतशृङ्गे। आत्मानमपि विस्मृत्य, विचारैकतानताध्वननायेदम्। 'अपने को भी भूल कर' इति लोकोक्तिरेषा।

सुनाई दिये। तत्पश्चात् धीरे-धीरे बह रही हवा के स्पर्श के सुख का अनुभव करता हुआ, तारों से भरे आकाश को बार-बार देखता हुआ और अपने घर की याद करता हुआ मैं बड़ी चिन्ता के सागर में डूब सा गया। फिर दीवार से पीठ टिका कर हाथों को कमर पर रखकर, सामने वाले पर्वत की चोटी पर आँखें टिकाकर, अपने को भी भूल कर, मैं सोचने लगा—"हाय, मैं बड़ा ही अभागा हूँ। हमारे माँ-बाप धन्य थे, जिन्होंने हम दोनों को सुखी छोड़कर स्वर्गलोक को अलंकृत किया। उनके भाग्य में विधाता ने पुत्र-वियोग का दुःख नहीं लिखा था। हम दोनों महापापी हैं, जो बचपन में ही ऐसी दुर्दशा में पड़े हैं। इस समय हमारी बहिन सौवर्णी की क्या

हन्त ! ! हतभाग्या सा बालिका; या अस्मिन्नेव वयसि पितृभ्यां परित्यक्ता, आवयोरप्यदर्शनेन क्रन्दनैः कण्ठं कदर्थयति। अहह ! सततमस्मत्क्रोडैक-क्रीडनिकाम्, सततमस्मन्मुखचन्द्र-चकोरीम्, सततमस्मत्कण्ठ-रत्नमालाम्, सततमस्मत्सहभोजिनीम्, बाल्य-लुलितैः, मधुर-मधुरैः, सुधा-स्यन्दनैः, दाद-दादेति-भाषणैः आवयोः हृदयं हरन्तीम्, क्षणमात्रमस्मदनवलोकनेनाऽपि बाष्प-प्रवाहैः कपोलौ मलिनयन्तीम्, कथमेनां वृद्धः पुरोहितः सान्त्वयिष्यति ? अस्मज्जनकाविशेषः पुरोहित एव वा कथं नौ विना जीविष्यति ? परमेश्वर ! तथा विधेहि यथा जीवन्तं वृद्धं पुरोहितं सौवर्णीं साक्षात्कुर्वः"—

क्रन्दनैः=रोदनैः। "क्रन्दने रोदनाह्वाने" इत्यमरः। कदर्थयति=दूषयति, अस्मत्क्रोडमेवैकं क्रीडनकम्=खेलसाधनम्, "खिलौना" इति हिन्दी, यस्यास्ताम्। अस्मन्मुख चन्द्रस्य चकोरीम्, चकोरी यथा चन्द्रमसं निभालयति तथैव साऽस्मन्मुखम्। सुधास्यन्दनैः=अमृतप्रस्रवणैः, दाद-दादेति="तात तात" इति संस्कृतम्, तदपभ्रंशः। प्राकृते दाददादेति। अस्माकम्, जनकाविशेषः=पितृतुल्यः, नौ=आवाम्। "षष्ठीचतुर्थीद्वितीयास्थयोर्वा नावौ" इत्यनेन नावादेशः, "पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम्" इति समुच्चयाद् द्वितीया। सौवर्णीम्,

हालत होगी ? हाय ! वह लड़की बड़ी अभागी है। इसी उम्र में उसे माँ-बाप ने छोड़ दिया और हम दोनों को भी न पाकर, रो-रोकर वह गला फाड़ रही होगी। हाय ! हमारी गोद ही जिसका खिलौना थी, जो चकोरी की भाँति सदा हमारे मुख (चंद्र) की ओर ही देखा करती थी, जो हमारे गले की रत्नमाला है, जो सदैव हमारे साथ ही खाती थी, बचपन की सुधावर्षिणी तोतली और मधुर बोली में 'दादा ! दादा ! (तात ! तात !)' कह कर हमारा मन हरने वाली, क्षण भर भी हमें न देख पाने पर आँसुओं से गाल को गीला कर देने वाली उस सौवर्णी को वृद्ध पुरोहित सान्त्वना कैसे देंगे ? अथवा हमारे पिता के समान पुरोहित ही हम लोगों के अभाव में कैसे जी सकेंगे ? परमेश्वर ! ऐसा करो कि हम जीवित वृद्ध पुरोहित और सौवर्णी से मिल सकें।"

इति चिन्ता-चक्रमारूढ एव आत्मानं विस्मृत्य भित्तिकासंसक्त एव शनैरस्खलम्। प्राप्तसंज्ञश्च समपश्यं यत् श्यामसिंहो मन्दिर-पूजकाश्च मामुत्थापयन्ति—इति।

अथाऽऽवां तेन साधुना मन्दिरस्याऽन्तर्नीतौ महावीर-मूर्ति-समीपे चोपवेशितौ।

ततोऽवलोक्य तां वज्रेणेव निर्मिताम्, साकारामिव वीरताम्, गदामुद्यस्य दुष्ट-दल-दलनार्थमुच्छलन्तीमिव केशरि-किशोर-मूर्तिम्, न जाने कथं वा कुतो वा किमिति वा प्रातरन्धकार इव, वसन्ते हिम इव, बोधोदयेऽबोध इव ब्रह्मसाक्षात्कारे भ्रम इव च झटित्यपससार आवयोः शोकः। प्राकाशि च हृदये यद्—

चं विनाऽपि समुच्चयः, "गौरश्वः, पुरुषो हस्ती शकुनिर्मृगो ब्राह्मणः" इति माष्यादनुमीयते।

भित्तिकासंसक्त एव = कुड्यसंलग्न एव। शनैः=मन्दं, अस्खलम् = अपतम्। प्राप्तसज्ञः=प्राप्तचेतनः। "संज्ञा स्याच्चेतनानाम हस्ताद्यैश्चार्थसूचना" इत्यमरः।

वज्रेण=इन्द्रायुधेन। साकाराम्=शरीरधारिणीम्। केशरि-किशोरस्य=केशरितनयस्य मूर्तिम्, हनूमत्प्रतिमाम्। झटित्यपससार शोकः,

---

इस प्रकार चिन्ताग्रस्त होकर मैं अपने को भी भूल गया और दीवार से टिका हुआ लुढ़क गया। होश में आने पर मैंने देखा कि श्यामसिंह और मन्दिर के पुजारी मुझे उठा रहे हैं।

उसके बाद वह साधु हम दोनों को मन्दिर के अन्दर ले गया और हमें महावीर की मूर्ति के पास ही बिठा दिया।

तदनन्तर वज्र से बनी हुई-सी, साकार-वीरता-सी, गदा उठा कर दुष्टों के संहार के लिए उछल-सी रही हनुमान की उस मूर्ति को देखकर, न जाने कैसे, कहाँ से और किस प्रकार, प्रातःकाल के समय अन्धकार की तरह, वसन्त ऋतु में हिम की तरह, ज्ञान हो जाने पर अज्ञान की तरह और ब्रह्मसाक्षात्कार हो जाने पर भ्रम की तरह हमारा शोक दूर हो गया, और हमारे हृदय में इस प्रकार के भाव उठे कि—

"अलं बहुल-चिन्ताभिः ! कश्चन पुरुषार्थः स्वीक्रियताम्, न खलु बुद्धयतां यदावामेव दुरदृष्टवशात् त्यक्त-कुटुम्बौ वने पर्य्यटावः—इति, किन्तु कोशलेश्वरतनयौ राम-लक्ष्मणावपि चतुर्दश-वर्षाणि यावद् दण्डकारण्ये भ्रान्तवन्तौ ।" इति ।

ततः साधोश्चरणयोः प्रणम्य मयोक्तम्—"भगवन् ! नास्त्यविदितं किमपि भवादृशानां सदाचार-दृढव्रतिनाम् । तत् कथ्यतां किमावां करवाव ? कुतो गच्छाव ? कथमावयोः श्रेयः-सम्पत्तिः स्याद् ?" इति ।

ततो हनुमत्पूजकेन सर्वमस्मद्वृत्तान्तं पृष्ट्वा ज्ञात्वा च काष्ठ-पट्टिकायां घृतोन्मथित-सिन्दूरेण किमपि यन्त्रमिवोल्लिख्य, चन्दनैः सञ्चर्च्य,

---

इदमेव मूर्तिपूजारहस्यम् । हनुमद्दर्शनेन रामलक्ष्मणस्मरणं तयोश्च स्मरणेन तद्वनवासादीनाम् । प्राकाशि=स्फुरितम् ।

श्रेयःसम्पत्तिः=कल्याणावाप्तिः काष्ठपट्टिकायाम्=दारु-फलके । "काठ की पटरी" इति हिन्दी ।

घृतेन=सर्पिषा, उन्मथितम्=मेलितम्, सिन्दूरं तेन । "महावीरी" इति

'अब अधिक चिन्ता न करके कोई पुरुषार्थ स्वीकार करो । यह मत सोचो कि हम ही दुर्भाग्य वश घर-बार छोड़ कर जंगलों में भटक रहे हैं, दशरथ के पुत्र राम-लक्ष्मण भी चौदह वर्ष तक दण्डक वन में भटकते फिरे थे ।'

उसके बाद उस साधु के चरणों में प्रणाम कर मैंने कहा, 'भगवन् ! सदाचार व्रत का दृढ़ता से पालन करने वाले आप के-से महापुरुषों से कुछ भी छिपा नहीं है, अतः बताइये कि हम दोनों अब क्या करें ? कहाँ जायँ ? हमारा कल्याण कैसे होगा ?'

इसके बाद उस पुजारी ने हमारा सारा वृत्तान्त पूछ कर तथा जान कर, लकड़ी की पटरी पर घृतमिश्रित सिन्दूर (महावीरी) से एक यन्त्र-सा बना

कुसुमैराकीर्य, धूपेन धूपयित्वा, किमपि क्षणं ध्यात्वेव च मम हस्ते पूगीफलमेकं दत्त्वा, "वत्स ! अस्मिन् यन्त्रे कस्मिन्नपि कोष्ठे यथारुचि क्रमुकफलमिदं स्थापय" इत्यवाचि । तत एकतमे कोष्ठे निहित-क्रमुके मयि मुहूर्तम् अङ्गुलिपर्वसु किमपि गणयित्वेव स मामवादीत्—

"वत्स ! कदाऽपि मा स्म गमो गृहं प्रति, यतो मार्गे पर्वततटीषु अरण्यानीषु च बहवः काम्बोजीया यवन-दस्यवो भवतोर्ग्रहणाय विचरन्ति । दस्युभिः क्रियासमभिहारेण चङ्क्रम्यमाणं देशमवलोक्य भवद्ग्रामवासिनः सर्वेऽपि स्वं स्वमालयं परित्यज्य इतस्ततो गताः ।"

ततः 'सौवर्णि ! सौवर्णि ! पुरोहित ! पुरोहित !' इति सक्षोभं व्याहृतवतोरावयोः पुनः स साधुरवोचत्, यत्—

हिन्दी । प्रश्नप्रथेयम् । क्रमुकम्=पूगीफलम् । अङ्गुलिपर्वसु=हस्ताङ्गुलिग्रन्थिषु । अवाचि=उक्तम्, इत्यन्तं वाक्यं कर्म ।

मा स्म गमः=मा याहि । अरण्यानीषु=महारण्येषु ।

कर, चन्दन, पुष्प और धूप से उसकी पूजा कर, क्षण भर कुछ ध्यान-सा करके मेरे हाथ में एक सुपारी देकर कहा, 'वत्स ! इस सुपारी को अपनी इच्छानुसार इस यन्त्र के किसी कोष्ठ में रख दो।' इसके बाद मेरे एक कोष्ठ में सुपारी रख देने पर, क्षण भर ऊँगलियों के पोरों पर कुछ गिनता हुआ-सा वह मुझसे बोला—

'वत्स ! घर की ओर कदापि न जाना, क्योंकि रास्ते में पर्वतों की घाटियों और जङ्गलों में बहुत-से कम्बोज देश के यवन लुटेरे तुम्हें पकड़ने के लिए घूम रहे हैं। दस्युओं द्वारा स्वदेश पर निरन्तर आक्रमण होता देख तुम्हारे गाँव के सभी निवासी अपना-अपना घर छोड़कर इधर-उधर चले गये हैं।'

इसके बाद हम दोनों के क्षुब्ध होकर 'सौवर्णी ! सौवर्णी ! पुरोहित ! पुरोहित !' यह कह उठने पर वह साधु फिर बोला—

"पुरोहितोऽपि युष्मद्रत्नादिनिधिं क्वचन सङ्केतित-भूमि-कुहरे स्थापयित्वा, एकां धात्रीं दास-चतुष्टयमेकं चाऽश्वं सह नीत्वा महाराष्ट्र-पञ्चानन-परिपूरितां कोङ्कणभूमिं प्रति प्रस्थितः।"

तदाकलय्य "सत्यं सत्यमेवमेवम्" इति समस्तकान्दोलनं स्वीकृतवति पुरोहिते; 'ततस्ततः' इति मुखरीभूतेषु च कुटीरस्थ-सकल-जनेषु, भूयस्तदुक्तिं व्याजहार गौरसिंहो यद्—

"न शोचनीयं भवद्भ्यां किमपि तयोर्विषये, गन्तव्यं च तस्मिन्नेव शिववीराधिष्ठिते गिरि-गरिष्ठे कोङ्कणदेशे। कियत्समयानन्तरं तत्रैव भगिन्या पुरोहितेन च सह साक्षात्कारोऽपि भविष्यति—" इति प्रावोचत्।

सङ्केतितभूमेः कुहरे=विवरे। "कुहरं गह्वरं छिद्रे क्लीवं नागान्तरे पुमान्" इति कोषः। धात्रीम्=उपमातरम्। "धात्री स्यादुपमाताऽपि क्षितिरप्यामलक्यपि" इत्यमरः। महाराष्ट्रा एव पञ्चाननाः=सिंहाः, तैः परिपूरिताम्=भरिताम्।

तदुक्तिम्=हनूमत्पूजकोक्तिम्। अतिशयेन गुरुर्गरिष्ठः, गिरिभिर्गरिष्ठस्तस्मिन्।

"पुरोहित भी तुम्हारी रत्नादिक निधि को किसी संकेतित स्थान पर गाड़ कर, एक धाय, चार दास और एक घोड़ा साथ लेकर महाराष्ट्रकेसरी शिवाजी के कोंकण-प्रदेश की ओर चले गये हैं।"

यह सुनकर, पुरोहित के सिर हिलाकर 'सच है, ऐसा ही हैं' कह कर स्वीकार करने और कुटी के सभी लोगों के 'फिर क्या हुआ' यह पूछने पर गौरसिंह उस पुजारी के कथन को पुनः कहने लगे—

"आप दोनों को उन दोनों के विषय में कोई चिन्ता नहीं करनी चाहिये और शिवाजी से रक्षित पर्वतबहुल उसी कोंकणप्रदेश में चला जाना चाहिये। कुछ समय बाद अपनी बहिन और पुरोहित से तुम्हारा साक्षात्कार होगा, ऐसा उस पुजारी ने कहा।"

ततस्तु भ्रमर-झङ्कारेणेव "अहो! अहो! आश्चर्यमाश्चर्यम्, धन्यो मन्त्राणां प्रभावः, धन्यमिष्टबलम्, चित्रा धर्मनिष्ठा, अवितर्क्यं-स्तपःप्रतापः, विलक्षणा नैष्ठिकी वृत्तिः" इति मन्द्र-स्वर-मेदुरेण श्रोतृजन-वचन-कलापेन झङ्कृते तस्मिन् निकुञ्जे; "ततः कथं प्रचलितौ ? कथमत्राऽऽयातौ ? का घटना घटिता ? क उपायः कृतः ? किमाचरितम् ?" इति कुतूहल-परवशे विस्फारितनयने उद्ग्रीवे समनुकूलितकर्णे विस्मृतान्यकथे कृतावधाने च परिकरवर्गे श्यामसिंह-स्याऽङ्के दत्तदृष्टि सौवर्णीं तदङ्के संस्थाप्य, पातितोभयजानु समुपविश्य, राजत-राजिका इव कपोलयोरुत्तरोष्ठे च समुद्भूताः स्वेदकणिका

अहो! अहो!, "ओत्" इति प्रगृह्यसंज्ञा ततश्च प्रकृतिभावः। कुतूहल-परवशे=कौतुकाधीने, विस्फारितनयने=विकासितनेत्रे। शुश्रूषातिरेकादिदं सर्वम्। उद्ग्रीवे=उत्थितकण्ठे। समनुकूलितकर्णे=अभिमुखीकृतश्रोत्रे, विस्मृतान्यकथे=त्यक्तान्यप्रसङ्गे। पातितोभयजानु, क्रियाविशेषणम्। राजतराजिका इव=दौर्वर्णकृष्णिका इव, "राजिका कृष्णिकाऽऽसुरी" इत्यमरः।

तदनन्तर, भौंरों की गूंज के समान, 'अहो! अहो! आश्चर्य! महान् आश्चर्य! धन्य है मन्त्रों का प्रभाव और धन्य है इष्टदेव की शक्ति! धर्मनिष्ठा कितनी आश्चर्यजनक है! तप का प्रताप कितना अवितर्क्य है! ब्रह्मचर्य वृत्ति कितनी विलक्षण है।' श्रोताओं द्वारा मन्द स्वर में कहे गये इन वाक्यों से उस निकुञ्ज के गूँज उठने और फिर 'आप दोनों कैसे चले? यहाँ कैसे आये? कौन-सी घटना घटी? क्या उपाय किया? क्या किया?' यह जानने को उत्सुक होकर पास में बैठे सभी लोगों के आँखें फाड़ कर, गर्दन ऊँची करके, कान लगा कर, अन्य सारी बातें भूल कर सावधान हो जाने पर, श्यामसिंह की गोद की ओर देख रही सौवर्णी को उसकी गोद में बिठाकर, घुटनों के बल बैठकर, दोनों गालों और ओष्ठ के ऊपर की चाँदी की राइयों के समान

उत्तरीय - प्रान्तेन परिमृज्य पुनरात्म-वृत्तान्तं वक्तुं प्रारभत गौरसिंहो यद्—

"अथ भगवन्! श्रूयते सुदूरमस्मात् स्थानात् कोङ्कणदेशः, मध्ये च विकटा अटव्यः, शतशः शैल-श्रेणयः, त्वरितधारा धुन्यः, पदे पदे च भयानक-भल्लूकानामम्बूकृत-सङ्कुलानाम्, मुस्ता-मूलोत्खनन-घुर्घुरायित-घोर-घोणानां घोणिनाम्, पङ्क-परीवर्त्तोन्मथित-कासाराणां कासराणाम्, नरमांसं बुभुक्षूणां तरक्षूणाम्, विकट-करटि-कट-विपाटन-

---

त्वरिता=द्रुतगामिनी, धारा=प्रवाहो यासां ताः। धुन्यः=नद्यः। भयानकानाम्=भीतिजनकानाम्, भल्लूकानाम्=ऋक्षाणाम्। अम्बूकृतैः=निष्ठीवसहितशब्दैः, "अम्बूकृतं सनिष्ठीवम्" इत्यमरः, सङ्कुलानाम्=व्याप्तानाम्। सर्वथा साक्षात्कारसम्भव इत्यनेनाऽन्वयः। एवमितरषष्ठ्यन्तानामपि। मुस्तामूलोत्खनने= कुरुविन्दमूलोत्पाटने, घुर्घुरायिता= घुर-घुर-शब्दं कुर्वाणा, घोणा=नासा, येषां तेषाम्। "कुरुविन्दो मेघनामा मुस्ता मुस्तकमस्त्रियाम्" इत्यमरः, घोणिनाम्=शूकराणाम्। पङ्कपरीवर्त्तेन=कीचोल्ललनेन, उन्मथिताः=विलोडिताः, कासाराः=सरांसि, "कासारः सरसी सरः" इत्यमरः, यैस्तेषाम्। कासराणाम्=महिषाणाम्। "लुलायो महिषो वाहद्विषत्कासरसैरिभाः" इत्यमरः। नरमांसम्, बुभुक्षूणाम्=खादितुमिच्छूनाम्। "न लोकाव्ययलिष्ठाखलर्थतृनाम्" इति षष्ठीनिषेधः। तरक्षूणाम्, "स्यात्तर-

---

पसीने की बूंदों को उत्तरीय के छोर से पोंछ कर, गौरसिंह ने पुनः अपना वृत्तान्त कहना प्रारम्भ किया कि—

"भगवन्! सुनते हैं कोंकण देश यहाँ से बहुत दूर है, बीच-बीच में भयानक जंगल हैं, सैकड़ों पर्वत श्रेणियाँ हैं, तीव्र वेग से बहने वाली नदियाँ हैं और पद-पद पर थूकने के साथ शब्द करने वाले भयंकर भालुओं, मोथे की जड़ खोदने में अपनी भयंकर नाक से घुर्र-घुर्र शब्द करने वाले जंगली सूअरों, कीचड़ में लोट-पोट कर तालाब को गन्दा करने वाले बनैले भैंसों, नरमांस खाने के इच्छुक चीतों, भयंकर हाथियों के गण्डस्थलों

पाटव-पूरित-संहननानां सिंहानाम्, नासाग्र-विषाण-शाणन-च्छल-विहित-गण्डशैल-खण्डानां खड्गिनाम्, दोदुल्यमान-द्विरेफ-दल-पेपीयमान-दानधारा-धुरन्धराणां सिन्धुराणाम्, कृपा-कृपण-कृपाण-च्छिन्न-दीनाऽध्वनीन-गल-तल-गलत्पीन-धार-शोणित-बिन्दु-वृन्द-रञ्जित-वारबाण-सारसनोष्णीष-धारणा-कलिताऽखर्व-गर्व-बर्बराणां लुण्ठक-निकराणां च सर्वथा साक्षात्कार-सम्भवः। बालावावाम् अवि-

---

क्षुस्तु मृगादनः" इत्यमरः। "चीता" इति हिन्दी। विकटाः=उद्दामानः, करटिनः=हस्तिनः, तेषां कटः=गण्डः तस्य यत् विपाटनम्=विदारणम् तत्र यत् पाटवम्=कौशलम्, तेन पूरितं संहननम्=अङ्गं येषां तेषाम् नासाग्रे=घोणाग्रे, विद्यमानस्य विषाणस्य=शृङ्गस्य, शाणनच्छलेन=तेजनव्याजेन, विहिता गण्डशैलखण्डा यैस्तेषाम्। खड्गिनाम्=गण्डकानाम्। "गैंडा" इति हिन्दी। दोदुल्यमानानाम्=अतिशयेन पुनः पुनर्वा समुत्पतताम्, "दुल उत्क्षेपे" इत्यस्य रूपम्, द्विरेफाणां दलेन पेपीयमानया=पुनः पुनरास्वाद्यमानया, दानधारया=मदपक्तङ्क्या, धुरन्धराणाम्=अग्रेसराणाम्। सिन्धुराणाम्=गजानाम्। "इभो मतङ्गजो हस्ती सामजः सिन्धुरः कपिः" इति वैजयन्ती। कृपाकृपणैः=दयादरिद्रैः, कृपाणैः=असिभिः, छिन्नेभ्यः=कृत्तेभ्यः, गलतलविशेषणम्। दीनानाम् अध्वनीनाम्=पथिकानाम्, गलतलेभ्यः=कण्ठस्थानेभ्यः, गलत्पीनधारस्य=निपतत्स्थूलप्रवाहस्य शोणितस्य, बिन्दुवृन्देन=पृषत्समूहेन, रञ्चितानाम्, वारबाण-सारसनोष्णीषाणाम्=कञ्चुक-मेखला-शिरस्त्राणानाम्, धारणेन, आकलितः= आहितः, अखर्वः=विपुलः, गर्व=अहङ्कारः, यैस्ते च ते बर्बराः=

को विदीर्ण करने की कुशलता से पूर्ण शरीरवाले सिंहों, अपनी नाक पर की सींग को तीखी करने के वहाने पर्वतों के टुकड़े-टुकड़े कर डालने वाले गैंडों, वार-बार उड़नेवाले भ्रमर-समूह द्वारा पान की जाने वाली मदधारा वाले हाथियों और निर्दय तलवार से कटे दीन-हीन पथिकों के गले से वहने वाली मोटी धारा के रक्तविन्दुओं से रँगे कञ्चुक, मेखला और शिरस्त्राण धारण कर अत्यधिक अभिमान करने वाले बर्बर लुटेरों के समूहों का मिल जाना

ज्ञातोऽध्वा, भोग-समयो दुर्ग्रहाणाम्, अश्वावेव सहायौ, जन-पद-शून्यमेतत् प्रान्तरम्, तत् कथं गच्छेव ? कथं धैर्यं धारयेव ? कथं वा कोङ्कणदेशं प्राप्स्याव इति विश्वसेव ?" इति सचिन्तं विनिवेदितवति मयि, स साधुरावयोः पृष्ठे हस्तं विन्यस्य—

"हनूमान् सर्वं साधुयिष्यति, मा स्म चिन्ता-सन्तान-वितानै-रात्मानं दुःखाकुरुतम् । यथा सरलेनोपायेन कोङ्कणदेशं प्राप्स्यथ-स्तथा प्रभाते निर्देक्ष्यामि । साम्प्रतमित आगम्यताम्, पीयतामिद-मेला-गोस्तनी-केसर-शर्करा-सम्पर्क-सुधा-विस्पर्द्धि महिषी-दुग्धम्, दासा इमे पाद-संवाहनैस्तैल-सम्मर्दैर्व्यजन-चालनैश्च भवन्तौ विगतक्लमौ

कर्कशाः, तेषाम् दुर्ग्रहाणाम् दुष्टखेचराणाम् । विश्वसेव=विस्रम्भं कुर्याव ।

मास्मेत्यत्र न माङ्, अपितु निषेधार्थको मेति निपातः । अत एव न लुङ्, दुःखाकुरुतम्=दुःखिनं विधत्ताम् । "सुखप्रियादानुलोम्ये" इत्यत्रत्यवार्तिकात् "दुःखाच्चेति वक्तव्यम्" इति डाच् । एला=चन्द्रवाला, गोस्तनी=द्राक्षा, केसरम्=काश्मीरजम्, शर्करा=सिता, एतासां सम्पर्केण=सम्मेलनेन,

---

एकदम सम्भव है । हम दोनों अभी बच्चे ही हैं, रास्ता भी अनजाना है, बुरे ग्रहों के भोग का समय चल रहा है, हमारे सहायक केवल घोड़े ही हैं, इस ओर कोई बस्ती भी नहीं है, फिर हम कैसे जायँ ? कैसे धैर्य धारण करें ? कोंकण देश पहुँच ही जायँगे, यह विश्वास कैसे करें ?" मेरे इस प्रकार चिन्तापूर्वक निवेदन करने पर उस साधु ने हम दोनों की पीठ पर हाथ रख कर सान्त्वना देते हुए कहा—

"हनुमान जी सब पूरा करेंगे, चिन्ता करके अपने को दुःखी न बनाओ । जिस सरल उपाय से तुम कोंकण देश पहुँच सकोगे वह सवेरे बताऊँगा । इस समय इधर आओ । इलायची, दाख, केसर और शक्कर मिला हुआ, अमृत के समान भैंस का दूध पियो । ये दास पैर दबा कर, तेल मल कर और पंखा

विधास्यन्ति । न किमपि भयमधुना वां हनूमतश्चरणयोः शरणमायातयोः । सुखेन सुप्यताम् । असंशयमेव प्रातरेव हनूमत्पूजन-समये सर्वं कार्यं सेत्स्यति"—इति समाश्वासयत् ।

आवां च तन्निर्दिष्टेनैव सोपानेन अट्टालिकामारुह्य एकस्मिन् गृहे प्रविष्टौ, तत्र च राजकुमार-योग्यां पर्यङ्कादि-सामग्रीमवलोक्य नितान्त-चकितौ प्रसन्नौ च अभूव । अथ भूयस्तत्प्रदत्तं मोदकादि किञ्चिद् भुक्त्वा, पयः पीत्वा, ताम्बूलं चर्वयन्तौ, दासैः पादयोः पीड्यमानौ, व्यजनैर्वीज्यमानौ, स्वभाग्योदय-सोपानं साधोः साधुतां मनस्येव प्रशंसमानावेव चाऽशयिष्वहि । अयं चिरकालानन्तरमावा-

---

सुधाविस्पर्धि=अमृततुल्यम्, प्रतियोगिताकारि, सदृशमिति यावत् । समाश्वासयत्=धैर्यमापादयत् ।

स्वभाग्योदयस्य=स्वदिष्टप्रादुर्भावस्य, सोपानम्=अधिरोहिणी । "आरोहणं स्यात् सोपानम्" इत्यमरः । "सीढी" इति हिन्दी । नित्यक्लीवम् । अत एव नित्यस्त्रीलिङ्ग-साधुताशब्दविशेषणत्वेऽपि न तल्लिङ्गता । अशयिष्वहि=अस्वाप्स्व ।

झल कर तुम्हारी थकान दूर कर देंगे । हनुमान् की शरण में आये हुए तुम दोनों को अब कोई भय नहीं है । सुखपूर्वक सोओ । प्रातःकाल होते ही हनुमत्पूजन के समय तुम्हारा सारा कार्य निश्चय ही सिद्ध हो जायगा ।"

हम दोनों उसी साधु द्वारा निर्दिष्ट सीढ़ियों से अट्टालिका पर चढ़ कर एक घर में प्रविष्ट हुए और वहाँ राजकुमारों के योग्य पलंग आदि सामग्री देख कर अत्यधिक चकित और प्रसन्न हुए । उसके बाद पुजारी जी के ही द्वारा दिये गये लड्डू आदि खा कर और दूध पीकर पान खाया । दास पैर दबाने और पंखा झलने लगे, और हम अपने भाग्योदय की सीढ़ी तथा उस पुजारी की सज्जनता की मन-ही-मन प्रशंसा करते हुए सो गये । हम दोनों को बहुत दिनों के बाद

भ्यां निःशङ्क-शयन-समयो लब्धः, इत्येकयैवाऽऽनन्दमय्या वितर्क-विचारादि-सम्पर्क-शून्यया असम्प्रज्ञात-समाधि-सोदरयेव निद्रया समस्तां रजनीमजीगमाव।

ततः केनापि धमद्धमद्ध्वनिनेव बोधितौ, दक्षतो वामतश्च

आनन्दमय्या=आनन्दसंवलितया। गाढनिद्रायामानन्दानुभवाभावेऽपि समुत्थितौ "सुखमहस्वाप्सम्" इति समुल्लेखेन वृत्त्यन्तरशून्यायामेव तस्यामानन्दमयत्वं कल्प्यते। असम्प्रज्ञातयोगस्य तु भूमानन्दमयता स्पष्टा योगशास्त्रे। वितर्कः=विविध ऊहः, विचारः=कर्त्तव्याकर्त्तव्यत्वविवेकः, आदिना=कामादिः, तेषां सम्पर्केण=संसर्गेण, शून्यया=विरहितया। निद्रयेति विशेष्यम्। उत्प्रेक्षते—असम्प्रज्ञातसमाधिसोदरयेव। "वितर्कविचारानन्दास्मितानुगमात् सम्प्रज्ञातः" इति योगसूत्रानुसारेण वितर्कादिचतुष्टयविशिष्टः सम्प्रज्ञातः, इतरथा तु "विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः" इति सूत्रानुसारेणासम्प्रज्ञात इत्यसम्प्रज्ञाते वितर्कादिसम्पर्कशून्यता। सूत्रे वितर्कादीनां प्रत्येकमनुगमेऽन्वयः। तथा च सवितर्क-सविचार-सानन्द-सास्मिताभिधभेदचतुष्टयसहितः, सम्प्रज्ञायते=सम्यग् ज्ञायते यस्मिन् स इति विग्रहार्थकः सम्प्रज्ञातः। विरामप्रत्ययस्य=वृत्युपरमकारणकस्य, अभ्यासः पौनःपुन्येन सम्पादनम्, तत्पूर्वः=तत्कारणकः संस्कारमात्रावशिष्टोऽसम्प्रज्ञात इति द्वितीयसूत्रार्थः। तदुक्तम्—

मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः।
असम्प्रज्ञातनामाऽसौ समाधिरभिधीयते ॥ इति ॥

रजनीम्=रात्रिम्, अजीगमाव= अयापयाव।

निश्चिन्त होकर सोने का अवसर मिला था, अतः हमने वितर्क-विचार आदि के सम्पर्क से रहित, आनन्दमयी असम्प्रज्ञात समाधि के समान एक ही नींद में रात बिता दी।

उसके बाद किसी के धम-धम आवाज करने से जग कर, दायें-बायें करवट

परिवृत्य, चक्षुषी परिमृज्य, साङ्गुलि-ग्रथन-हस्त-प्रसारण सस्नायु-पीडनं च विजृम्भ्य, भूमिं प्रणम्य, पर्यङ्कादुत्तीर्य, कोष्ठाद् बहिरागत्य, साञ्जलि मारुति-ध्वजमवलोक्य, करतले निरीक्ष्य, भित्तिकावलम्बित-मुकुरेष्वात्मानं साक्षात्कृत्य, भगवन्नामानि जपन्तौ, कांश्चित् प्रातःस्मरण-श्लोकांश्च रटन्तौ, परस्परं "सुखमावामस्वाप्स्व, प्रसन्नं नौ चेतः" इति शनैरालपन्तौ च, तस्मिन्नेव मन्दिरस्योर्ध्वे खण्डे शतपदीमकरवाव । तावदश्रूयत स एव बहुलीभूतो ध्वनिः । ततो

परिवृत्य=परिवर्त्तनं कृत्वा । स्वभावोक्तिः । साङ्गुलिग्रथनहस्तप्रसारणम्, करयोरङ्गुलीः परस्परं संयोज्य हस्तौ प्रसारयन्ति त्यक्तनिद्रा जना इति स्वभावः । विजृम्भ्य='जँभाई लेकर' इति भाषायाम् ।

भूमिं प्रणम्य,

समुद्रवसने ! चोर्वि ! पर्वतस्तनमण्डले ! ।
विष्णुपत्नि ! नमस्तुभ्यं पादस्पर्शं क्षमस्व मे ॥

इति नैत्यिकविधानम् । भूमेर्मातृत्वकल्पनायां प्रातरेव स्मारितायां तद्दुःखव्रातवारणायोत्सुका भवेयुर्लोका इति तत्प्रचारकाणां सुमनीषा । कोष्ठम्='कोठरी' इति हिन्दी । करतले निरीक्ष्य, प्रभाते करतलदर्शनं श्रेयस्करमिति धर्मशास्त्रानुशासनम् । शतं पदानि शतपदी=कतिचित्पद भ्रमणम् । "भुक्त्वा शतपदं

लेकर, आँखें मलकर, अँगुलियों को गूँथ कर, हाथों को फैलाते हुए तथा स्नायुओं को तानते हुए जँभाई लेकर, भूमि को प्रणाम कर, पलँग से उतर कर, कमरे से बाहर आकर, हाथ जोड़ कर, हनुमानजी के झंडे का दर्शन कर, हथेलियाँ देखकर, दीवारों में लगे शीशों में अपना प्रतिबिम्ब देखकर, भगवान् के नाम का जप करते हुए, प्रातःस्मरण के कुछ श्लोकों को दुहराते हुए और एक-दूसरे से 'हम सुख से सोये, चित्त प्रसन्न है' इस प्रकार बातचीत करते हुए हम मन्दिर के ऊपर वाले खण्ड में ही टहलने लगे। तब तक वही आवाज जोरों से सुनाई पड़ने लगी । मैंने

गवाक्षतो निकुब्जीभय दृष्टं यत् पञ्चषाः साधवो वस्त्र-वेष्टित-मस्तकाः समीप-स्थापित-जलपूर्ण-पात्राः पाषाण-खण्डैर्दन्तधावन-मुखं मृदू-करणाय कुट्टन्ति। अवलोकितं च यदस्मिन्नपि समये शर्वरी-तमांसि नाऽम्बरं साकल्येन जहति। स्वच्छाऽपि प्राची नाऽधुनाऽप्यरुणि-मानमङ्गीकरोति। विराव-बहुलान्यपि वयांसि न सम्प्रत्यपि विहाय नीडाधिष्ठान- कुटानुड्डीयन्ते। गिरि-ग्रामटिका—गृहेभ्यो व्यावर्तमाना अपि विटपिनो न स्वफल-पुष्प-पत्राऽऽकार-परिचय-प्रदानैर्जातीः प्रकटयन्ति। उत्तरोत्तरतस्तार-तार-तरैः रुतैः रतार्त्तिमीरयन्त्यपि तरुण-

---

गच्छेत्" इत्यत्रापि तदेव तात्पर्यम्। पञ्च वा षड् वा पञ्चषाः, "सङ्ख्ययासन्ना-दूराधिकसङ्ख्याः सङ्ख्येये" इति बहुव्रीहिः। "बहुव्रीहौ सङ्ख्येये डजबहुगडात्" इति समासान्तोऽच्।

शर्वरीतमांसि = रात्र्यन्धकाराः। अम्बरम् = नभः कर्म, जहति = त्यजन्ति। अरुणिमानम् = लौहित्यम्। नीडस्य = कुलायस्य, अधिष्ठा-नानि = निवासभूमितां गतानि च ते कुटाः = वृक्षाः तान्। "अनोकहः कुटः शालः" इत्यमरः। व्यावर्त्तमानाः = भिन्नत्वेन प्रतीयमानाः। जातेर्व्यावर्त्तकत्वं स्वभावः। सम्यक् प्रकाशाभावात्। उत्तरोत्तरतः = अधिकाधिकम्। तारतारतरैः = अत्युच्चैः। रुतैः = आरावैः। रतार्त्तिम् = कामपीडाम्। ईरयन्ती = कथयन्ती,

---

झुककर झरोखों से देखा कि सिर में कपड़ा लपेटे और पास में पानी से भरा घड़ा रखे, पाँच-छः साधु, दातून के अग्रभाग (मुख) को मुलायम बनाने के लिए पत्थर के टुकड़ों से कूट रहे हैं। हमने देखा कि अभी रात के अँधेरे ने आकाश को पूरी तरह नहीं छोड़ा है। पूर्वदिशा स्वच्छ होती हुई भी अभी लाल नहीं हुई है, पक्षी कलरव तो बहुत कर रहे हैं, पर अभी अपने घोसलों वाले वृक्षों को छोड़कर उड़ नहीं रहे हैं, वृक्ष पहाड़ियों, गाँवों और घरों से भिन्न तो दिखाई देने लगे हैं, पर अभी अपने फल-फूल और पत्तों के आकार के परिचय से अपनी

तित्तिरी न तरोरवतरति। आलोकाऽऽलोक-कृत-किञ्चिच्छोकमोकोऽपि च कोको न वराकीं कोकीमुपसर्पति।

अथेदृशीमेव मनोहारिणीं शोभामवलोकयन्तौ कम्पित-कुन्द-कलापस्य, उन्मीलन्मालती-मुकुल-मकरन्द-चौरस्य पाटलि-पटल-पराग-पुञ्ज-पिञ्जरितस्य शनैः शनैः फरफरायमाण-शुक-पिकादि-पतगोन्मथ्यमानस्य पलाशि-पलाशाग्र-विलुलत्तुषार-कणिकापहरण-शीतलस्य

तरुणतित्तिरी = युवक-तित्तिरि-वधूः। स्वभावोक्तिः, अनुप्रासः। आलोकस्य = प्रकाशस्य, आलोकेन = विलोकनेन, कृतः = उत्पन्नः, कस्यचित् शोकस्य मोको यस्य सः। कोकः = चक्रवाकः, वराकीम् = दुःखिनीम्। 'वेचारी' इति हिन्दी।

अथ समीरस्य स्पर्शसुखमनुभवन्तौ पर्यटन्तौ मुहूर्त्तमयापयावेति सम्बन्धः। समीरं विशिनष्टि—कम्पितः = दोलितः, कुन्दकलापः = माध्यसमूहो येन तस्य। उन्मीलन्तीनाम् = विकाशमियागच्छन्तीनाम्, मालतीनाम् = जातीनाम्, मुकुलानाम् = कलिकानाम्, मकरन्दस्य = पुष्परसस्य, चौरस्य = अपहर्तुः। पाटलिः = "गुलाब" इति ख्यातः, तत्पटलस्य = तत्समूहस्य, परागपुञ्जेन = धूलिव्रजेन, पिञ्जरितस्य = पीतवर्णस्य। फरफरायमाणानाम् = पक्षास्फोटनं कुर्वताम्, शुकपिकादीनां पतत्रैः = पक्षैः, उन्मथ्यमानस्य = विलोडयमानस्य। वृद्धिं गमितस्येति यावत्। पलाशिपलाशाग्रेषु = वृक्षपत्राग्रेषु, विलुलताम् =

जाति नहीं प्रकट कर रहे हैं, तरुण तित्तिरी उत्तरोत्तर उच्च और अधिक उच्च स्वर से बोल कर अपनी काम-पीड़ा का प्रकाशन तो कर रही है, पर अभी पेड़ से नहीं उतर रही है, और चकवा पक्षी ने प्रकाश देखकर कुछ शोक तो कम कर दिया है, फिर भी अभी वेचारी चकवी के पास नहीं जा रहा है।

तत्पश्चात्, इसी प्रकार की मनोहर शोभा देखते हुए, कुन्द पुष्पों को कँपा देने वाले, खिल रही मालती की कलियों के मकरन्द को चुराने वाले, गुलावों के पराग से पीले हो गए, धीरे-धीरे पंख फड़फड़ा रहे शुक-पिक आदि पक्षियों से उन्मथित किये गये, और वृक्ष के पत्तों के अग्रभाग पर हिलती हुई

समीरस्य, स्पर्शसुखमनुभवन्तौ, तत्रैव पूर्वस्या अट्टालिकाया दक्षिणस्याम्, दक्षिणस्याश्च पश्चिमायाम्, पश्चिमाया अप्युत्तरस्याम्, ततश्च पुनः पूर्वस्यामिति पौनःपुन्येन पर्य्यटन्तौ मुहूर्त्तमयापयाव ।

तस्मिन्नेव समये एकेन ब्रह्मचारिबटुनाऽऽगत्य निवेदितं, यत् "सपदि प्रभात-क्रिया निर्वहणीयेत्याऽऽदिशति तत्रभवान् साधु-शिरोमणिः" तदाकर्ण्यं, बाढमित्यङ्गीकृत्य, षष्टिसहस्र-वालखिल्य-कषाय-वसन-विधूतायामिव, मन्देह-देह-शोणित-शोणितायामिव, अरुणा-

---

विलुठताम्, तुषाराणाम् = अवश्यायानाम्, कणिकानाम् = विन्दूनाम्, अपहरणेन, शीतलस्य । अयापयाव = अगमयाव ।

प्राभातकालिकीं प्राचीं विशिनष्टि—षष्टिसहस्रस्य = तादृशसङ्ख्यापरिमितानाम्, वालखिल्यानाम् = तदाख्यऋषिविशेषाणाम्, कषायैः = कषाय-राग-रक्तैः, वसनैः = वस्त्रैः, विधूतायामिव = उत्कम्पितायामिवेत्युत्प्रेक्षा । मन्देहानाम् = राक्षसविशेषाणाम्, देहस्य, शोणितेन, शोणितायामिव = रक्तीकृतायामिव । स्वाभाविकं शोणत्वं मन्देह-देह-शोणित-सम्पर्कजातत्वेनोत्प्रेक्षितम् । सायंकाले प्रत्यहं मरणं शरीराणामक्षयत्वं चेति विधिशापयन्त्रिता मन्देहाभिधा राक्षसाः सूर्यं खादितुमिच्छन्ति, तैश्च सङ्ग्रामं करोति भास्करः, ब्राह्मणैः तत्काल-क्षिप्तानि च गायत्र्यभिमन्त्रितानि वारीणि वज्रीभूतानि तान् घ्नन्तीत्यर्थवादः

ओस की बूंदों को ग्रहण कर शीतल हुए समीर के स्पर्श के सुख का अनुभव करते हुए हम दोनों ने वहीं उस अट्टालिका के पूर्व से दक्षिण, दक्षिण से पश्चिम, पश्चिम से उत्तर और उत्तर से पुनः पूर्व की ओर बार-बार टहलते हुए थोड़ा समय बिताया ।

इसी समय एक ब्रह्मचारी बालक ने आकर कहा कि 'पूज्य साधुशिरोमणि की आज्ञा है कि आप प्रातःकृत्य से शीघ्र ही निवृत्त हो जायें ।' यह सुनकर 'बहुत अच्छा' कहकर उसे स्वीकार कर साठ हजार वालखिल्यों के कषाय वस्त्रों से उत्कम्पित-सी मन्देह राक्षसों के शरीर के रक्त से रक्त हुई-सी अरुण

ऽरुणिम-रञ्जितायामिव, मोमुद्यमान-नरीनृत्यमान-परस्कोटि-ताम्रचूड-चूडा-प्रतिविम्ब-संवलितायामिव, पोस्फुटयमान-स्वर्गङ्गा-कोकनद-पटल-व्याप्तायामिव, भक्तजन-भक्ति-प्रभाव-भाविताऽऽविर्भाव-च्छिन्न-मस्ता-कन्धरोच्छल-च्छोणित-स्नातायामिव, वसन्तोत्सवोच्छालित-सिन्दूरान्धकारान्धीकृतायामिव, तातप्यमान-ताम्रद्युति - चौरायां

सूर्योद्देश्यकजलदानस्य ब्राह्मणग्रन्थेषु पुराणेषु च दृश्यते । एतदीयं वास्तविकत्वं पुराणमतदीपिकायां समवलोकनीयम् । अरुणस्य = सूर्यसारथेः, "सूरसूतोऽरुणो-नूरुः" इत्यमरः । अरुणिम्ना = लौहित्येन, रञ्जितायाम् । मोमुद्यमाना-नाम् = परमं हर्षमधिगच्छताम्, अत एव नरीनृत्यमानानाम् = अतिशयेन पुनः पुनर्वा नृत्यताम्, परस्कोटीनाम् = कोटयधिकानाम्, ताम्रचूडानाम् क = कुक्कुटानाम्, चूडानाम् = शिखानाम्, प्रतिविम्वेन, संवलितायाम् = प्रावृता-याम् । पोस्फुटयमानानाम् = अत्यन्तं विकासमधिगच्छताम्, स्वर्गङ्गायाः = सुरदीर्घिकायाः, कोकनदानाम् = रक्तोत्पलानाम्, पटलेन व्याप्तायाम् = छन्नायाम्, भक्तजनानाम् = भागवतानाम्, भक्तेः = सेवायाः, प्रभावेण = सामर्थ्येन, भावितः = सम्पादितः, आविर्भावः = प्रकटीभवनम् यथा सा चासौ छिन्नमस्ता = तन्नाम्ना तन्त्रेषु प्रसिद्धा महाविद्यान्यतमा, तस्याः कन्ध-रायाः = ग्रीवायाः, उच्छलता = उद्गच्छता, शोणितेन स्नातायामिव । वसन्तोत्सवे = होलोत्सवे, उच्छालितेन = उत्फालितेन, सिन्दूराणाम् अन्धकारेण = तिमिरेण अन्धीकृतायामिव । तातप्यमानस्य = सुतप्तस्य,

---

की अरुणिमा से रञ्जित-सी, प्रसन्न होकर नाच रहे हज़ारों मुर्गों की कलँगी के प्रतिविम्वों से आवृत-सी, आकाशगंगा के खिलते हुए लाल कमलों से आच्छादित-सी, भक्तों की भक्ति के प्रभाव से प्रकट हुई छिन्नमस्ता की ग्रीवा से निकल रहे रक्त से नहाई हुई-सी और वसन्तोत्सव में उड़ाये गये (गुलाव और) सिन्दूर के अन्धकार से अन्धी-सी, तपे हुए ताँवे की शोभा का

प्राच्याम्, तत्प्रभया शोण-शोणैः सोपानैरवतीर्य, मारुतिमन्दिरद्वारि मस्तक-मवनमय्य, झटित्येव स्नान-पूर्वाः क्रियाः समाप्य, तेनैव ब्रह्मचारिबटुना निर्दिश्यमान–मार्गौ, पूर्वाऽवलोकित–वेशन्तादारादेव पश्चिमतः किञ्चिदमृतोदं नाम महासरः समासादितवन्तौ।

तत्र वरटाभिरनुगम्यमानानां राजहंसानाम्, पक्षति-कण्डूति-कषण-चञ्चल-चञ्चुपुटानां मल्लिकाक्षाणाम्, लक्ष्मणा-कण्ठ-स्पर्श-हर्ष-वर्ष-प्रफुल्लाऽङ्गरुहाणां सारसानाम्, भ्रमद्भ्रमर-झङ्कार-भार-विद्रावित-

---

ताम्रस्य द्युतेः = शोभायाः, चौरायाम् = अपहारिकायाम्। पूर्वम् = प्राक्। अवलोकितात्, वेशन्तात् = अल्पसरसः। "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते" इति आराच्छब्दयोगे पञ्चमी।

वरटाभिः = हंसीभिः। "हंसस्य योषिद् वरटा" इत्यमरः। राजहंसानाम्, "राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः। मलिनैर्मल्लिकाक्षास्ते" इत्यमरः। पक्षस्य मूलं पक्षतिः, 'पक्षात्तिः' तत्र या कण्डूतिः = खर्जूः, तया कर्तृभूतया कषणम् = घर्षणम्, तेन चञ्चलाः = चपलाः, चञ्चुपुटा येषां तेषाम्। मल्लिकाक्षाणाम् = मलिनचञ्चुचरणहंसानाम्। उपरिष्टादमरः। लक्ष्मणायाः = सारसयोषितः, "सारसस्य तु लक्ष्मणा" इत्यमरः, कण्ठस्पर्शेन यद् हर्षवर्षम् = आनन्दवृष्टिः, तेन प्रफुल्लानि = विकसितानि, अङ्गरुहाणि = लोमानि येषां तेषाम्। भ्रमताम् = सञ्चरताम्, भ्रमराणाम्, झङ्कारभारेण =

अपहरण करनेवाली (ताँबे के समान लाल कान्ति वाली) प्राची दिशा की प्रभा से लाल हो रही सीढ़ियों से उतर कर हनुमानजी के मन्दिर के मुख्य द्वार पर सिर झुका कर प्रणाम करके हम दोनों ने स्नान आदि नित्य कर्म समाप्त कर लिया। उस ब्रह्मचारी बालक द्वारा निर्दिष्ट मार्ग से चलकर हम लोग पहले देखे हुए उस छोटे-से तालाब के पश्चिम में थोड़ी ही दूर पर स्थित अमृतोद नाम के बहुत बड़े तालाब पर पहुँचे।

वहाँ राजहंसियों के द्वारा अनुगम्यमान राजहंसों, पंखों के मूल की खुजली शान्त करने के लिये अपनी मलिन और चञ्चल चोंचों से उन्हें कुरेद रहे हंसों, सारसियों के कण्ठस्पर्श के आनन्द से खिले रोम वाले सारसों और

निद्राणां कारण्डवानां च तास्ताः शोभाः पश्यन्तौ, तडागतट एव पम्फुल्यमानानां मकरन्दतुन्दिलानामिन्दीवराणां समीपत एव मसृण-पाषाण-पट्टिकासु कुशासनानि मृगचर्मासनानि ऊर्णासनानि च विस्तीर्योपविष्टानाम्, गायत्री-जप-पराधीन-दशनवसनानाम्, कलित-ललित-तिलकालकानाम्, दर्भाङ्गुलीयकालङ्कृताङ्गुलीनां मूर्तिमतामिव ब्रह्मतेजसाम्, साकाराणामिव तपसाम्, धृतावताराणामिव च ब्रह्मचर्य्याणां मुनीनां दर्शनं कुर्वन्तौ, कृतनित्यक्रियं परिपुष्ट-तुलसी-मालिकाऽङ्कित-कण्ठं सिन्दूरोर्ध्वपुण्ड्रमण्डित-ललाटं रामचरण-

समधिकझङ्कारशब्देन, विद्राविता = उत्सारिता, निद्रा येषां तेषाम्। पम्फुल्यमानानाम् = विशरारूणाम्। विशरणार्थकाद् ञि-फलाधातोर्यङन्तात् शानच्। तुन्दमस्त्येषामिति तुन्दिलाः, 'तुन्दादिभ्य इलच्च'। मकरन्देन = पुष्परसेन, तुन्दिलानाम् = पिचण्डिलानाम्, भरितानामिति यावत्। मसृणपाषाणपट्टिकासु = चिक्कणप्रस्तरपट्टिकासु। गायत्रीजपपराधीने दशनवसने = ओष्ठौ येषां तेषाम्। कलिताः = धारिताः, ललिताः = शोभनाः, तिलकालकाः = तिलकाः, यैस्तेषाम्। "तिलकस्तिलकालकः" इत्यमरः। दर्भाङ्गुलीयकैः = कुशनिर्मिताङ्गुलिधारणीयैः, पवित्रैरिति यावत्, अलङ्कृताः = भूषिताः, अङ्गुल्यो येषां तेषाम्। मन्दिराध्यक्षं विशिनष्टि—कृतनित्यक्रियमित्यादि।

उड़ रहे भौंरों की गूंज से दूर हो गई निद्रा वाले कारण्डवों की उन-उन शोभाओं को देखते हुए, तालाब के किनारे ही, मकरंद से भरे खिले कमलों के पास ही चिकनी प्रस्तरशिलाओं पर कुशासन, मृगचर्मासन और ऊर्णासन बिछा कर बैठे हुए, गायत्री-जप में लगे होठों वाले, सुन्दर तिलक लगाये हुए, कुश की पवित्री से सुशोभित उंगलियों वाले, मूर्तिमान् ब्रह्मतेज, साकार तपस्या और अवतार धारण करके आये ब्रह्मचर्य के समान मुनियों के दर्शन करते हुए हम दोनों ने, नित्यक्रिया से निवृत्त हो गये, गले में बड़े मनकों की तुलसी माला धारण किये, ललाट पर सिन्दूर का ऊर्ध्व पुण्ड्र लगाये तथा

चिह्नमुद्रा-मुद्रित-बाहुदण्ड-वक्षस्थलं हनूमन्मन्दिराध्यक्षं प्रणतवन्तौ।

तेन चाऽऽज्ञप्तम्—"यद्यायुष्मन्तौ सपदि महाराष्ट्रदेशं जिगमिषथश्चेदचिरेणैव मस्तके सम्मृद्य एतद् राम-रजः तडागे निमज्जतम्" इत्यवधार्य्य आवां तथैव व्यधिष्वहि।

तदाज्ञया वस्त्राणि परिधाय च तत्समीपे समुपविश्य, तेन च समन्त्र-जपं कुश-जलेनाऽभ्युक्षितौ हनुमदङ्ग-रञ्जित-सिन्दूरेण विहित-तिलकौ स्वकीयौ सैन्धवौ समारुक्ष्व। ततः पञ्चषान् व्यूढ-वयस्कान् जटिलान् सुपरिणाहान् वाहानारूढान् आवाभ्यां सह गन्तुमाज्ञाप्य मन्दिराध्यक्षोऽभाषिष्ट—

"कुमारौ! इतः पुण्यनगर-पर्य्यन्तं प्रतिगव्यूत्यन्तरालं महाव्रता-

---

रामचरणचिह्नमेव, मुद्रा=मुद्रणसाधनम्, तया मुद्रितम्=अङ्कितम्, बाहुदण्डवक्षःस्थलं प्राण्यङ्गत्वादेकवद्भावो द्वन्द्वे, यस्य तम्।

सामरुक्ष्व = आरूढौ। व्यूढम् = पृथुलम्, वयो येषां तान् युवकानित्यर्थः। सुष्ठु परिणाहः = विशालता येषां तान्, वाहान् = अश्वान्।

श्रीरामचन्द्र के चरणों के चिह्नों से अङ्कित बाहुदण्ड और वक्षःस्थल वाले हनुमान मन्दिर के अध्यक्ष को प्रणाम किया।

उन्होंने आज्ञा दी कि, 'यदि तुम दोनों अभी महाराष्ट्र देश को जाना चाहते हो, तो शीघ्र ही इस रामरज को मस्तक में लगा कर, तालाब के जल में प्रवेश करो।' यह सुनकर हम दोनों ने वैसा ही किया।

उनकी आज्ञा से वस्त्र पहिन कर हम उनके पास बैठ गये। उन्होंने मन्त्र पढ़ कर, कुश से हमारे ऊपर जल छिड़का और महावीर की मूर्ति के अंग में लगे सिन्दूर का तिलक लगाकर हम दोनों अपने घोड़ों पर सवार हो गए। फिर, जटाधारी और विशाल शरीर वाले पाँच-छः वयस्क घुड़सवारों को हम दोनों के साथ जाने की आज्ञा देकर मन्दिराध्यक्ष ने कहा—

"कुमारो! यहाँ से पूना नगर तक, प्रत्येक दो कोस के अन्तर पर, महाव्रत

ऽऽश्रम-परम्पराः सन्ति । सर्वत्र कुटीरेषु संन्यासिनो भक्ता विरक्ताश्च निवसन्ति । कियद्दूरपर्यन्तं पञ्चषाः सहाया युवयोः सहचरा भविष्यन्ति, परस्ताच्छिथिलिते लुण्ठक-भये एकेनैव केनचिदश्वारोहेण प्रदर्शित-मार्गौ सुखेन यथाभिलषितं देशं यास्यथः । सहायक-परिवर्त्तनं स्थाने स्थाने स्वयमेव भविष्यति, न तत्र युवयोः कयाऽपि विचिकित्सया भाव्यम् । श्रान्तैः श्रान्तैराश्रमेषु विश्रमणीयम्, निदिद्रासद्भिः कुटीरेष्वेव निद्रा द्राघणीया, विलेपनाऽभ्यङ्गस्नान-पानाऽशन-संवाहनादि-सौकर्यं सर्वत्र सहायकाः साधयिष्यन्ति"—इति ।

ततस्तं प्रणम्य तथैव ससहायौ आवां प्रचलितौ । सहचरनिर्दि-

विचिकित्सया = संशयेन । "विचिकित्सा तु संशयः" इत्यमरः । निदिद्रासद्भिः = निद्रातुमिच्छद्भिः । द्राघणीया = दीर्घयितव्या । यापनीयेति यावत् । विलेपनम् = चन्दनकस्तूरिकादिचर्च्चनम्, अभ्यङ्गः = उद्वर्त्तनम्, पिष्टसर्षपादिना, स्नानम् = निर्णेजनम्, पानम्, दुग्धादेः, अशनम्, = भोजनम्, संवाहनम् = चरणमर्दनम्, एवमादीनां सौकर्यम् = सौलभ्यम् ।

आश्रम हैं । सभी जगह कुटियों में संन्यासी, भक्त और विरक्त निवास करते हैं । कुछ दूर तक पाँच-छः सहायक तुम्हारे साथ रहेंगे, फिर लुटेरों का भय कम हो जाने पर, तुम दोनों किसी एक ही अश्वारोही के पथप्रदर्शन से सुखपूर्वक अभीष्ट स्थान पर पहुँच जाओगे । स्थान-स्थान पर सहायक का परिवर्तन स्वयं ही हो जायगा, इसमें तुम दोनों किसी प्रकार की शंका मत करना । थक जाने पर आश्रमों में विश्राम कर लेना और सोने की इच्छा होने पर कुटीरों में ही सोना । तुम्हारे चन्दन, कस्तूरी और उबटन लगाने, नहलाने तथा पैर दबाने आदि का काम और खाने-पीने आदि की व्यवस्था सभी स्थानों पर सहायक कर देंगे ।"

तदनन्तर, उन्हें प्रणाम कर, वैसे ही सहायकों के साथ हम दोनों चल दिये ।

टैनैव सर्वैरविज्ञेयेन वन्य-द्रुम-जाल-रुद्धेन गण्डशैल-परिक्रमणा-ऽधित्यकाऽधिरोहणोपत्यका-परिलङ्घन-तटिनी-तरणाद्यायास-दीक्षा-क्षेण पथा प्रचलन्तौ मध्ये मध्ये कुटीरेषु विरमन्तौ तत्र तत्र सुस्वादु-भोजनैः सकल-समुचित-सामग्री-साहाय्यैः सुखेन विश्रान्ति-सुखमनु-भवन्तौ तत्र तत्र परिवर्तितसहायकौ दिनकतिपयैरेकस्या नद्यास्तट-मयासिष्व। तत्रैकस्य चिञ्चा-वृक्षस्य स्कन्धे प्रलम्ब-रज्ज्वा निजाऽऽजा-नेयावाबध्य निकटस्थ-यूप-तरु-शाखायां च वस्त्रादीनि संलम्बय्य स्नातुं जलमवागाहिष्वहि। अस्मत्सहचरश्च निजाश्वस्य पृष्ठमार्द्रं-यन्निव तं वल्गायां गृहीत्वा पर्य्यटयितुमारब्ध।

दिनकतिपयैः = कियद्भिश्चन दिवसैः "पोटायुवतिस्तोककतिपय" इत्यादिना कतिपयशब्दस्य परनिपातः। अयासिष्व = अगच्छाव। चिञ्चावृक्षस्य = तिन्तिडीवृक्षस्य। "तिन्तिडी चिञ्चा" इत्यमरः। "इमली" इति भाषा। स्कन्धे = प्रकाण्डे। "अस्त्री प्रकाण्डः स्कन्धः स्यान्मूलाच्छाखावधिस्तरोः" इत्यमरः। अवागाहिष्वहि = प्रविष्टौ। पर्यटयितुम् = चालयितुम्।

साथियों द्वारा दिखाये गये उस मार्ग—जो सभी द्वारा नहीं जाना जा सकता था, जो जंगली पेड़ों के समूह से रुँधा था और जिसमें पहाड़ों से गिरे विशाल शिलाखण्डों पर घूम कर जाने, अधित्यकाओं पर चढ़ने, घाटियों को लाँघने तथा नदियों को पार करने का कष्ट उठाना पड़ता था—से चलते हुए, बीच-बीच में कुटियों में आराम करते हुए, स्वादिष्ट भोजन और सारी समुचित सामग्री की सहायता से सुखपूर्वक विश्राम करते हुए, कुटीरों से परिवर्तित होते रहने वाले सहायकों के साथ, कुछ ही दिनों में हम दोनों एक (भीमा) नदी के किनारे पहुँच गए। वहाँ एक इमली के वृक्ष के तने में लम्बी रस्सी से अपने घोड़ों को बाँध कर, समीप के यूप वृक्ष (शहतूत) की डाल पर कपड़े आदि टाँग कर, हम दोनों ने स्नान करने के लिये जल में प्रवेश किया। हमारे साथी ने अपने घोड़े की पीठ ठंडी करते हुए, उसकी लगाम पकड़ कर उसे फेरना (घुमाना) प्रारम्भ कर दिया।

ततो जलाद् बहिरागत्य, तिन्तिडी-शाखात उत्तार्य शुष्क-वस्त्रे परिधाय, इतस्ततः पर्यटयाऽपि च कां भूमिमायातौ—इति निश्चेतुं नाऽपारयाव। तावदकस्माद् दृष्टं यद् उत्तरतः खुर-धूलिभिः पार्श्व-परिवर्त्ति-लता-कुसुम-परागान् द्विगुणयन्तं लाङ्गूल-चामरेण वीजयन्तं मुखफेनैः पुष्पाणीव वर्षन्तं कञ्चित् श्यामकर्ण-शारदाभ्रश्वेतं वाजिन-मारुह्य लोलत्खड्ग-चर्म्माच्छन्न-पृष्ठदेशः कवच-शिञ्जित-विजित-कोकिल-शावक-निकर-कूजितो वीर-वेशः कश्चिच्छ्यामो युवा समायातीति।

स च क्षणेनैवाऽऽगत्य, नौ सकलं वृत्तान्तं पृष्ट्वा, विज्ञाय च

उत्तरतो वाजिनमारुह्य श्यामो युवा समायातीति सम्बन्धः। द्विगुणयन्तम् = वर्धयन्तम्। लाङ्गूलमेव चामरम् = प्रकीर्णकम्, तेन। श्यामं विशिनष्टि—लोलद्भ्याम् = सञ्चलद्भ्याम्, खड्गचर्मभ्याम् = असितत्प्रहाररक्षकाभ्याम्, छन्नः पृष्ठदेशो यस्य सः। कवचशिञ्जितेन = वारवाणशब्देन, "भूषणानां च शिञ्जितम्" इत्यमरः, विजितं कोकिल-शावक-निकर-कूजितम् = परभृत-शिशु-समूह-रणितं येन सः।

उसके बाद, जल के बाहर आकर, इमली (वृक्ष) की शाखा से सूखे कपड़ों को उतार कर, पहिन कर, इधर-उधर घूम कर भी हम दोनों इस बात का निश्चय न कर सके कि हम कहाँ आ गये हैं। इसी बीच हमने एकाएक देखा कि उत्तर दिशा की ओर से, खुरक्षेप से उड़ने वाली धूल से समीप की लताओं के पुष्पों के पराग को दूना करते हुए, पूँछ का चँवर डुलाते हुए और मुख से निकलने वाले फेन के रूप में पुष्प-सा वरसाते ए किसी काले कानों वाले, शरत्कालीन बादलों के समान सफेद घोड़े पर चढ़ा, पीठ पर हिलती हुई तलवार और ढाल् डाले, कवच के शब्द से कोयलों के बच्चों की कूज को जीतने वाला—वीरवेषधारी को सावले रंग का युवक आ रहा है।

वह क्षण भर में ही आकर, हम दोनों का सारा हाल पूछ कर और जान

प्रावोचत्–"अवगतम्, भवतोरेव विषये दृष्टस्वप्नः शिववीरो भवन्तौ स्मरति, तत्सपद्यश्वावारुह्य आगम्यताम्, न वां भयं किमपि, व्यतीतो भवतोर्दुःखमयः"—इति।

(ततः साश्चर्यं सपदि वस्त्राणि परिधाय सहचरमाकार्य तेन सहाश्वावारुह्य तमनुसृत्य तत्प्रदिष्टं वासादि-सौकर्यमङ्गीकृत्य सपद्येव निविवृत्सन्तं जटिल-सहचरं साश्लेषमनुज्ञाप्य यथासमयं शिववीरं साक्षात्कृत्याऽवगतम् यदेष एव महात्मा भटवेषेणाऽस्मन्निकटे भीमानद्यास्तटं गत आसीदिति।)

तत्कालमारभ्याऽद्यावधि तस्यैव करकमलच्छायायां वसावः, भगिनी-वियोग-तापश्चिरादासीत्, सोऽप्यद्य निवृत्तः, पुरोहितचर-

निविवृत्सन्तम्=निवर्त्तितुमिच्छन्तम्। साश्लेषम्=सालिङ्गनम्। क्रियाविशेषणम्।

कर वोला, मैं समझ गया, आप ही के विषय में स्वप्न देख कर वीर शिवाजी ने आप दोनों को याद किया है, अतः इसी समय घोड़ों पर चढ़ कर चलिये, अव आपको कोई भय नहीं है, आपका दुःखमय समय वीत गया।

उसके वाद आश्चर्यचकित होकर झट वस्त्र पहिन कर, साथी को बुलाकर उसके साथ घोड़ों पर वैठ कर, उसी का अनुसरण करते हुए, उसके द्वारा वताई गई निवास आदि सुविधाओं को स्वीकार कर, तत्क्षण ही लौटने के इच्छुक उस जटाधारी साथी को आलिङ्गन कर, उसे लौटने की अनुमति देकर, यथासमय शिवाजी से मिलने पर ज्ञात हुआ कि यही महापुरुष, सैनिक के वेष में भीमा नदी के किनारे हम लोगों के पास गये थे।

उस समय से आज तक हम दोनों उन्हीं के कर-कमलों की छाया में रह रहे हैं। वहुत दिनों से वहिन के वियोग का कष्ट था, आज वह भी दूर हो गया,

णावपि दृष्टौ, इति सर्वं शुभमेव परस्तात् सम्भाव्यते—इत्येष आवयोर्वृत्तान्तः।"

ततो मुहूर्तं सर्वेऽप्येतद्वृत्तान्तस्यैव पौर्वापर्य-स्मरण-पराधीना इवाऽऽसिषत परिशेषे च पुटपाकवदन्तरेव दन्दह्यमानेन वाष्पव्रातेन आविलस्याऽपि अप्रकटित-बहिश्चेष्टस्य ब्रह्मचारिगुरोः प्रार्थनया देवशर्म्मणा तोरण-दुर्ग-समीपे हनूमन्मन्दिरे एव निवासः स्वीकृतः। तदेव च प्रबन्धुं सर्वेऽपि कुटीरादुत्थिताः।

इति तृतीयो निश्वासः।

आसिषत = स्थिताः, परिशेषे = पर्यन्ते। पुटपाकवत् = उभयतः पाकवत्। आविलस्य = कलुषस्य, क्षुभितस्येत्यर्थः। शोकः किंमूल इत्यग्रे स्फुटीभविष्यति।

इति श्रीशिवराजविजयवैजयन्त्यां तृतीयनिश्वासविवरणम्।

पुरोहितजी के दर्शन भी हो गये और भविष्य में भी मंगल की ही संभावना है। यही हम दोनों का वृत्तान्त है।

तदनन्तर क्षण भर सभी लोग इसी वृत्तान्त के पौर्वापर्य का स्मरण करते हुए से बैठे रहे। उसके बाद पुटपाक के समान अन्दर ही अन्दर जल रहे तथा अश्रुओं से क्षुभित होते हुए भी बाहर से शान्त ब्रह्मचारिगुरु की प्रार्थना से, देवशर्मा ने तोरणदुर्ग के पास हनुमान् के मन्दिर में ही निवास करना स्वीकार कर लिया और उसी का प्रबन्ध करने के लिए सब लोग कुटी से उठ पड़े।

शिवराजविजय का तृतीय निश्वास समाप्त॥

संस्कृत-साहित्य-भाण्डागारे चतुर्थं गद्य-महाकाव्यम्

महाकवि-व्यास-प्रणीतः

शिवराज-विजयः

ललित-मधुरः, सरस-सरलः, संस्कृतोपन्यास-सन्दर्भः, पुस्तक-मेतत् सर्वैरपि संस्कृतज्ञैरवश्यं संग्रहणीयम्, पठनीयम्, पाठनीयम्।

युक्तप्रान्त-विहार-पंजाब प्रभृतिपरीक्षासु पाठ्यत्वेन निर्धारितः।

अत्यन्त शुद्ध और बहुत सुन्दर संस्करण—

शिवराजविजयः संस्कृत टीका और हिन्दी अनुवाद सहित — मूल्य

„ (निश्वासद्वयात्मकः) प्र

„ (निश्वासत्रयात

„ (प्रथमो

„ (

„